# ॥ श्रीनारदपञ्चरात्रम् १ २ ३ ॥

ॐ नमो भगवते वासुदेवाय
प्रथमैकरात्रे प्रथमोऽध्यायः

अथ मङ्गलाचरणम्

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

गणेशशेषब्रह्मेशदिनेशप्रमुखाः सुराः ।
कुमाराद्याश्च मुनयः सिद्धाश्च कपिलादयः ॥ १॥
लक्ष्मी सरस्वती दुर्गा सावित्री राधिका परा ।
भक्त्या नमन्ति यं शश्वत् तं नमामि परात् परम् ॥ २॥
ध्यायन्ते सततं सन्तो योगिनो वैष्णवास्तथा ।
ज्योतिरभ्यन्तरे रूपमतुलं श्यामसुन्दरम् ॥ ३॥
ध्यायेत् तं परमं ब्रह्म परमात्मानमीश्वरम् ।
निरीहमतिनिर्लिप्तम् निर्गुणं प्रकृतेः परम् ॥ ४॥
सर्वेशं सर्वरूपं च सर्वकारणकारणम् ।
सत्यं नित्यं च पुरुषं पुराणं परमव्ययम् ॥ ५॥
मङ्गल्यं मङ्गलार्हं च मङ्गलं मङ्गलालयम् ।
स्वेच्छामयं परं धाम भगवन्तं सनातनम् ॥ ६॥
स्तुवन्ति वेदा यं शश्वन्न् आनन्तं जानन्ति यस्य ते ।
तं स्तौमि परमानन्दं सानन्दं नन्दनन्दनम् ॥ ७॥
भक्तप्रियं च भक्तेशं भक्तानुग्रहविग्रहम् ।
श्रीदं श्रीशं श्रीनिवासं श्रीकृष्णं राधिकेश्वरम् ॥ ८॥
ज्ञानामृतं ज्ञानसिन्धोः संप्राप्य शङ्कराद् गुरोः ।
परावराच्च परमाद् योगीन्द्राणां गुरोर्गुरोः ॥ ९॥
वेदेभ्यो दधिसिन्धुभ्यश्चतुर्भ्यः सुमनोहरम् ।
तज्ज्ञानमन्थदण्डेन संनिर्मथ्य नवं नवम् ॥ १०॥
नवनीतं समुद्धृत्य नत्वा शम्भोः पदाम्बुजम् ।
विधिपुत्रो नारदोऽहं पञ्चरात्रं समारभे ॥ ११॥
ॐ नारायणाश्रमे पुण्ये पुण्यक्षेत्रे च भारत ।
सिद्धे नारायणक्षेत्रे वटमूले सुपुण्यदे ॥ १२॥


From http://sanskritdocuments.org

कृष्णांशं कृष्णभक्तं च पलं कृष्णपरायणम् ।
श्रीकृष्णचरणाम्भोजध्यानैकतानमानसम् ॥ १३॥
जपन्तं परमं ब्रह्म कृष्ण इत्यक्षरद्वयम् ।
सुखासने सुखासीनं कृष्णद्वैपायनं मुनिम् ॥ १४॥
पप्रच्छ शुकदेवश्च सर्वज्ञं पितरं मुनिः ।
कारणण् च पुराणानां पुराणं परमव्ययम् ॥ १५॥

श्रीशुक उवाच
भगवन् सर्वतत्त्वज्ञ वेदवेदाङ्गपारग ।
यद् यत् प्रकारं ज्ञानं च निगूढं श्रुतिसम्मतम् ॥ १६॥
तेषु यत् सारभूतं चाप्यज्ञानान्धप्रदीपकम् ।
तत् तत् सर्वं समालोच्य मां बोधयितुमर्हसि ॥ १७॥

अथ श्रीकृष्णभक्तिप्रशंशा

स पिता ज्ञानदाता यो ज्ञानं तत् कृष्णभक्तिदम् ।
सा भक्तिः परमा शुद्धा कृष्णदास्यप्रदा च या ॥ १८॥
तद् एव दास्यं शस्तं यत् साक्षाच्चरणसेवनम् ।
नित्यं गोलोकवासं च पुरतः स्तवनं हरेः ॥ १९॥
शश्वन् निमेषरहितं तत्पादपद्मदर्शनम् ।
शश्वत् तत्सार्धमालापसेवाकर्मनियोजनम् ॥ २०॥
तेन सार्धमविच्छेदस्थानं परं शोभनम् ।
भक्तानां वाञ्च्छितं वस्तु सारभूतं श्रुतौ श्रुतम् ॥ २१॥
पुत्रस्य वचनं श्रुत्वा व्यासदेवो जहास सः ।
विज्ञाय ज्ञानिनं पुत्रं परमाह्लादमाप ह ॥ २२॥
पुत्रं शुभाशिषं कृत्वा सर्वज्ञः सर्वभावनः ।
यथाप्राप्तं गुरुमुखात् प्रवक्तुमुपचक्रमे ॥ २३॥

श्रीव्यास उवाच
शुक धन्योऽसि मान्योऽसि पुण्यरूपोऽसि भारते ।
पुत्रेण भवतास्माकं कुलं मुक्तं च पावनम् ॥ २४॥
स पुत्रः कृष्णभक्तो यो भारते सुयशस्करः ।
पुनाति पुंसां शतकं जन्ममात्रेण लीलया ॥ २५॥
मातामहानां शतकं मातरं मातृमातरम् ।
सोदरान् बान्धवांश्चैव भृत्यान् पत्नीं सहात्मजाम् ॥ २६॥
यत्कन्यां प्रतिगृह्णाति तदादिपुरुषत्रयम् ।


From http://sanskritdocuments.org

कन्याप्रदाता श्वशुरो जीवन्मुक्तः सभार्यकः ॥ २७॥
स्वयं विधाता भगवान् परं कृष्णपरायणः ।
कृष्णभक्तो वसिष्टस्तु तत् सुतो वैष्णवः स्वयम् ॥ २८ ॥
वैष्णवस्तत् सुतः शक्तिः कृष्णध्यानैकमानसः ।
पराशरश्च तत्पुत्रः कृष्णपादाब्जसेवया ॥ २९ ॥
जीवन्मुक्तो महाज्ञानी योगीन्द्राणां गुरोर्गुरुः ।
अहं वेदविभक्ता च श्रीकृष्णपादसेवया ॥ ३०॥
गुरुर्मे भगवान् साक्षाद् योगीन्द्रो नारदो मुनिः ।
गुरोर्गुरुर्मे शम्भुश्च योगीन्द्राणां गुरोर्गुरुः ॥ ३१॥
तेषां पुण्येन पुत्रस्त्वं पुण्यराशिश्च मूर्तिमान् ।
पद्मानां मम पुंसां च प्रकाशो भास्करः स्वयम् ॥ ३२॥
श्रीकृष्णचरणाम्भोजं पादाब्जं नारदेशयोः ।
सरस्वतीं नमस्कृत्य ज्ञानं वक्ष्ये सनातनम् ॥ ३३॥
श्रूयताम् पञ्चरात्रं च वेदसारमभीप्सितम् ।
पञ्चसंवादमिष्टं च भक्तानामभिवाञ्च्छितम् ॥ ३४॥
प्राणाधिकं प्रियं शुद्धं परं ज्ञानामृतं शुभम् ।
अथ षट्संवादाः ?व्हत्? हि गोलोके शतशृङ्गे च पर्वते ॥ ३५॥
सुपुण्ये विरजातीरे वटमूले मनोहरे ।
पुरतो राधिकायाश्च ब्रह्माणं कमलोद्भवम् ॥ ३६॥
तमुवाच महाभक्तं स्तुवन्तं प्रणतं सुतम् ।
पञ्चरात्रमिदं पुण्यं श्रुत्वा च जगतां विधिः ॥ ३७॥
प्रणम्य राधिकां कृष्णं प्रययौ शिवमन्दिरम् ।
भक्त्या तम् पूजयामास शङ्करः परमादरम् ॥ ३८॥
सुखासने सुखासीनं स्वस्थं भक्तं च पूजितम् ।
पप्रच्छ वार्तां विनयी विनयेन सुखावहाम् ॥ ३९॥
सर्वं तं कथयामास पञ्चरात्रादिकं शुभम् ।
वसन्तं वटमूले च स्वर्गे मन्दाकिनीतटे ॥ ४०॥
योगीन्द्रैरपि सिद्धेन्द्रैर्मुनीन्द्रैश्च स्तुतं प्रभुम् ।
ज्ञानामृतं तमुक्त्वा स ब्रह्मलोकं जगाम ह ॥ ४१॥
शम्भुश्च कथयामास स्वशिष्यं नारदं मुनिम् ।
नारदः कथयामास पुष्करे सूर्यपर्वणि ॥ ४२॥
मां भक्तमनुरक्तं च पुण्याहे मुनिसंसदि ।
पञ्चरात्रमिदं शुद्धं भ्रमान्धध्वंसदीपकम् ॥ ४३॥

अथ पञ्चरात्रपदव्याख्या


From http://sanskritdocuments.org

रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिणः ॥ ४४॥
ज्ञानं परमतत्त्वं च जन्ममृत्युजरापहम् ।
ततो मृत्युञ्जयः शम्भुः संप्राप कृष्णवक्त्रतः ॥ ४५॥
ज्ञानम् द्वितीयं परमं मुमुक्षूणां च वाञ्च्छितम् ।
परं मुक्तिप्रदं शुद्धं यतो लीनं हरेः पदे ॥ ४६॥
ज्ञानं शुद्धं तृतीयं च मङ्गलं कृष्णभक्तिदम् ।
तद्दास्यमधीष्टं च यतो दास्यं लभेद् धरेः ॥ ४७॥
चतुर्थं यौगिकं ज्ञानं सर्वसिद्धिप्रदं परम् ।
सर्वस्वं योगिनां पुत्र सिद्धानां च सुखप्रदम् ॥ ४८॥
अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वं च वशित्वं च तथाकामावसायिता ॥ ४९॥
सावज्ञं दूरश्रवणं परकायप्रवेशनम् ।
कायव्यूहं जीवदानं परजीवहरं परम् ॥ ५०॥
सर्गकर्तृत्वशिल्पं च सर्गसंहारकारणम् ।
सिद्धं च षोडशविधं ज्ञानिनां च यतो भवेत् ॥ ५१॥
ज्ञानं च परमं प्रोक्तं तद् वै वैषयिकं नृणाम् ।
यद् इष्टदेवी माया सा परं संमोहकारणम् ॥ ५२॥
विषये बद्धचितं च सर्वमिन्द्रियसेवनम् ।
पोषनं स्वकुटुम्बानां स्वात्मनश्च निरन्रतम् ॥ ५३॥
प्रथमं सात्त्विकं ज्ञानं द्वितीयं च तद् एव च ।
नैर्गुण्यं च तृतीयं च ज्ञानं च सर्वतः परम् ॥ ५४॥
चतुर्थम् च राजसिकं भक्तस्तन् नाभिवाञ्च्छति ।
पञ्चमं तामसं ज्ञानं विद्वांस्तन् नाभिवाञ्च्छति ॥ ५५॥
ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः ।
पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम् ॥ ५६॥
ब्राह्मं शैवं च कौमारं वासिष्टं कापिलं परम् ।
गौतमीयं नारदीयमिदं सप्तविधं स्मृतम् ॥ ५७॥

अथ ग्रन्थप्रशंसा

षट् पञ्चरात्रं वेदाश्च पुराणानि च सर्वशः ।
इतिहासं धर्मशास्त्रं शात्रं च सिद्धियोगजम् ॥ ५८॥
दृष्ट्वा सर्वं समालोक्य ज्ञानं संप्राप्य शङ्करात् ।
ज्ञानामृतं पञ्चरात्रं चकार नारदो मुनिः ॥ ५९॥
पुण्यं च पापविघ्नं भक्तिदास्यप्रदं हरेः ।



From http://sanskritdocuments.org

सर्वस्वं वैष्णवानां च प्रियं प्राणाधिकं सुत ॥ ६०॥
सारभूतं च सर्वेषां वेदानां परमाद्भुतम् ।
नारदीयं पञ्चरात्रं पुराणेषु सुदुर्लभम् ॥ ६१॥
सर्वान्तरात्मा भगवान् ब्रह्मज्योतिः सनातनम् ।
परिपूर्णतमः श्रीमान् यथा कृष्णः सुरेषु च ॥ ६२॥
यथा देवीषु पूज्या सा मूलप्रकृतिरीश्वरी ।
वैष्णवानां च सिद्धानां ज्ञानिनां योगिनां शिवः ॥ ६३॥
विश्वस्तानां इन्द्रियानाम् मनश्च शीघ्रगामिनाम् ।
ब्रह्मा च वेदविदुषां पूज्यानां च गणेश्वरः ॥ ६४॥
सनत्कुमारो भगवान् मुनीनां प्रवरो यथा ।
बृहस्पतिर्बुद्धिमतां सिद्धानां कपिलो यथा ॥ ६५॥
योगीन्द्रानां सतां शुद्ध ऋषिर्नारायणो यथा ।
कवीनां च यथा शुक्रः पण्डितानां बृहस्पतिः ॥ ६६॥
सरिताम् च यथा गङ्गा समुद्राणां जलार्णवः ।
वृन्दावनं वनानां च वर्षानां भारतं यथा ॥ ६७॥
पुष्करं तत्र तीर्थानां पूज्यानां वैष्णवो यथा ।
आत्माकाशो यथाप्तानां यथा काशी पुरीषु च ॥ ६८॥
वृक्षाणां कल्पवृक्षश्च सुरभी कामधेनुषु ।
पुष्पाणां पारिजातश्च पत्राणां तुलसी यथा ॥ ६९॥
मन्त्राणां कृष्णमन्त्रश्च यथा विद्या धनेष्वपि ।
यथा तेजस्विनां सूर्यो मिष्टानाममृतं यथा ॥ ७०॥
आधाराणां च स्थूलानां महाविष्णुर्यथा सुत ।
सूक्ष्माणां परमाणुश्च गुरुणां मन्त्रतन्त्रदः ॥ ७१॥
पुत्रश्च स्नेहपात्राणां नक्षत्राणां यथा शशी ।
यथा घृतं च गव्यानां शस्यानां धान्यमीप्सितम् ॥ ७२॥
शास्त्राणां च यथा वेदाः साश्रमाणां यथा द्विजः ।
तैजसानां यथा रत्नं मुक्तामाणिक्यहीरकम् ॥ ७३॥
यथा छन्दसि गायत्री दुर्गा शक्तिमतीष्वपि ।
पतिव्रतासु लक्स्मीश्च क्षमाशीलासु मेदिनी ॥ ७४॥
सौभाग्यासु सुन्दरीषु राधा कृष्णप्रियासु च ।
हनुमान् वानराणां च पक्षिणां गरुडो यथा ॥ ७५॥
वाहनानां बलवतां शङ्करस्य यथा वृषः ।
शालग्रामश्च यन्त्राणां पूजासु कृष्णपूजनम् ॥ ७६॥
एकादशी व्रतानां च तपःस्वनशनं यथा ।
यज्ञानां जपयज्ञश्च सत्यं धर्मेषु पुत्रक ॥ ७७॥
सुशीलं च गुणानां च पुण्येषु कृष्णकीर्तनम् ।


From http://sanskritdocuments.org

शोभाशु सुखदृश्येषु प्रभा तेजःसु सर्वतः ॥ ७८॥
पोष्ट्रीणां उपकर्तृणां मित्राणां जननी यथा ।
लोकानामपि लोकेशः शेषो नागेषु पूजितः ॥ ७९॥
सुदर्शनं च शस्त्राणां विश्वकर्मा च शिल्पिनाम् ।
धर्मिष्ठेषु दयावत्सु देवर्षिसु महत्सु च ॥ ८०॥
विष्णुभक्तेषु विज्ञेषु यथैव नारदो मुनिः ।
एवं च सर्वशास्त्रेषु पञ्चरात्रं च पूजितम् ॥ ८१॥
यथा निपीय पीयूषं न स्पृहा चान्यवस्तुषु ।
पञ्चरात्रमभिज्ञाय नान्येषु च स्पृहा सताम् ॥ ८२॥
सर्वार्थज्ञानबीजं चाप्यज्ञानान्धप्रदीपम् ।
वेदसारोद्धृतं तत्त्वं सर्वेषां समभीप्सितम् ॥ ८३॥

इति श्रीनारदपञ्चरात्रे ग्रन्थप्रशंसनं नाम प्रथमोऽध्यायः

---

प्रथमैकरात्रे द्वितीयोऽध्यायः

शुक उवाच
कुत्र वा पञ्चरात्रं च नारदस्य च धीमते ।
प्रदत्तं शम्भुना तात तन् मे व्याख्यातुमर्हसि ॥ १॥

अथ नारदस्य तपोवर्णनम्

व्यास उवाच
अधीत्य सर्वान् वेदांश्च वेदाङ्गाण् पितुरन्तिके ।
जगाम तीर्थं केदारं सुप्रशस्तं च भारते ॥ २॥
हिमालयस्य पूर्वे य गङ्गातीरे मनोहरे ।
सिद्धे नारायणक्षेत्रे सर्वेषां अभिवाञ्छिते ॥ ३॥
तपश्चकार स मुनिर्दिव्यं वर्षसहस्रकम् ।
पित्रोक्तेनैव विधिना सततं संयुतः शुचिः ॥ ४॥
शुश्रावाकाशवाणीं च तपसोऽन्ते महामुनिः ।
स्वल्पाक्षरां च बह्वर्थां परिणामसुखावहाम् ॥ ५॥

अथ नारदं प्रति दैववाणी


From http://sanskritdocuments.org

अशरीरिष्युवाच
आधारितो यदि हरिस्तपसा ततः किम् ।
नाधारितो यदि हरिस्तपसा ततः किम् ।
अन्तर्बहिर्यदि हरिस्तपसा ततः किम् ।
नान्तर्बहिर्यदि हरिस्तपसा ततः किम् ॥ ६॥
विरम विरम ब्रह्मन् किं तपस्यासु वत्स ।
व्रज व्रज द्विज शीघ्रं शङ्करं ज्ञानसिन्धुम् ।
लभ लभ हरिभक्तिं वैष्णवोक्तां सुपक्वाम् ।
भवनिगडनिबन्धच्छेदिनीं कर्तनीं च ॥ ७॥
इति श्रुत्वा च स मुनिर्विमनाः स्वर्णदीतटे ।
चकारार्थानुसन्धानं न प्रसन्नम् च तन् मनः ॥ ८॥
रुरोद स्वर्णदीतीरे स्मारं स्मारं हरेः पदम् ।
ददर्श पुरतस्तातं ब्रह्माणं सकुमारकम् ॥ ९॥
ननाम सहसा मूर्ध्ना पितरं तं सहोदरम् ।
पाद्यमर्घ्यं च प्रददौ जवेन सादरं मुनिः ॥ १०॥
श्लोकद्वयार्थं पप्रच्छ कुमारं जगतां विधिम् ।
सुखासीनं सुस्थिरं च सस्मितं च गतश्रमम् ॥ ११॥
स्वात्मारामं पूर्णकामं ज्ञानिनां च गुरोर्गुरुम् ।
साश्रुनेत्रः पुलकितो भक्त्या प्रणतकन्धरम् ॥ १२॥
नारदस्य वचः श्रुत्वा दृष्ट्वा तं कातरं विधिः ।
पुत्रेण सार्द्धमालोच्य व्याख्यां कर्तुं समारेभे ॥ १३॥

अथ दैववाण्यर्थः

ब्रह्मोवाच
हे वत्स पूर्वश्लोकार्थं निगूढं श्रुतिसम्मतम् ।
वेदार्थं द्विविधं शुद्धं व्याख्यां कुर्वन्ति वैदिकाः ॥ १४॥
आराधितो यदि हरिर्येन पुंसा स्वभक्तितः ।
किं तस्य तपसा व्यर्थं तीर्थपूतस्य नारद ॥ १५॥
कृष्णमन्त्रोपासकस्य जीवन्मुक्तस्य भारते ।
तपश्चोपहासबीजं तथा चर्वितचर्वणम् ॥ १६॥
मन्त्रग्रहणमात्रेण पुरुषाणां शतं सुत ।
पुनाति स्वस्वभक्तं च चान्धवंश्चावलीलया ॥ १७॥
नहि धर्मो नहि तपः श्रीकृष्णसेवनात् परम् ।
परिश्रमं च विफलं तपसा वैष्णवस्य च ॥ १८॥


From http://sanskritdocuments.org

कृष्णमन्त्रोपासकस्य तीर्थपूतस्य पुत्रक ।
तीर्थस्नानमनशनं वेदेषु च विडम्बनम् ॥ १९ ॥
पूर्वकर्मानुरोधेन यत् पापं वैष्णवस्य च ।
मन्त्रग्रहणमात्रेण नष्टं वह्नौ यथा तृणम् ॥ २० ॥
पवित्रः परमो वह्निः पवित्रं चामलं जलम् ।
पवित्रं भारतं वर्षं तीर्थं यत् तुलसीदलम् ॥ २१ ॥
पुनाति लीलयैतानि शुद्धः कृष्णपरायणः ।
उपस्पर्श च भक्तस्याप्येते वाञ्छन्ति सादरम् ॥ २२ ॥
भक्तस्य पादरजसा सद्यः पूता वसुन्धरा ।
नहि पूतस्त्रिभुवने श्रीकृष्णसेवकात् परः ॥ २३ ॥
शालिग्रामशिलाचक्रे करोति कृष्णपूजनम् ।
तत्पादोदकनैवेद्यं नित्यं भुङ्क्ते च यः पुमान् ॥ २४ ॥
स वैष्णवो महापूतस्तन्मन्त्रोपासकः शुचिः ।
पुनाति पुंसां शतकं जन्ममात्रात् सबान्धवम् ॥ २५ ॥
वत्स श्लोकस्यैकपादं व्याख्यातं च यथागमम् ।
व्याख्यातं करोम्यन्यपादं यथाज्ञानं मिशामय ॥ २६ ॥
नाराधितो यदि हरिर्येन पुंसाधमेन च ।
किं तस्य तपसा व्यर्थं निष्फलं तत्परिश्रमः ॥ २७ ॥
व्रतान्येव हि दानानि तपांस्यनशनानि च ।
वेदोपयुक्ता यज्ञाश्च कर्माणि च शुभानि च ॥
न निष्पुनात्यभक्तं च सुराकुम्भमिवापगा ॥ २८ ॥
अभक्तस्पर्शमात्रेण तीर्थानि कम्पितानि च ।
अभक्तभारदुःखेन कम्पिता सा वसुन्धरा ॥ २९ ॥
श्लोकार्धं कथितं वत्स किंचिद् एव यथागमम् ।
तस्यार्धस्यापि व्याख्यानं करोमीति निशामय ॥ ३० ॥
वेदसारं कृष्णमतं ममापि नहि कल्पना ।
अन्तर्बहिर्यदि हैर्येषां पुंसां महात्मनां ॥ ३१ ॥
स्वप्ने जागरणे शश्वत् तपस्तेषां च निष्फलम् ।
स एव विष्णुतुल्यो हि तदंशो भारते मुने ॥ ३२ ॥
तस्य रक्षानिबन्धेन तदभ्यासे सुदर्शनम् ।
ध्यानमात्रेण निष्पापः पुनाति भुवनत्रयम् ॥ ३३ ॥
दत्वा चक्रं च रक्षार्थं न निश्चिन्तो जनार्दनः ।
स्वयं तन् निकटं याति द्रष्टुं रक्षणाय च ॥ ३४ ॥
तत्परो हि प्रियो नास्ति कृष्णस्य परमात्मनः ।
नहि भक्तात् परश्चात्मा प्राणाश्चावयवादयः ॥
न लक्ष्मी राधिका वाणी स्वयंभुः शम्भुरेव च ॥ ३५ ॥


From http://sanskritdocuments.org

भक्तप्राणो हि कृष्णश्च कृष्णप्राणा हि वैष्णवाः ।
ध्यायन्ते वैष्णवाः कृष्णं कृष्णश्च वैष्णवांस्तथा ॥ ३६॥
व्याख्यातम् च त्रिपादं च हे मुनीन्द्र यथागमम् ।
शेषपादस्य व्याख्यानं करोमीति निशामय ॥ ३७॥
नान्तर्बहिर्यदि हरिर्येषां पुंसां च नारद ।
तेषामपि तपो व्यर्थमन्तर्मलिनचेतसाम् ॥ ३८॥
किं तज्ज्ञानेन तपसा व्रतेन नियमेन च ।
तीर्थस्नानेन पुण्येनापि अभक्तमूढचेतसाम् ॥ ३९॥
कृष्णभक्तिविहीनेभ्यो द्विजेभ्यः श्वपचो महान् ।
शूकरो म्लेच्छनिवहः स्वधर्माचरेण च ॥ ४०॥
स्वधर्महीना विप्राश्चाप्यभक्ष्यभक्षणेन च ।
नित्यं नित्यं विधर्मेण पतिताः श्वपचाधमाः ॥ ४१॥
ब्रह्मणानां स्वधर्मश्च सन्ततं कृष्णसेवनम् ।
नित्यं ते भुञ्जते सन्तस्तन्नैवेद्यं पादोदकम् ॥ ४२॥
न दत्वा हरये यस्तु यदि भुङ्क्ते द्विजाधमः ।
अन्नं विष्ठासमं मूत्रसमं तोयं विदुर्बुधाः ॥ ४३॥
भुङ्क्ते स्वभक्ष्यं कोलश्च म्लेच्छश्च श्वपचाधमः ।
विप्रो नित्यमभक्ष्यं च भुङ्क्ते च पतितस्ततः ॥ ४४॥
श्लोकमेकं च व्याख्यातं यथाज्ञानं च नारद ।
सन्निबोध परस्यार्धं व्याख्यानं च यथोचितम् ॥ ४५॥
तपसो विरम ब्रह्मन् व्यर्थं भक्ततपो ध्रुवम् ।
शङ्करश्च गुरुं कृत्वा हरिभक्तिं लभाचिरम् ॥ ४६॥
सुपक्वा हरिभक्तिश्च तरणी भवतारणे ।
गुरुरेव परं ब्रह्म कर्णधारस्वरूपकः ॥ ४७॥
इत्येवमुक्त्वा त्वां देवी प्रजगाम सरस्वती ।
व्याख्यातस्तदभिप्रायः किं भूयः कथयामि ते ॥ ४८॥

ब्रह्माणश्च वचः श्रुत्वा जहास योगिनां गुरुः ।
सनत्कुमारो भगवान् उवाच पितरं शुक ॥ ४९॥

सनत्कुमार उवाच
पूर्वश्लोकस्य व्याख्यानं न बुद्धं शिशुना मया ।
पुत्रं शिष्यमबोधं च युक्तं बोधयितुम् पुनः ॥ ५०॥
आराधितो हरिर्येन तस्य व्यर्थं तपो यदि ।
नाराधितो हैर्येन तस्य व्यर्तं तपो यदि ॥ ५१॥
तस्यारहितौ तौ द्वौ तपसश्च स्थलं कुतः ।


From http://sanskritdocuments.org

तपः कुर्वन्ति ये तात त्वं मां बोधय बालकम् ॥ ५२॥

पुत्रस्य वचनं श्रुत्वा सन्दिग्धो जगतां गुरुः ।
दध्यौ कृष्णपदाम्भोजं परं कल्पतरुं शुक ॥ ५३॥
क्षणं संचित्य पादाब्जं प्राप राद्धान्तमीप्सितम् ।
व्याख्यां कर्तुं समारेभे विधाता जगतामपि ॥ ५४॥

अथ नैवेद्यप्रशंसा

ब्रह्मोवाच
धन्योऽहं भवतः पुत्रात् ज्ञानिनां च गुरोर्गुरोः ।
विष्णुभक्ताच्च धर्मिष्ठात् सत्पुत्राच्च पिता सुखी ॥ ५५॥
धन्योऽसि पण्डितोऽसि त्वं हरिभक्तोऽसि पुत्रक ।
ममापि सफलं जन्म जीवनं च त्वया बुध ॥ ५६॥
निबोध पूर्वश्लोकार्थं पुनर्व्याख्यां करोमि च ।
तथापि चेन् न सन्तोषो भवान् व्याख्यां करिष्यति ॥ ५७॥
आशब्दः सम्यगर्थे च राधितः प्राप्तवाचकः ।
संप्राप्तश्च हरिर्येन व्यर्थस्तस्य तपःश्रमः ॥ ५८॥
येन सम्यक्प्रकारेण संप्राप्तो हरिरीश्वरः ।
स्वप्ने ज्ञाने च ज्ञातस्तेषां व्यर्थस्तपःश्रमः ॥ ५९॥
श्रीकृष्णविमुखं मूढं द्विजमेव नराधमम् ।
तीर्थं दानं तापः पुण्यं व्रतं नैव पुनाति तम् ॥ ६०॥
यश्च मूढतमो लोके यश्च भक्तिं परां गतः ।
तावुभौ सुखसेधेते तपः कुर्वन्ति मध्यमाः ॥ ६१॥
देवान् अन्यांश्च भजते हरिं जानाति तत्परः ।
तपः करोति तं प्राप्तुमाकाङ्क्षन् मध्यमो जनः ॥ ६२॥
प्राक्तनाद् अनुरागी च गृही संसारसंवृतः ।
तपः करोति श्रीकृष्णपादपद्मार्थमीप्सितम् ॥ ६३॥
परं श्रीकृष्णभजनं ध्यानं तन्नामकीर्तनम् ।
तत्पादोदकनैवेद्यभक्षणं सर्ववाञ्छितम् ॥ ६४॥
अतीव मूढो विप्रश्च प्राक्तनाद् गुरुदोषतः ।
तामसो हि न जानाति श्रीकृष्णं त्रिगुणात् परम् ॥ ६५॥
अज्ञानाद् अथ वा ज्ञानात् सत्सङ्गाद् एव प्राक्तनात् ।
भुङ्क्ते नैवेद्यं ईशस्य कृष्णस्य परमात्मनः ॥ ६६॥
स च मुक्तो भवेत् पुत्र मुच्यते सर्वपातकात् ।
स याति दिव्ययानेन गोलोकं लोकमुत्तमम् ॥ ६७॥


From http://sanskritdocuments.org

शृणु वत्स प्रवक्ष्यामि पूर्वाख्यानं पुरातनम् ।
अतीव सुश्रवं चारु मधुरं मुक्तिदं परम् ॥ ६८॥
कान्यकुब्जः सुक्षुब्धश्च ब्राह्मणो ग्रामयाजकः ।
देवलो वृषवाहश्च महामूढश्च पातकी ॥ ६९॥
स्वप्ने ज्ञाने न जानाति पुण्यं वा कृष्णपूजनम् ।
कृष्णभक्तसहालापदर्शनस्पर्शनं शुभम् ॥ ७०॥
बभूव प्राक्तनात् तस्य क्षणमात्रं सुदुर्लभम् ।
तेन पुण्येन नैवेद्यं लेभे कृष्णस्य ब्राह्मणः ॥ ७१॥
पितुः पुण्येन पुत्रश्च मार्गे पतितमल्पकम् ।
स्वयं भुक्तावशेषं च पतितं वैष्णवाज्जनात् ॥ ७२॥
सुस्निग्धाक्षतजीर्णं च रजसा मिश्रितं परम् ।
गच्छतस्तत्र विप्रस्य पतितं भक्ष्यवस्तु च ॥ ७३॥
नैवेद्योपरि कृष्णस्य त्वरायुक्तस्य पुत्रक ।
तद्वस्तु भुक्तं विप्रेण कृष्णनैवेद्यमिश्रितम् ॥ ७४॥
सपुत्रेण क्षुधार्तेन तौ ययतुर्गृहम् ।
विप्रोच्छिष्टं च बुभुजे तस्य पत्नी पतिव्रता ॥ ७५॥
परम्परानुसंबन्धात् पवित्रा सा बभूव ह ।
जीवन्मुक्तो ब्राह्मणश्च बभूव स सपुत्रकः ॥ ७६॥
कालेन तेन पुण्येन व्याघ्रभुक्तश्च कानने ।
सार्धं च व्याघ्रपुत्राभ्यां गोलोकं प्रययौ द्विज ।
पतिव्रता सहमृता भर्ता सार्धं जगाम सा ॥ ७७॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे ब्रह्मसनत्कुमारसंवादे नैवेद्यप्रशंसनं नाम द्वितीयोऽध्याय

---

प्रथमैकरात्रे तृतीयोऽध्यायः

सनत्कुमार उवाच
अहो तात किमाश्चर्यं कृष्णस्य परमात्मनः ।
परं नैवेद्यमाहात्म्यं विस्तराद् वद साम्प्रतम् ॥ १॥

अथ श्रीकृष्णमहिमवर्णनम्

ब्रह्मोवाच
एकदा ब्राह्मणो हृष्टः प्रफुल्लवदनेक्षणः ।



From http://sanskritdocuments.org

पुत्रेण सार्धं प्रययौ बान्धवस्य गृहं मुदा ॥ २॥
निमन्त्रितो विवाहेन महासंभारसंभृतः ।
भुक्त्वा पीत्वा च तद्गृहे स्वगृहं प्रययौ मुदा ॥ ३॥
सपुत्रो ब्राह्मणो मार्गे क्षुत्पिपासार्दितः सुतः ।
ददर्श चन्द्रभागां तां नदीमतिमनोहराम् ॥ ४॥
उवाच पुत्रः पित्रं स्नात्वा भोक्ष्यामि चेति भोः ।
क्षुत्पिपासा बलवती वर्धते तात वर्त्मनि ॥ ५॥
पुत्रस्य वचनं श्रुत्वा तमुवाच द्विजः स्वयम् ।
भयंकरं वनमिदं समीपे सरितः सुतः ॥ ६॥
सुशीघ्रं गच्छ ग्रामान्तं पुरो रम्यसरोवरम् ।
तत्र स्नात्वा च भोक्ष्यावो गच्छ वत्स यथासुखम् ॥ ७॥
तातस्य वचनं श्रुत्वा जहास च चुकोप ह ।
पितरं वक्तुमारेभे रक्तपण्गकजलोचनः ॥ ८॥

शिशुरुवाच
बालोऽहं दशवर्षीयस्त्वं च वृद्धश्च ज्ञानदः ।
पिता ददाति पुत्राय ज्ञानं सर्वत्र भूतले ॥ ९॥
अहो दुरत्ययः कालो वृध्हो वदति बालवत् ।
कथं प्राक्तनमुल्लङ्घ्य ब्रूहि तात दुरत्ययम् ॥ १०॥
प्राक्तनात् सुखदुःखं च रोगं शोकं भयं पितः ।
सुमृत्युरपमृत्युर्वा चिरायुरल्पजीवनः ॥ ११॥
यत्र काले च यन्मृत्युर्भवनं शुभकर्म च ।
न्यूनाधिकं क्षणं नास्ति निषेकः केन वार्यते ॥ १२॥
यस्य हस्ते च यन्मृत्युर्विधात्रा लिखितः पुरा ।
न च तं खण्डितुं शक्तः स्वयं विष्णुश्च शङ्करः ॥ १३॥
तात व्यर्थमधीतं ते दुर्बुद्धेर्जन्म निष्फलम् ।
सुबुद्धेः सफलं जन्म तत्क्षणम् जीवनं सुखम् ॥ १४॥
येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स मे रक्षां करिष्यति ॥ १५॥
येन कृष्णेन विश्वानि चासंख्यानि कृतानि च ।
चराचरं च यो रक्षेत् स मे रक्षां करिष्यति ॥ १६॥
घोरारण्ये सुखं शेते यो हि कृष्णेन रक्षितः ।
निर्बन्धोऽपि यस्य मरणं तस्य मन्दिरे ॥ १७॥
यः शेते नागशय्यासु प्राक्तनान् मङ्गलाहितः ।
यो नागभक्षितो भोगात् स भृतो गरुडान्तिके ॥ १८॥
न समुद्रे च म्रियते नाग्निराशौ विषानले ।


From http://sanskritdocuments.org

न शस्त्रेण न चास्त्रेणायुर्मर्माणि रक्षति ॥ १९ ॥
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
तृणाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥ २० ॥
कश्चिद् गर्भे च म्रियते कश्चिद् भूमिष्टमात्रतः ।
कश्चिद् यौवनकाले च कश्चिद् एव हि वार्द्धके ॥ २१ ॥
कश्चिद् चिरायु रोगी चाप्यरोगी चापि कश्चन ।
कश्चिद् धनी दरिद्रश्च कश्चिद् एव हि कर्मणा ॥ २२ ॥
कश्चित् कल्पान्तजीवी च चिरजीवी च कश्चन ।
प्राक्तनाद् अमरः कश्चिन् निषेको बलवत्तरः ॥ २३ ॥
कश्चिद् याति च राजेन्द्रो दिव्ययानेन कर्मणा ।
कश्चित् कीटपतङ्गेषु कश्चित् पश्वादियोनिषु ॥ २४ ॥
कश्चिद् एव हि सन्न्यासी कश्चिच्च नरघातकः ।
कश्चिद् गजेन्द्रगामी च पशुयायी च कश्चन ॥ २५ ॥
कश्चिद् सूक्ष्मांशुकाधारी कश्चिज्जीर्णपटी जनः ॥ २६ ॥
कश्चिन् नग्नोऽअप्यनाहारी सुधाभोजी च च कश्चन ।
कश्चिच्च सुन्दरः श्रीमान् गलत्कुष्टी च कश्चन ॥ २७ ॥
कश्चित् कुब्जश्चाङ्गहीनो बधिरः काण एव च ।
कश्चिद् दीर्घो मध्यमश्च कश्चित् खञ्जश्च वामनः ॥ २८ ॥
कश्चित् कृष्णश्च गौरश्च श्यामलश्च स्वकर्मणा ।
कश्चिद् भक्त्या च प्राप्नोति कृष्णदास्यं सुदुर्लभम् ॥ २९ ॥
ब्रह्मणः परमं स्थानं जन्ममृत्युजराहरम् ।
कश्चित् प्राप्नोति परमं ब्रह्मलोकं निरामयम् ॥ ३० ॥
कश्चित् स्वर्गमिन्द्रपदं शिवलोकं स्वकर्मणा ।
कश्चित् वर्गमिन्द्रलोकं यमलोकं च कश्चन॥ ३१ ॥
कश्चिच्च नरके घोरे प्राप्नोति क्लेशमुल्वणम् ।
तादितो यमदूतेन क्षुधितस्तृषितः सदा ॥ ३२ ॥
भुङ्क्ते विण्मूत्रकीटं तन्मलं श्लेष्मं गरं वसाम् ।
क्षुरधारे तप्ततैले वह्नौ शिते जले स्थले ॥ ३३ ॥
प्राप्नोति दारुणं दुःखमाकल्पं पातकी पितः ।
तथा भोगावशेषे च लब्धा जन्म स्वकर्मणा ॥ ३४ ॥
व्याधियुक्तः प्रमुच्येत तया चेद् ईश्वरेच्छया ।
यद्भयाद् वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ ३५ ॥
वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति जन्तुषु ।
यस्याज्ञया सृष्टिविधौ मूर्मोऽनन्तं दधाति च॥ ३६ ॥
स च सर्वं च ब्रह्माण्डं लीलया चेश्वरेच्छया ।
यस्याज्ञया महाभीता सर्वाधारा वसुन्धरा ॥ ३७ ॥



From http://sanskritdocuments.org

धरा सा सर्वस्याद्या रत्नवांश्च हिमालयः ।
स्वयं विधाता भगवान् ध्यायते यमहर्निशम् ॥ ३८ ॥
यं ध्यायते च भजते स्वयं मृतुञ्जयः शिवः ।
सहस्रवक्त्रोऽयं स्तौति ध्यायते भजते सदा ॥ ३९ ॥
स्वय् सरस्वती स्तौति यमीश्वरमभीप्सितम् ।
सेवते पादपद्मं च स्वयं पद्मालया पितः ॥ ४० ॥
माया भीता च यं स्तौति दुर्गा दुर्गतिनाशिनी ।
स्तुवन्ति वेदाः सततं सावित्री वेदमातृका ॥ ४१ ॥
सिद्धेन्द्राश्च मुनीन्द्राश्च योगीन्द्राः सनकादयः ।
राजेन्द्राश्चासुरेन्द्राश्च सुरेन्द्रा मनवस्तथा ॥ ४२ ॥
ध्यायन्ते च भजन्ते च भक्ताः सन्तो हि सन्ततम् ।
केचिद् विदन्ति यं ब्रह्मां भगवन्तं सनातनम् ॥ ४३ ॥
केचित् प्रधानं सर्वाद्यं केचिच्च ज्योतिरीश्वरम् ।
केचिच्च सर्वरूपं च सर्वकारणकारणम् ॥ ४४ ॥
केचित् स्वेच्छाभयं रूपं भक्तानुग्रहविग्रहम् ।
केचित् सुरुचिरं श्यामसुन्दरं मनोहरम् ॥ ४५ ॥
सानन्दं परमानन्दं गोविन्दं नन्दनन्दनम् ।
भज तात परं ब्रह्म स्मर शश्वत् सुरेश्वरम् ॥ ४६ ॥
इत्येवमुक्त्वा पितरं चन्द्रभागानदीजले ।
स्नात्वा पपौ जलं स्वच्छं बुभुजे मिष्टमोदकम् ॥ ४७ ॥
पिता तद्वचनं श्रुत्वा सानन्दाश्रु मुमोच सः ।
चुचुम्ब गण्डं पुत्रस्य समाश्लेषणपूर्वकम् ॥ ४८ ॥
पिता स्नात्वा समारेभे सन्ध्यां कर्तुं च पूजनम् ।
सुस्नातं पितरं दृष्ट्वा पुत्रः स प्रययौ वनम् ॥ ४९ ॥
पत्रं भोजनपात्रार्थमर्हतुं चञ्चलः शिशुः ।
चकार चयनं तूर्णं प्रशस्तं पत्रपञ्चकम् ॥ ५० ॥
सुन्दरं कुसुमं वन्यं पूजनार्थं पितुस्तथा ।
ददर्श पुरतो बालः सुपक्वं वदरीफलम् ॥ ५१ ॥
चकार चयनं तानि फलानि शोभनानि च ।
धात्रीफलं सुपक्वं च पक्वमाम्रातकं तथा ॥ ५२ ॥
सुपक्वं च कदम्बं च चकार चयनं पुनः ।
सुपक्वं सुन्दरं रम्यं दाडिमं श्रीफलं तथा ॥ ५३ ॥
रम्यं जम्बुफलं चैव खर्जूरं सुमनोहरम् ।
करञ्जकं च जाम्बीरं सुन्दरं चिकुरं तथा ॥ ५४ ॥
तत् सर्वं चयनं कृत्वा ददर्श पुरतः सरः ।
सुनिर्मलं जलं स्वच्छं श्वेतपद्मं मनोहरम् ॥ ५५ ॥


From http://sanskritdocuments.org

रुचिरं रक्तकह्लारं प्रस्फुटं च जलान्तिके ।
विहाय तानि सर्वाणि सरःशिरसि सुस्थले ॥ ५६॥
पपौ सरःस्वच्छतोयं जहार पद्ममुल्वणम् ।
किंचित् सुरक्तकह्लारं पक्वं पद्मफलं तथा ॥ ५७॥
सर्वमाहरणं कृत्वा पितरं गन्तुमुद्यतः ।
प्रफुल्लवदनः श्रीमान् सस्मितो द्विजबालकः ॥ ५८॥
प्रफुल्लचम्पकतरुं ददर्श पुरतः शिशुः ।
मल्लिकामालतीकुन्दयूथिकामाधवीलताः ॥ ५९॥
चकार चयनं स्फीतः पुष्पाणि सुन्दराणि च ।
पुष्पेण फलपत्रेण तस्य भारो बभूव ह ॥ ६०॥
बालो वोढुमशक्यन्तश्च ययौ गमनमन्थरः ।
न फलं बुभुजे सोऽपि धर्माधर्मभयेन च ॥ ६१॥
पुरो ददर्श स शिशुर्घोरं व्याघ्रालयं भिया ।
तात तातेति शब्दं च चकार ह पुनः पुनः ॥ ६२॥
न ददर्श च तातं च शार्दुलं च ददर्श सः ।
भिया सस्मार गोविन्दपादारवैन्दमीप्सितम् ॥ ६३॥
हरिं नरहरिं रामं कृष्णं विष्णुं च माध्वम् ।
दामोदरं हृषीकेशं मुकुन्दं मधुसूदनम् ॥ ६४॥
एतानि दश नामानि जपन् विप्रशिशुर्भिया ।
प्रययौ पुरतः शीघ्रं पुनरेव सरोवरम् ॥ ६५॥
सरसो निर्मले तीरे पुष्पाणि च फलानि च ।
ददौ भक्त्या भगवते कृष्णाय परमात्मने ॥ ६६॥
श्रीकृष्णपूजां कुर्वन्तं ध्यानमानां पदाम्बुजम् ।
निकटं न ययौ व्याघ्रो दृष्ट्वा बालं च दूरतः ॥ ६७॥
व्याघ्रं ददर्श बालश्च प्रकटास्यं भयानकम् ।
विकृताकारदशनं विकटाक्षं महोदरम् ॥ ६८॥
दृष्ट्वा च दुरतो व्याघ्रमुवास सरसस्तटे ।
दध्यौ कृष्णपदाम्भोजं जन्ममृत्युजराहरम् ॥ ६९॥
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धं च तथाज्ञाख्यं षट्चक्रं च विभाव्य च ॥ ७०॥
कुण्डलिन्या स्वशक्त्या च सहितं परमेश्वरम् ।
सहस्रदलपद्मस्थं हृदये स्वात्मनः प्रभुम् ॥ ७१॥
ददर्श द्विभुजं कृष्णं पीतकौशेयवाससम् ।
सस्मितं सुन्दरं शुद्धं नवीनजलदप्रभम् ॥ ७२॥
कोटिकन्दर्पसौन्दर्यलीलाधाममनोहरम् ।
कोटिपार्वणपूर्णेन्दुप्रभाजुष्टं च सुन्दरम् ॥ ७३॥



From http://sanskritdocuments.org

सुखदृश्यं सुरूपं च भक्तानुग्रहकारकम् ।
चन्दनोक्षितसर्वाङ्गं रत्नभूषणभूषितम् ॥ ७४॥
प्रफुल्लपद्मनयनं राधावक्षःस्थलस्थितम् ।
मालतीमाल्यसम्बद्धचूडाचारुसुशोभनम् ॥ ७५॥
धृतरत्नं रत्नपद्मं दक्षिणेन करेण च ।
वामेन मणिनिर्माणदीप्तदर्पणमुज्ज्वलम् ॥ ७६॥
रत्नकुण्डालयुग्मेन गण्डस्थलविराजितम् ।
कौस्थुभेन मणीन्द्रेण चारुवक्षःस्थलोज्ज्वलम् ॥ ७७।
मुक्ताराजिविनिन्दैकदन्तराजिविराजितम् ।
आजानुमालतीमालावनमालाविभूषितम् ॥ ७८॥
वेदाननसरस्वत्या स्तुतं ब्रह्मेशवन्दितम् ।
पद्मापद्मालयामायासंसेवितपदाम्बुजम् ॥ ७९॥
परिपूर्णतमम् ब्रह्म परमात्मानमीश्वरम् ।
निर्लिप्तं साक्षिभूतं च भगवन्तं सनातनम् ॥ ८०॥
सर्वेशां सर्वरूपं च सर्वकारणकारणम् ।
पुरुषं परमात्मैकं परेशं प्रकृतेः परम् ॥ ८१॥
एवं भूतं विभुं दृष्ट्वा मनसा प्रणनाम तम् ।
तुष्टाव परया भक्त्या तमीशं सम्पुटाञ्जलिः ॥ ८२॥

श्रीसुभद्र उवाच
हे नाथ दर्शनं देहि मां भक्तं शरणागतम् ।
श्रीद श्रीश श्रीनिवास श्रीनिधे श्रीनिकेतन ॥ ८३॥
श्रिया सेवितपादाब्ज श्रीसमुत्पत्तिकारण ।
वेदानिर्वचनियेश निरीह निर्गुणाधिप ॥ ८४॥
सर्वाद्य सर्वनिलय सर्वबीज सनातन ।
शान्त सरस्वतीकान्त नितान्त सर्वकर्मसु ॥ ८५॥
सर्वाधार निराधार कामपूर  परात् पर ।
दुष्पारासारसंसारकर्णधार नमोऽस्तु ते ॥ ८६॥

इत्येवमुक्त्वा स शिशु रुरोद च पुनः पुनः ।
ध्यायेन तत्पदाम्भोजं शरणं च चकार सः ॥ ८७॥
इति विप्रकृतं स्तोत्रं त्रिसन्ध्यं यः पठेन् नरः ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ८८॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे ब्रह्मसनत्कुमारसंवादे श्रीकृष्णमहिमोपालम्भनं नाम तृत



From http://sanskritdocuments.org

प्रथमैकरात्रे चतुर्थोऽध्यायः

ब्रह्मोवाच
ब्राह्मणस्य स्तवं श्रुत्वा परितुष्टो जनार्दनः ।
कृपां चकार भगवान् भक्तेशो भक्तवत्सलः ॥ १॥
एतस्मिन्न् अन्तरे तत्र भगवान् नन्दनन्दनः ।
नारायणर्षिः कृपया चाजगाम सरोवरम् ॥ २॥
ददर्श ब्राह्मणवटुं तमेव मुनिपुङ्गवम् ।
तेजसा सुखदृश्येन सुन्दरं सुमनोहरम् ॥ ३॥
पीतवस्त्रपरीधानं नवीनजलदप्रभम् ।
चन्दनोक्षितसर्वाङ्गं वनमालाविभूषितम् ॥ ४॥
प्रसन्नवदनं शुद्धं सस्मितं सर्वपूजितम् ।
विभान्तं च जपन्तं शुद्धस्फटिकमालया ॥ ५॥
दृष्ट्वा ननाम सहसा शिरसा विप्रपुङ्गवः ।
शुभाशिषं ददौ तस्मै दत्वा शिरसि हस्तकम् ॥ ६॥
तमुवाच मुनिश्रेष्ठः कृपया दीनवत्सलः ।
हितं तथ्यं नीतिसारं परिणामसुखावहम् ॥ ७॥

श्रीनारायणर्षिरुवाच
अये विप्र महाभाग सफलं जीवनं तव ।
यस्मिन् कुले च जातोऽसि तद्धन्यं सुप्रशंसितम् ॥ ८॥
भज त्वं परमानन्दं सानन्दं नन्दनन्दनम् ।
ध्रुवं यास्यसि गोलोकं परमानन्दमीप्सितम् ॥ ९॥
तत् कुलं पावनं धन्यं यशस्यं च निरापदम् ।
यस्मिन् स्वयं भवान् जातः पुण्यः कृष्णपरायणः ॥ १०॥
नैवेद्यं पतितं मार्गे जीर्णं श्वापदभक्षितम् ।
भुक्त्वा तवैषा बुद्धिश्च कृष्णभक्तिर्बभूव च ॥ ११॥
कृष्णनैवेद्यमाहात्म्यं को वत्स कथितुं क्षमः ।
यद् वक्तुं न हि शक्ताश्च वेदाश्चत्वार एव च ॥ १२॥
वरं वृणुष्व भद्रं ते सुभद्र द्विजपुङ्गव ।
सर्वं दातुमहं शक्तो यत् ते मनसि वाञ्छितम् ॥ १३॥

नारायणवचः श्रुत्वा तमुवाच शिशुः स्वयम् ।
पुनः कम्पितसर्वाङ्गः साश्रुनेत्रः पुटाञ्जलिः ॥ १४॥


From http://sanskritdocuments.org

सुभद्र उवाच
देहि मे कृष्णपादाब्जे दृढं भक्तिं सुदुर्लभम् ।
तद्दास्यं तत्पदे वासं जरामृत्युहरं परम् ॥ १५ ॥
अन्यं वरं न गृह्णामि न मे किंचित् प्रयोजनम् ।
नाहं वरार्थी कामी च रागी वेतनभुग् यथा ॥ १६ ॥

नारायणर्षिरुवाच
श्रीकृष्णो यस्य भक्तिश्च तस्यात्र किं सुदुर्लभम् ।
अणिमादिकद्वत्रिंशत्सिद्धिः करतले परा ॥ १७ ॥
निर्विकल्पो ददात्यस्य नैव गृह्णाति वैष्णवः ।
अनिमित्तां हरेर्भक्तिं भक्ता वाञ्च्छन्ति सन्ततम् ॥ १८ ॥
गृहाण मन्त्रं कृष्णस्य परं कल्पतरुं वरम् ।
भक्तिदं दास्यदं शुद्धं कर्ममूलनिकृन्तनम् ॥ १९ ॥
लक्ष्मीर्मायाकामबीजं ङेऽन्तं कृष्णपदं तथा ।
वह्निजायान्तमन्त्रं च मन्त्रराजं मनोहरम् ॥ २० ॥

इत्येवमुक्त्वा तत्कर्णे कथयामास दक्षिणे ।
वारत्रयं मुनिश्रेष्ठः शुद्धभावेन पुत्रक ॥ २१ ॥
येन स्तोत्रेण तुष्टाव सुभद्रः परमेश्वरम् ।
आज्ञां चकार स ऋषिस्तद् एव पठितुं मुदा ॥ २२ ॥
कवचं च ददौ तस्मै जगन्मङ्गलमङ्गलम् ।
ध्यानं च सामवेदोक्तं सर्वपूजाविधिक्रमम् ॥ २३ ॥
हरेर्दास्यं च तद्भक्तिर्गोलोकवासमीप्सितम् ।
जन्मद्वयान्तरे चैव कर्मभोगक्षये सति ॥ २४ ॥

सुभद्र उवाच
सत्यं कुरु महाभाग वरं मे यदि दास्यसि ।
वरं वृणोमि तत् पश्चात् यन् मे मनसि वाञ्च्छितम् ॥ २५ ॥

नारायणर्षिरुवाच
ॐ सत्यं वत्स दास्यामि वरं वृणु यथेप्सितम् ।
ममाशक्यं नास्ति किंचित् दाताहं सर्वसम्पदाम् ॥ २६ ॥

सुभद्र उवाच
कण्ठे ते किं च कवचं कस्य वा सर्वपूजितम् ।



From http://sanskritdocuments.org

अमूल्यरत्नगुटिकायुक्तं च सुमनोहरम् ॥ २७॥
कवचं देहि मे देव स्वसत्यरक्षणं कुरु ।

विप्रस्य वचनं श्रुत्वा शुष्ककण्ठौष्ठातालुकः ॥ २८ ॥
वक्तुं न शक्तस्तद् वाक्यं दध्यौ कृष्णपदाम्बुजम् ।
प्रददौ गुटिकां तस्मै नोवाच कवचं मुनिः ॥ २९ ॥
तमुवाच महर्षिश्च वितुष्टश्चोन्मनाः सुत ।
वत्स क्रोधो हि देवस्य वरं तुल्यं च वाञ्छितम् ॥ ३०॥

नारायणर्षिरुवाच
त्रिंषत्सहस्रवर्षं च भुङ्क्ष्व राज्यं सुदुर्लभम् ।
लभस्व दुर्लभां लक्ष्मीं मायया मोहितो भव ॥ ३१॥
मदिष्टदेवकवचं गृहीतं येन हेतुना ।
सप्तकल्पान्तजीवस्य परत्र च भविष्यति ॥ ३२॥
सुचिरेणैव कालेन गोलोकं च प्रायस्यसि ।
परे मृकण्डुपुत्रस्त्वं मार्कण्डेयो भविष्यसि ॥ ३३॥
मया दत्तं च कवचं त्वां च रक्षति पुत्रक ।
तव कण्ठे स्थितिश्चाउस्य प्रति जन्मनि जन्मनि ॥ ३४॥

पुनश्च गुटिकायुक्तं कृत्वा च कवचं मुनिः ।
गले दधार भक्त्या च तद्भक्तो धर्मनन्दनः ॥ ३५॥
वरं दत्वा च स मुनिर्ययौ गेहं स उन्मनाः ।
विप्राय कवचं दत्वा नष्टवत्सा गौर्यथा ॥ ३६॥
भ्रात्रा नरेण पित्रा च धर्मेण च महात्मना ।
मात्रा मूर्त्या च पत्न्या च शान्त्या च भर्त्सितो मुनिः ॥ ३७॥
विप्रः सम्प्राप्य कवचं मन्त्रं कल्पतरुं परम् ।
सरोवरात् समुत्थाय प्रज्वलन् ब्रह्मतेजसा ॥ ३८॥
क्षणं तस्थौ सरस्तीरे वटमूले मनोहरे ।
जजाप परमं मन्त्रं सम्पूज्य जगदीश्वरम् ॥ ३९॥
अथ तत्तातविप्रो हि समन्विष्य सुतं चिरम् ।
गत्वा च स्वगृहं दुःखी शोकार्तः स रुरोद च ॥ ४०॥
समुद्यता तनुं त्यक्तुं तन्माता पुत्रवार्तया ।
न तत्याज तनुं विप्रो दृष्ट्वा सुस्वप्नमुत्तमम् ॥ ४१॥
विप्रो विप्रा गृहं त्यक्त्वा पुत्रान्वेषणपूर्वकम् ।
प्रययौ काननं घोरं सर्वैश्च बान्धवैः सहः ॥ ४२॥
सर्वं वनं समन्विष्य प्रययुस्ते सरोवरम् ।


From http://sanskritdocuments.org

ददृशुस्ते शिशुं गृह्यं सूर्याभं वटमूलके ॥ ४३॥
चुचुम्ब गण्डं पुत्रस्य विप्रो विप्रा च सारदम् ।
आशिश्लेष क्रमेणैव माता तातः पुनः पुनः ॥ ४४॥
पुत्रश्च सर्ववृत्तान्तं कथयामास सादरम् ।
श्रुत्वा पुत्रस्य विप्रश्च विप्रा बान्धवस्तथा ॥ ४५॥
ययुः सर्वे स्वदेशं च परमाह्लादमानसाः ।
चन्द्रभागां समुत्तीर्य विवेश नगरं परम् ॥ ४६॥
नगरस्थो नृपेन्द्रश्च दृष्ट्वा तेजस्विनं शिशुम् ।
ददौ तस्मै स्वकन्यां च रत्नालङ्कारभूषितम् ॥ ४७॥
युवतीं सुन्दरीं श्यामां तप्तकञ्चनसंनिभाम् ।
पतिव्रतां महाभागां सुन्दरीं कमलाकलाम् ॥ ४८॥
गजेन्द्राणां सहस्रं च प्रददौ यौतुकं मुदा ।
अश्वानां दशलक्षं च रत्नानां च सहस्रकम् ॥ ४९॥
दासीनां निष्ककण्ठीनां सौन्दरीणां सहस्रकम् ।
वस्त्ररत्नसहस्रं च बहुमूल्यं सुदुर्लभम् ॥ ५०॥
दासानां च सहस्रं च पदातीनां त्रिलक्षकम् ।
दशलक्षं सुवर्णं च रत्नमालां सुदुर्लभाम् ॥ ५१॥
दत्वा तस्मै च कन्यां च रुरोद च सभार्यकः ।
राजा च कन्यया सार्धं प्रययौ विप्रमन्दिरम् ॥ ५२॥
गत्वा चापि कियद् दूरं ददर्श नगरं नृपः ।
अतीव सुन्दरं रम्यं विजित्य चामरावतीम् ॥ ५३॥
शुद्धस्फटिकसंकाशं रत्नसारविनिर्मितम् ।
त्रिकोटिचट्टालिकागेहं नवकोटिसुमन्दिरम् ॥ ५४॥
सप्तप्राकारयुक्तं च परिखात्रयसम्युक्तम् ।
दुर्लङ्घ्यमतिदुर्गम्यं रिपूणामपि पुत्रक ॥ ५५॥
शिशोश्च स्वाश्रमं रम्यं सद्रत्नसारनिर्मितम् ।
स्फुरत् वज्रकपाटं च रत्नेन्द्रकलशान्वितम् ॥ ५६॥
सद्रत्नदर्पणाद्यैर्दीपं रत्नकुम्भैर्विराजितम् ।
प्राङ्गणं रत्नसाराढ्यं रत्नसोपानशोभितम् ॥ ५७॥
मनोहरं राजमार्गं सिन्दूरादिपरिष्कृतम् ।
प्राकारं मणिभूषाढ्यमुच्चैराकाशस्पर्शि च ॥ ५८॥
जगाम विस्मयं राजा दृष्ट्वा नगरमुत्तमम् ।
पित्रा मात्रा सह शिशुर्विस्मयं च ययौ मुदा ॥ ५९॥
गजेन्द्राणां त्रिलक्षं च श्वानां शतलक्षकम् ।
चतुर्गुणं पदातीनामाययुस्तेऽप्यनुव्रजम् ॥ ६०॥
वारणेन्द्रं पुरस्कृत्य वेश्यां च नर्तकं तथा ।



From http://sanskritdocuments.org

द्विजांश्च पूर्णकुम्भांश्च पतिपुत्रवतीं सतीम् ॥ ६१॥
महापात्रः शिशुं दृष्ट्वा गजेन्द्रोपरिसंस्थितम् ।
मूर्ध्ना ननाम वेगेनाप्यवरुह्य गजाद् अपि ॥ ६२॥
शिशुं प्रवेशयां आस रत्ननिर्माणमन्दिरम् ।
रत्नसिंहासनं तस्मै प्रददौ सादरं मुदा ॥ ६३॥
कन्यादात्रे च पित्रे च मात्रे च सादरं मुदा ।
रत्नसिंःआसनं रम्यं प्रददौ पात्र एव च ॥ ६४॥
शिशुम् सिषेव पात्रश्च स्वयं च श्वेतचामरैः ।
दधार रत्नछत्रं च हीराहारपरिष्कृतम् ॥ ६५॥
उवास स सभार्यां च सुधर्म्यां महेन्द्रवत् ।
श्वसुरश्च ययौ गेहं शिशुना च पुरस्कृतः ॥ ६६॥
त्रिंशत्सहस्रवर्षं च राजा राज्यं चकार सः ।
कालान्तरे तत्पिता च वने व्याघ्रेण भक्षितः ॥ ६७॥
पतिव्रता महाभागा माता सहमृता सुत ।
रत्नयानेन रम्येण सस्त्रीकः कृष्णमन्दिरम् ॥ ६८॥
प्रययौ सादरं विप्रः कृष्णनैवेद्यभक्षणात् ।
तदस्थि भुक्त्वा व्याघ्रश्च पूतः सद्यश्च सांप्रतम् ॥ ६९॥
ताभ्यां सार्धं च प्रययौ गोलोकं सुमनोहरम् ।
शिशुर्देहं परित्यज्य हिमाद्रौ स्वर्णदीतटे ॥ ७०॥
दत्वा पुत्राय राज्यं च स्वर्गाद् अपि सुदुर्लभम् ।
मृकण्डुपत्नीगर्भे च लेभे जन्म स्वकर्मणा ॥ ७१॥
मार्कण्डेयो मुनिश्रेष्ठो बभूव परजन्मनि ।
सप्तकल्पान्तजीवी च नारायणवरेण सः ॥ ७२॥
बभूव सांप्रतं विप्रः कृष्णनैवेद्यभक्षणात् ।
श्वभक्षितं च नैवेद्यं भुक्त्वा चेद् ईदृशी गतिः ।

अकामतश्चाप्यज्ञातो जीर्णमार्गस्थितं सुत ॥ ७३॥
यो भक्षेत् कामतो ज्ञातो नित्यं नैवेद्यमीप्सितम् ।
न जानन्ति गतिस्तस्य वेदाश्चत्वार एव च ॥ ७४॥
इति ते कथितं ब्रह्मन्न् इतिहासं पुरातनम् ।
आश्चर्यं मधुरं रम्यं किं भूयः श्रोतुमिच्छसि ॥ ७५॥

श्रीनारद उवाच
श्रुतं नैवेद्यमाहात्म्यमतीव सुमनोहरम् ।
ईश्वरस्यापि हे तात कृष्णस्य परमात्मनः ॥ ७६॥
अधुना श्रोतुमिच्छामि स्वात्मसन्देहभञ्जनम् ।


From http://sanskritdocuments.org

नारायणर्षेर्कण्ठे च कवचं तस्य तद् वद ॥ ७७॥

अथ कवचप्रश्नः

सनत्कुमार उवाच
ममाप्यस्तीति सन्देहो वचने प्रपितामह ।
कस्य तत् कवचं ब्रह्मन् इदं वक्तुं त्वमर्हसि ॥ ७८॥
स पिता स गुरुः स्वच्छः करोति भ्रमभञ्जनम् ।
शीघ्रं ब्रूहि महाभाग नारदं मां सुतप्रिय ॥ ७९॥

पुत्रयोश्च वचः श्रुत्वा शुष्ककण्ठौष्ठतालुकः ।
उवाच वचनं ब्रह्मा स्मरन् कृष्णपदाम्बुजम् ॥ ८०॥

ब्रह्मोवाच
नारायणेन मुनिना जगन्मङ्गलमङ्गलम् ।
विप्राय कवचं दत्तम् ध्यानं च पर्मात्मनः ॥ ८१॥
तद् ब्रवीमि महाभाग त्वामेव नारदं प्रति ।
कण्ठस्थं कवचं वक्तुं नैव शक्नोमि सांप्रतम् ॥ ८२॥
मत्कण्ठे कवचं यस्य गोपनीयं सुदुर्लभम् ।
नारायणर्षिकण्ठे च तद् एव परमाद्भुतम् ॥ ८३॥
तद् एव धर्मकण्ठे च नरस्य च महात्मनः ।
अगस्त्यस्य च कण्ठे च लोमशस्य महामुनेः ॥ ८४॥
तुलस्याश्चापि संज्ञायाः सावित्र्याश्चापि पुत्रक ।
अन्येषां च भाग्यवतां भारते च सुदुर्लभे ॥ ८५॥

नारद उवाच
पश्चात् श्रोष्यामि कवचं जगन्मङ्गलमङ्गलम् ।
ध्यानं पूजां विधानं च कृष्णस्य परमात्मनः ॥ ८६॥
आदौ कथय भद्रं ते परं परमभद्रकम् ।
सुभद्रप्राप्तं कवचं माहात्म्यं यस्य दुर्लभम् ॥ ८७॥

ब्रह्मोवाच
सुभद्रप्राप्तं कवचं पश्चात् श्रोष्यसि पुत्रक ।
शङ्करस्य मुखाद् विप्र स्वगुरोर्ज्ञानिनस्तथा ॥ ८८॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे ब्रह्मानारदसंवादे


From http://sanskritdocuments.org

प्रथमैकरात्रे कवचप्रश्नो नाम चतुर्थोऽध्यायः

---

प्रथमैकरात्रे पञ्चमोऽध्यायः

श्रीसनत्कुमार उवाच
तवेच्छा यत्र कवचे ध्याने तद् वद साम्प्रतम् ।
यच्छृणोमि शुभं तच्च केन श्रेयसि तृप्यते ॥ १॥

ब्रमोवाच
ध्यानं सामवेदोक्तं दत्तम् नारायणेन वै ।
कवचं च सुभद्राय धर्मिष्ठाय महात्मने ॥ २॥
नवीनजलदश्यामं पीतकौशेयवाससम् ।
चन्दनोक्षितसर्वाङ्गं सस्मितं श्यामसुन्दरम् ॥ ३॥
मालतीमाल्यभूषाढ्यं रत्नभूषणभूषितम् ।
मुनीन्द्रेशसुसिद्धेशब्रह्मेशशेषवन्दितम् ॥ ४॥
सर्वस्वरूपं सर्वेशं सर्वबीजं सनातनम् ।
सर्वाद्यं सर्वज्ञं पुरुषं प्रकृतेः परम् ॥ ५॥
निर्गुणं च निरीहं च निर्लिप्तमीस्वरं भजे ।
ध्यात्वा मूलेन तस्मै च दद्यात् पाद्यादिकं मुदा ॥ ६॥
ततः स्तोत्रं च कवचं भक्त्या च प्रपठेन् नरः ।
जप्त्वा च मन्त्रं भक्त्या दण्डवत् प्रणमेद् भुवि ।
इति ते कथितं वत्स किं भूयः श्रोतुमिच्छसि ॥ ७॥

श्रीसनत्कुमार उवाच
ब्रूहि मे कवचं ब्रह्मन् जगन्मङ्गलमङ्गलम् ।
पूज्यं पुण्यस्वरूपं च कृष्णस्य परमात्मनः ॥ ८॥

अथ जगन्मङ्गलमङ्गलकवचम्

ब्रह्मोवाच
शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतम् ।
श्रीकृष्णेनैव कथितं मह्यं च कृपया परा ॥ ९॥
मया दत्तं च धर्माय तेन नारायणर्षये ।
ऋषिणा तेन तद् दत्तं सुभद्राय महात्मने ॥ १०॥



From http://sanskritdocuments.org

अतिगुह्यतमं शुद्धं परं स्नेहाद् वदाम्यहम् ।
यद् धृत्वा पठनात् सिद्धाः सिद्धानि प्राप्नुवन्ति च ॥ ११॥
एवमिन्द्रादयः सर्वे सर्वैश्वर्यमाप्नुयुः ।
ऋषिश्छन्दश्च सावित्री देवो नारायणः स्वयम् ॥ १२॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।
राधेशो मे शिरः पातु कण्ठं रधेश्वरः ॥ १३॥
गोपीशश्चक्षुषी पातु तालु च भगवान् स्वयम् ।
गण्डयुग्मं च गोविन्दः कर्णयुग्मं च केशवः ॥ १४॥
गलं गदाधरः पातु स्कन्धं कृष्णः स्वयं प्रभुः ।
वक्षस्थलं वासुदेवश्चोदरं चापि सोऽच्युतः ॥ १५॥
नभिं पातु पद्मनाभः कङ्कालं कंससूदनः ।
पुरुषोत्तमः पातु पृष्ठं नित्यानन्दो नितम्बकम् १६॥
पुण्डरीकः पादयुग्मं हस्तयुग्मं हरिः स्वयम् ।
नासां च नखरं पातु नरसिंहः स्वयं प्रभुः ॥ १७॥
सर्वेश्वरश्च सर्वाङ्गं सन्ततं मधुसूदनः ।
प्राच्यां पातु च रामश्च वह्नौ च वंशीधरः स्वयम् ॥ १८॥
पातु दामोदरो दक्षे नैर्ऋते च नरोत्त्मः ।
पश्चिमे पुण्डरीकाक्षो वायव्यां वामनः स्वयम् ॥ १९॥
अनन्तश्चोत्तरे पातु ऐशान्यामीश्वरः स्वयम् ।
जले स्थले चान्तरीक्षे स्वप्ने जागरणे तथा ॥ २०॥
पातु वृन्दावनेशश्च मां भक्तं शरणागतम् ।
इति ते कथितं वत्स कवचं परमाद्भुतम् ॥ २१॥
सुखदं मोक्षदं सारं सर्वसिद्धिप्रदं सताम् ।
इदं कवचमिष्टं च पूजाकाले च यः पठेत् ॥ २२॥
हरिदास्यमवाप्नोति गोलोके वासमुत्तमम् ।
इहैव हरिभक्तिं च जीवन्मुक्तो भवेन् नरः ॥ २३॥

नारद उवाच
नारायणर्षिणा दत्तं कवचं यत् सुदुर्लभम् ।
सुभद्राय ब्राह्मणाय तन् मे वक्तुमिहार्हसि ॥ २४॥

ब्रह्मोवाच
मदिष्टदेव्याः कवचं कथं तत् कथयामि ते ।
मत्कण्ठे पश्य कवचं सद्रत्नगुटिकान्वितम् ॥ २५॥
नारायणर्षिणा दत्तं कवचं गुटिकान्वितम् ।
तथापीदं न कथितं निषिद्धं हरिणा स्मृतम् ॥ २६॥


From http://sanskritdocuments.org

तस्यर्षेश्चेष्टदेव्याश्च नोक्तं तेनेदमीप्सितम् ।
मह्यं न दत्ता गुटिका बान्धवैर्भर्त्सितेन च ॥ २७॥
आत्मनः कवचं मन्त्रं स्वयं दातुं न चार्हति ।
प्राणा नष्टाश्च दानेन चेति वेदविदो विदुः ॥ २८॥
शङ्करं गच्छ भगवन् जन्मान्तरगुरुं तव ।
स एव तुभ्यं कवचं दास्यस्येव न संशयः ॥ २९॥
त्वत्प्राक्तनेन विप्रेन्द्र सत्वरेण शुभेन च ।
ध्रुवं प्राप्स्यसि त्वं वत्स कवचं तत् सुदुर्लभम् ॥ ३०॥
कुमार गच्छ वैकुण्ठं स्वगुरुं  पश्य सत्वरम् ।
नारायणश्च कवचं तुभ्यं दास्यसि निश्चितम् ॥ ३१॥
सनत्कुमारो भगवान् गत्वा वैकुण्ठमीप्सितम् ।
संप्राप्य कवचं वत्स कवचं तत् सुदुर्लभम् ॥ ३२॥

आज्ञया ब्रह्मणश्चापि नारदो गन्तुमुद्यतः ।
ब्रह्मा ययौ ब्रह्मलोकं जन्ममृत्युजरापहम् ॥ ३३॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे पञ्चमोऽध्यायः

---

प्रथमैकरात्रे षष्ठोऽध्यायः

श्रीशुक उवाच
सनत्कुमारो वैकुण्ठं ब्रह्मलोकं च ब्रह्मणि ?व्हत्?।
गते ब्रह्मन् किं चकार भगवान् नारदो मुनिः ॥ १॥

व्यासो उवाच
मुनिस्तयोश्च गतयोः स रुरोद सरित्तटे ।
इतस्ततश्च बभ्राम मद्वियोगशुचास्पद ॥ २॥
स्वमानसे समालोक्य मुनिश्रेष्ठः स उन्मनाः ।
ध्यायमानो हरिपदं शिवं द्रष्टुं समुत्सुकः ॥ ३॥
प्रणम्य पितरं भक्त्या कुमारं भ्रातरं तथा ।
जगाम तपसस्थानात् कैलासाभिमुखे मुनिः ॥ ४॥
स्नात्वा च कृतमालायां संपूज्य परमेश्वरम् ।
भुक्त्वा फलं जलं पीत्वा प्रययौ गन्धमादनम् ॥ ५॥
ददर्श ब्राह्मणं तत्र वटमूले मनोहरे ।


From http://sanskritdocuments.org

कटमस्तम् ध्यायमानं श्रीकृष्णचरणाम्बुजम् ॥ ६॥
दीर्गं नग्नं गौराङ्गं दीर्घलोमभिरावृतम् ।
निमीलिताक्षं सानन्दं सानन्दाश्रुसमन्वितम् ॥ ७॥
पाद्मे पद्मेशशेषादिसुरपूजितवन्दिते ।
श्रीपादपद्मे शोभाढ्ये शश्वत्संन्यस्तमानसम् ॥ ८॥
बाह्यज्ञानपरित्यक्तं योगज्ञानविशारदम् ।
शिवस्य शिष्यं सद्भक्तं योगीन्द्राणां गुरोर्गुरोः ॥ ९॥
हृत्पद्मे पद्मनाभं च परमात्मानमीश्वरम् ।
प्रदीपकलिकाकारं ब्रह्मज्योतिःसनातनम् ॥ १०॥
साक्षिस्वरूपं परमं भगवन्तमधोक्षजम् ।
पश्यन्तं सस्मितं कृष्णं पुलकाङ्कितविग्रहम् ॥ ११॥
सद्भावोद्रिक्तचित्तं च सद्भावं पुरुषोत्तमे ।
दृष्ट्वा महर्षिप्रवरं देवर्षिविस्मयम् ययौ ॥ १२॥
इतस्ततश्च बभ्राम ददर्श स्वाश्रमं मुनेः ।
अतीव सुरहःस्थानं रम्यं रम्यं नवं नवम् ॥ १३॥
सुस्निग्धं सुन्दरं शुद्धं परं स्वच्छं सरोवरम् ।
श्वेतरक्तोत्पलदलैः कमलैः कमनीयकम् ॥ १४॥
गुञ्जदिन्दिन्दवरैर्?व्हत्? मकरन्दोदरैस्तथा ।
व्याकुलैः संकुलैः शश्वद्राजितैश्च विराजितम् ॥ १५॥
वन्यैर्वृक्षैर्बहुविधैः फलशाखासुशोभितैः ।
करञ्जकैश्च करजैर्बिम्बैः शाखोटिकैस्तथा ॥ १६॥
तिन्तिडीभिः कपित्थैश्च वटशिंशपाचन्दनैः ।
मन्दारैः सिन्धुवारैश्च ताडिपत्रैः सुशोभनैः ॥ १७॥
गुवाकैर्नारिकेतैश्च खर्जुरैः पनसैस्तथा ।
तालैः शालैः पियालैश्च हिन्तालैर्वकुलैरपि ॥ १८॥
आम्रैराम्रातकैश्चैव जम्बीरैर्दाडिमैस्तथा ।
श्रीफलैर्वदरीभिश्च जम्बुभिर्नागरङ्गकैः ॥ १९॥
सुपक्वफलशोभाढ्यैः सुस्निग्धैः सुमनोहरैः ।
तरुणैस्तरुराजैस्च नानाजातिभिरीप्सितम् ॥ २०॥
मल्लिकामालतीकुन्दकेतकीकुसुमैः शुभैः ।
माधवीनां लताजालैश्चर्चितं चारुचम्पकैः ॥ २१॥
कदम्बानां कदम्बैश्च स्वच्छैः श्वेतैश्च पुष्पितैः ।
नागेश्वराणां वृन्दैश्च दीप्तं मन्दारकैर्वरैः ॥ २२॥
हंसकारण्डवकुलैः पुंस्कोकिलकुलैस्तथा ।
सन्ततं कूजितं शुद्धं सुव्यक्तं सुमनोहरम् ॥ २३॥
शार्दूलैः शरभैः सिंहैर्गण्डकैर्महिषैः परम् ।


From http://sanskritdocuments.org

मनोहरैः कृष्णसारैश्चमरभिर्भावभूषितम् ॥ २४॥
महामुनिप्रभावेन हिंसादोषविवर्जितम् ।
दस्युचौरहिंस्रजन्तुभयशोकविवर्जितम् ॥ २५॥
सुपुण्यदं तीर्थवरं भारते सुप्रशंसितम् ।
सिद्धस्थलं सिद्धिदं तं मन्त्रसिद्धिकरं परम् ॥ २६॥
दृष्ट्वाश्रमं मुनिश्रेष्ठो जगाम मुनिसंसदि ।
आसने च समासीनं ध्यानहीनं ददर्श तम् ॥ २७॥
समुत्तस्थौ स वेगेन दृष्ट्वा देवर्षिपुङ्गवम् ।
दत्वामलं फलं मूलं संभाषां स चकार ह ॥ २८॥
प्रश्नं चकार स मुनिर्वीणापाणिं नारदम् ।
सस्मितः सस्मितं शुद्धं शुद्धवंशसमुद्भवम् ॥ २९॥
सद्भाग्योपस्थितं दीप्तं ज्वलन्तं ब्रह्मतेजसा ।
अतिथिं ब्राह्मणवरं ब्रह्मपुत्रं च पूजितम् ॥ ३०॥

मुनिरुवाच
किं नाम भवतो विप्र क्व यासीति क्व चागतः ।
क्व ते पिता स को वापि क्व वासः कुत्र संभवः ॥ ३१॥
मां वा ममाश्रमं वापि पूतं कर्तुमिहागतः ।
मूर्तिमद्ब्रह्मतेजो हि मम भाग्याद् उपस्थितः ॥ ३२॥

अथ वैष्णवदर्शनफलम्

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन वैष्णवो दर्शनेन च ॥ ३३॥
सद्यः पूतानि तीर्थानि सद्यः पूता ससागरा ।
सशैलकाननद्वीपा पादस्पर्शाद् वसुन्धरा ॥ ३४॥
धन्योऽहं कृतकृत्योऽहं सफलं मम जीवनम् ।
सहसोपस्थितो गेहे ब्राह्मणो वैष्णवोऽतिथिः ॥ ३५॥
पूजितो वैष्णवो येन विश्वं च तेन पूजितम् ।
आश्रमं वस्तुसहितं सर्वं तुभ्यं निवेदितम् ॥ ३६॥
फलानि च सुपक्वानि भुङ्क्ष्व भोगानि साम्प्रतम् ।
सुवासितम् पिब स्वादु शीतलं निर्मलं जलम् ॥ ३७॥
दुग्धं च सुरभीदत्तं रम्यं मधुरितं मधु ।
परिपक्वं फलरसं पिब स्वादु मुहुर्मुहुः ॥ ३८॥
सुखबीज्ये सुतल्पे च शयनं कुरु सुन्दरे ।
सुशीतवातसौगन्ध्यपूतेन सुरभीकृते ॥ ३९॥


From http://sanskritdocuments.org

अथातिथिपूजनफलम्

अतिथिर्यस्य पुष्टो हि तस्य पुष्टो हरिः स्वयम् ।
हरौ तुष्टे गुरुस्तुष्टो गुरौ तुष्टे जगत्त्रयम् ॥ ४०॥
अधिष्ठातातिथिर्गेहे सन्ततं सर्वदेवताः ।
तीर्थान्येतानि सर्वाणि पुण्यानि च व्रतानि च ॥ ४१॥
तपांसि यज्ञाः सत्यं च शीलं धर्मः सुकर्म च ।
अपूजितैरतिथिभिर्सार्धं सर्वे प्रयान्ति ते ॥ ४२॥

अथातिथिविमुखे दोषाः
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
पितरस्तस्य देवाश्च पुण्यं धर्मव्रताशनाः ॥ ४३॥
यमः प्रतिष्ठा लक्ष्मीश्चाभीष्टदेवो गुरुस्तथा ।
निराशाः प्रतिगच्छन्ति त्यक्त्वा पापं च पूरुषम् ॥ ४४॥
स्त्रीघ्नैश्चैव कृतघ्नैश्च ब्रह्मघ्नैर्गुरुतल्पगैः ।
विश्वासघातिभिर्दुष्टैर्मित्रद्रोहिभिरेव च ॥ ४५॥
सत्यघ्नैश्च कृतघ्नैश्च पापिभिः स्थापिभिस्तथा ।
दानापहारिभिश्चैव कन्याविक्रियिभिस्तथा ॥ ४६॥
सीमापहारिभिश्चैव मिथ्यासाक्षिप्रदातृभिः ।
ब्रह्मस्वहारिभिश्चैव तथा स्थाप्यस्वहारिभिः ॥ ४७॥
वृषवाहैर्देवलैश्च तथैव ग्रामयाजिभिः ।
शूद्रान्नभोजिभिश्चैव शूद्रश्राद्धाहभोजिभिः ॥ ४८॥
श्रीकृष्णविमुखैर्विप्रैर्हिंस्रैर्नरविघातिभिः ।
गुरावभक्तै रोगार्तैः शश्वन्मिथ्याप्रवादिभिः ॥ ४९॥
विप्रस्त्रीगामिभिः शूद्रैर्मातृगामिभिरेव च ।
अश्वत्थघातिभिश्चैव पत्नीभिः पतिघातिभिः ॥ ५०॥
पितृमातृघातिभिश्च शरणागतघातिभिः ।
ब्राह्मणक्षत्रविट्शूद्रैः शिलास्वर्णापहारिभिः ॥ ५१॥
तुल्यो भवति विप्रेन्द्रातिथिरेव त्वनर्चितः ।

इत्य एवमुक्त्वा मुनिः पूजयामास नारदम् ।
मिष्टं च भोजयामास शाययामास भक्तितः ॥ ५२॥

श्रीनारद उवाच
नारदोऽहं मुनिश्रेष्ठ ब्राह्मणो ब्रह्मणः सुतः ।


From http://sanskritdocuments.org

तपःस्थलाद् आगतोऽहं यामि कैलासमीप्सितम् ॥ ५३॥
आत्मानं पावनं कर्तुं त्वां च द्रष्टुमिहागतः ।
पुनन्ति प्राणिनः सर्वे विष्णुभक्तप्रदर्शनात् ॥ ५४॥
को भवान् ध्यानपूतश्च नग्नश्च कटमस्तकः ।
किं ध्यायसे महाभाग श्रेष्ठदेवश्च को गुरुह् ॥ ५५॥

मुनिरुवाच
जीवमुक्तो भवान् एव पुनासि भुवनत्रयम् ।
यस्य तत्र कुले जन्म तस्य तत्तद्वचोमनः ॥ ५६॥
पुत्रे यशसि तोये च कवित्वेन च विद्यया ।
प्रतिष्ठायां च ज्ञायेत सर्वेषां मानसं नृणाम् ॥ ५७॥
विधाता जगतां ब्रह्मा ब्रह्मैकतानमानसः ।
तत्पुत्रोऽसि महाख्यातो देवर्षिप्रवरो महान् ॥ ५८॥
लोमशोऽ हं महाभाग जगत्पावनपावन ।
नग्नोऽल्पायुर्विवेकी च वाससा किं प्रयोजनम् ॥ ५९॥
वृक्षमूले निवासे मे छत्रेण किं गृहेण च ।
रौद्रवृष्टिवारणार्थं सांप्रतं कटमस्तकः ॥ ६०॥
जलबुद्बुदविद्युद्वत्त्रैलोक्यं कृत्रिमं द्विज ।
ब्रह्मादितृणपर्यन्तं सर्वं मिथ्याइव स्वप्नवत् ॥ ६१॥
किं कलत्रेण पुत्रेण धनेन संपदा श्रिया ।
किं वित्तेन च रूपेण जीवनाल्पायुषा मुने ॥ ६२॥
इन्द्रस्य पतनेनैव लोमकोत्पाटनं मम ।
मनोश्च पतनं तत्र मायया किं प्रयोजनम् ॥ ६३॥
सर्वलोमकोत्पाटनेन केशौघोत्पाटनेन च ।
अल्पायुषो मम मुने मरणं निश्चितं भवेत् ॥ ६४॥
ध्याये श्रीपादपद्मं तत्पाद्मपद्मेशवन्दितम् ।
परस्य प्रकृतेस्तस्य कृष्णस्य परमात्मनः ॥ ६५॥
तस्य मेऽभीष्टदेवस्य सर्वेषां कारणस्य च ।
गुरुर्मे जगतां नाथो योगीन्द्राणां गुरुः शिवः ॥ ६६॥
मत्कण्ठे कवचं यस्य मद्गुरुः कथयिष्यति ।
गुरोर्निषेधो यत्रास्ते तद् वक्तुं कः क्षमो भुवि ॥ ६७॥
गुरोश्च वचनं यो हि पालनं न करोति च ।
गुरूक्तमुक्त्वा पापी स ब्रह्महत्यां लभेद् ध्रुवम् ॥ ६८॥
स्वगुरुं शिवरूपं च तद्भिन्नं मन्यते हि यः ।
ब्रह्महत्यां लभेत् सोऽपि विघ्नस्तस्य पदे पदे ॥ ६९॥
अकर्तव्यं तु कर्तव्यं पालनीयं गुरोर्वचः ।


From http://sanskritdocuments.org

अपालने सर्वविघ्नं लभते नात्र संशयः ॥ ७०॥
आशिषा पादरजसा चोच्छिष्टालिङ्गेन च ।
मुच्यते सर्वपापेभ्यो जीवन्मुक्तो भवेन् नरः ॥ ७१॥
स्वगुरुं शङ्करं पश्य गच्छ कैलासमीप्सितम् ।
मुच्यते विघ्नपापेभ्यो गुरोश्चरणदर्शनात् ॥ ७२॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
लोमशनारदसंवादे षष्ठोऽध्यायः

---

प्रथमैकरात्रे सप्तमोऽध्यायः

संभाष्य लोमशं तस्माज्जगाम नारदो मुनिः ।
पुष्पभद्रानदीतीरमतीव सुमनोहरम् ॥ १॥
यत्रास्ते शृङ्गकूटश्च शुद्धस्फटिकसन्निभिः ।
नानावृक्षसमायुक्तैस्त्रिभिरन्यैः सरोवरैः ॥ २॥
हंसकारण्डवाकीर्णैर्भ्रमरैर्ध्वनिसुन्दरैः ।
पुंस्कोकिलनिनादैश्च सन्ततं सुमनोहरैः ॥ ३॥
शैत्यसौगन्ध्यमान्ध्यैश्च वायुभिः सुरभीकृतैः ।
समाधियुक्तो यत्रास्ते मार्कण्डेयो महामुनिः ॥ ४॥
स मुनिर्नारदं दृष्ट्वा भक्त्या च प्रणनाम च ।
पप्रच्छ कुशलं शान्तं शान्तः सत्त्वगुणाश्रयः ॥ ५॥

मार्कण्डेयो उवाच
अद्य मे सफलं जन्म जीवनं चातिसार्थकम् ।
ममाश्रमे पुण्यराशिर्ब्रह्मपुत्रश्च नारदः ॥ ६॥
अहो देवर्षिप्रवरो दीप्तमान् ब्रह्मतेजसा ।
क्व यासि कुत आयासि किं ते मनसि वर्तते ॥ ७॥
मानसं प्राणिनामेव सर्वकर्मैककारणम् ।
मनोनुरूपं वाक्यं च वाक्येन प्रस्फुटं मनः ॥ ८॥

मुनेश्च वचनं श्रुत्वा वीणापाणि स्वमीप्सितम् ।
उवाच सस्मितं शान्तं वचः सत्यं सुधोपमम् ॥ ९॥

नारद उवाच


From http://sanskritdocuments.org

हे बन्धो यामि कैलासं ज्ञानार्थं ज्ञानिनां वरम् ।
द्रष्टुं महादेवं च प्रणामं कर्तुमीश्वरम् ॥ १० ॥

पूजां गृहीत्वा चेत्युक्त्वा प्रययौ नारदो मुनिः ।
मार्कण्डेयश्च शोकार्तः सद्विच्छेदः सुदारुणः ॥ ११ ॥
हिमालयं च दुर्लघ्यं विलघ्यं चैव लीलया ।
स्वर्गमन्दाकिनीतीरं कैलासं प्रययौ मुनिः ॥ १२ ॥
ददर्श वटवृक्षं च योजनायतमुच्छ्रितम् ।
शोभितं शतकैः स्कन्धैः रक्तपक्वफलान्वितैः ॥ १३ ॥
सुस्निग्धैः सुन्दरैः रम्यै रम्यपक्षीन्द्रसंकुलैः ।
सिद्धेन्द्रैश्च मुनीन्द्रैश् योगीन्द्रैः परिशोभितम् ॥ १४ ॥
प्रणतांस्तांश्च संभाष्य पार्वतीकाननं ययौ ।
सुन्दरं वर्तुलाकारं चतुर्योजनमीप्सितम् ॥ १५ ॥
शोभितं सुन्दरै रम्यैः सप्तभिश्च सरोवरैः ।
शश्वन्मधुकरासक्तपद्मराजिविराजितैः ॥ १६ ॥
नीलरक्तोत्पलदलपटलैः परिशोभितैः ।
पुष्पोद्यानैश्च शतकैः पुष्पितैः सुमनोहरैः ॥ १७ ॥
मल्लिकामालतीकुन्दयूथिकामाधवीलता ।
केतकीचम्पकाशोकमन्दारकविराजिका ॥ १८ ॥
नागपुन्नागकुटजपाटलाझिण्टिझज्झिका ।
विष्णुक्रान्ता च तुलसी शोफली सप्तला तथा ॥ १९ ॥
एतेषां च समूहैश्च पुष्पवल्लीविराजितैः ।
आम्रैराम्रातकैस्तालनारिकेलैः पियालकैः ॥ २० ॥
खर्जूरैश्च गुवाकैश्च पलासैर्जम्बुभिस्तथा ।
दाडिम्बैश्चापि जम्बीरैर्निम्बैश्चैव वटैस्तथा ॥ २१ ॥
करञ्जैर्वदरीभिश्च परितः श्रीफलोज्ज्वलैः ।
कदम्बानां कदम्बैश्च तिन्तिण्डीनां कदम्बकैः ॥ २२ ॥
अश्वत्थैः सरलैः शालैः शाल्मलीनां समूहकैः ।
वटशाखोटकैः कुन्दैः शंगुभिः सप्तपर्णकैः ॥ २३ ॥
पिच्छिलैः पर्णशालैश्च गम्भारिभिश्च वल्गुकैः ।
हिङ्गुलैरञ्जनैर्वल्कैर्भूर्जपत्रैः सपत्रकैः ॥ २४ ॥
अन्यैश्च दुर्लभैर्वन्यैः पुष्पपत्रैर्विराजितम् ।
कल्पवृक्षैः पारिजातैश्चारुचन्दनपल्लवैः ॥ २५ ॥
सुस्निग्धस्थलपद्मैश्च चित्रितैर्भूमिचम्पकैः ।
अन्यैश्च दुर्लभैर्वन्यैः पुष्पपत्रैर्विभूषितम् ॥ २६ ॥
सिंहेन्द्रैः शरभेन्द्रैश्च गजेन्द्रैर्गण्डकेन्द्रैः ।


From http://sanskritdocuments.org

शार्दूलेन्द्रैश्च महिषैरश्वैश्च वन्यशूकरैः ॥ २७॥
शल्लकैर्बल्लकैर्मर्कैः कूटैश्च शशकैः शकैः ।
कृष्णसारैश्च हरिणैश्चमरीचामरोज्ज्वलम् ॥ २८॥
पुंस्कोकोलकुलानां च गानैश्च विराजितम् ।
मत्तानां पल्लवस्थानां माधवेषु मनोहरम् ॥ २९॥
शुकानां राजहंसानां मयूराणां च पुत्रकैः ।
क्षेमकरीखञ्जनानां राजिभिश्च मनोहरम् ॥ ३०॥
हरित्पीतरक्तकृष्णसुपक्वफलपत्रकैः ।
सुस्निग्धाक्षतपत्रैश्च नूतनैरभिभूषितम् ॥ ३१॥
हिंसाभयादिरहितं सर्वेषां पशुपक्षिणाम् ।
परस्परं च सुप्रीतं हिंस्राणां क्षुद्रजन्तुभिः ॥ ३२॥
तत्र क्रीडास्थलं रम्यं पार्वतीपरमेशयोः ।
मुनीन्द्रैरिन्द्रनीलैश्च पद्मरागैः परिष्कृतम् ॥ ३३॥
क्रोशायतं परिमितं वर्तुलं चन्द्रविम्बवत् ।
अम्लानरम्भास्तम्भानां लक्षलक्षैश्च वेष्टितम् ॥ ३४॥
चित्रितं सूक्ष्मसूत्राक्तैर्नूतनैरभिभूषितम् ।
नूतनाक्षतपत्रैश्च ललितैः परिशोभितम् ॥ ३५॥
रक्तपीतासितैः स्निग्धैरम्लानैः सुमनोहरैः ।
परितः परितः शश्वन् मालाजालैर्विभूषितम् ॥ ३६॥
शय्याभूतं सुतल्पैश्च स्निग्धचम्पकचन्दनैः ।
पुष्पचन्दनयुक्तेन वायुना सुरभीकृतम् ॥ ३७॥
कस्तूरीकुङ्कमासक्तसुगन्धिचन्दनैः सितैः ।
मार्जितं चित्रितं चित्रैः परितो रङ्गवस्तुभिः ॥ ३८॥
दृष्ट्वा तद् अद्भुतं शीघ्रं प्रययौ स्वर्णदीं मुनिः ।
शुद्धस्फटिकसंकाशां सर्वपापविनाशिनीम् ॥ ३९॥
भवाब्धिघोरतरणे तरणीं नित्यनूतनाम् ।
कृष्णपादप्रसूतां च जगत्पूज्यां पतिव्रताम् ॥ ४०॥
स्नात्वा कृष्णं च संपूज्य परमात्मानमीश्वरम् ।
प्रकृतेः परिमिष्टं च निर्लिप्तं निर्गुणं परम् ॥ ४१॥
साक्षिणं कर्मणामेव ब्रह्म ज्योतिः सनातनम् ।
प्रययौ पुरतो रम्यं राजमार्गं ददर्श सः ॥ ४२॥
मणिभिः स्फटिकाकारैरमलैर्बहुमूल्यकैः ।
परिष्कृतं च सर्वत्र निर्मितं विश्वकर्मणा ॥ ४३॥
सतां पुण्यवतां दृष्टमदृष्टं कृतपापिनाम् ।
धनुः शतं परिमितं चित्रराजिविराजितम् ॥ ४४॥
दध्यं सर्वाश्रमान्तं च प्रख्यात् कोटिगुणोत्तरम् ।



From http://sanskritdocuments.org

रथं ददर्श पुरतो मनोयायि मनोहरम् ॥ ४५॥
अमूल्यरत्ननिर्माणविमाणसारसुन्दरम् ।
धनुर्लक्षं परिमितं परितो वर्तुलाकृतम् ॥ ४६॥
ऊर्ध्वस्थितमूर्ध्वगं च सहस्रचक्रसंयुतम् ।
धनुर्लक्षोऽपि सूतं च वह्निशुद्धांशुकान्वितम् ॥ ४७॥
हीरासारविनिर्माणं सुचारुकलशोज्ज्वलम् ।
रत्नप्रदीपदीप्ताढ्यं रत्नदर्पणभूषितम् ॥ ४८॥
मुक्ताशुक्तिनिबद्धैश्च शोभितं श्वेतचामरैः ।
माणिक्यसारहारेण मणिराजैर्विराजितम् ॥ ४९॥
पारिजाटप्रसूतानां मायाजालैः परिष्कृतम् ।
ग्रीष्ममध्याह्नमार्तण्डं सहस्रसदृशोज्ज्वलम् ॥ ५०॥
ईश्वरेच्छाविनिर्माणं कामपुरं च कामिनाम् ।
सर्वभोगसमाविष्टं कल्पवृक्षपरं वरम् ॥ ५१॥
ससक्तचित्रितै रम्यै रतिमन्दिरसुन्दरैः ।
गोलोकाद् आगतं पूर्वं क्रीडार्थं शङ्करस्य च ॥ ५२॥
विवाहे परिनिष्पन्ने पार्वतीपरमेशयोः ।
रथं दृष्ट्वा च प्रययौ कियद् दूरं महामुनिः ॥ ५३॥
अतीव रम्यं रुचिरं ददर्श  शङ्कराश्रमम् ।
रत्नेन्द्रसारनिर्माणं शिविरैः शतकोटिभिः ॥ ५४॥
मितैस्तस्मात् शतगुणैस्तत्र सुन्दरमन्दिरैः ।
युक्तं रत्नकपाटैश्च रत्नधातुविचित्रितैः ॥ ५५॥
परमस्तम्भसोपानैर्वज्रमिश्रैर्विभूषितम् ।
ददर्श शिविरं शम्भोः परिखाभिस्त्रिभिर्युतम् ॥ ५६॥
दुर्लघ्याभिरामित्राणां सुगम्याभिः सतामहो ।
प्रकारैश्च त्रिभिर्युक्तं धनुर्लक्षोच्छ्रितं सुत ॥ ५७॥
सम्मितं सप्तभिर्द्वारैर्नानारक्षकरक्षितैः ।
धनुःशतसहस्रं च चतुरस्रं च सम्मितम् ॥ ५८॥
अमूल्यरत्ननिर्माणं चतुःशालाशतैर्युतम् ।
अतीव रम्यं पुरतो पुरद्वारं ददर्श सः ॥ ५९॥
पुरतो रत्नभित्तौ च कृत्रिमं च सुशोभितम् ।
पुण्यं वृन्दावनं रम्यं तन्मध्ये रासमण्डलम् ॥ ६०॥
सर्वत्र राधाकृष्णं च प्रत्येकं रतिमन्दिरे ।
रम्यं कुञ्जकुटीराणां सहस्रं सुमनोहरम् ॥ ६१॥
सुगन्धि पुष्पशय्यानां सहस्रं चन्दनोक्षितम् ।
द्वारपालं च तत्रैव मणिभद्रं भयंकरम् ॥ ६२॥
त्रिशूलपट्टिशधरं व्याघ्रचर्माम्बरं परम् ।


From http://sanskritdocuments.org

तं संभाष्य विलोक्यैवं द्वितीयद्वारमीप्सितम् ॥ ६३॥
जगाम च मुनिश्रेष्ठो ददर्श चित्रमुत्तमम् ।
कदम्बानां समूहं च तन्मूलं च मनोहरम् ॥ ६४॥
रत्नभित्तिसमायुक्तं कालिन्दीकूलमुत्तमम् ।
स्नातं गोपीसमूहं च नग्नसर्वाङ्गमद्भुतम् ॥ ६५॥
कदम्बाग्रे च श्रीकृष्णं वस्त्रपुञ्जकरं परम् ।
तत्रैव शूलहस्तं च महाकालं ददर्श च ॥ ६६॥
कृपालुं द्वारपालं तं संभाष्य नारदो मुनिः ।
प्रययौ शीघ्रगामी स तृतीयद्वारमुत्तमम् ॥ ६७॥
ददर्श तत्र पुरतः कृत्रिमं वटमूलकम् ।
गोपानां च समूहं च पीतम्बरधरं परम् ॥ ६८॥
बालक्रीडां च कुर्वन्तं तन्मध्ये कृष्णम्  उत्तमम् ।
ब्राह्मणीभिः प्रदत्तम् च भुक्तवन्तं सुपायसम् ॥ ६९॥
कुर्वन्तं च समाधानं मुनेः वामकरेण च ।
गृहीत्वा तदनुज्ञां च चतुर्थं द्वारमीप्सितम् ॥ ७०॥
प्रययौ ब्रह्मपुत्रश्च ददर्श चित्रमुत्तमम् ।
गोवर्धनं पर्वतं च तत्र कृष्णकरस्थितम् ॥ ७१॥
गोकुलं गोकुलस्थानां गोपीनां चैव रक्षणम् ।
व्याकुलं गोकुलं भीतं शक्रवृष्टिभयेन च ॥ ७२॥
अभयं दत्तवन्तं च कृष्णं दक्षकरेण च ।
नन्दिनं द्वारपालं च शूलहस्तं च सस्मितम् ॥ ७३॥
विलोक्य प्रययौ विप्रः पञ्चमं द्वाऋअमुत्तमम् ।
नानाकृतिमचित्राढ्यं वीरभद्रान्वितं परम् ॥ ७४॥
तत्रैव नीपमूलं च यमुनाकुलमेव च ।
कालीयदमनं तत्र कृतिमं च ददर्श :अ ॥ ७५॥
तद् दृष्ट्वा सस्मितस्तुष्टः षष्टद्वाऋअं जगाम सः ।
द्वारे नियुक्तं बालं च शूलहस्तं चतुर्भुजम् ॥ ७६॥
रत्नसिंहासनस्थं च सस्मितं स्वगणाधिपम् ।
ददर्श चित्रं तत्रैव मथुरागमनं हरेः ॥ ७७॥
गोपिकानां विलापं च यशोदानन्दयोस्तथा ।
व्याकुलं गोकुलं चापि रथस्थं शरणं हरिम् ॥ ७८॥।
अक्रूरं च तथा नन्दं निरानन्दं शुचाकुलम् ।
तद् दृष्ट्वा सप्तमद्वारं द्वारपालं ददर्श सः ॥ ७९॥
चित्रं कौतुकयुक्तं च मथुरायाः प्रवेशनम् ।
सबलं गोपसहितं श्रीकृष्णं प्रकृतेः परम् ॥ ८०॥
मथुरानागरीभिश्च बालकैर्वानिरर्गलैः ।



From http://sanskritdocuments.org

वीक्षन्तं सादरं सर्वैर्नगरस्थैर्मनोहरम् ॥ ८१॥
धनुर्भङ्गं तथा शंभोः कंसादिनिधनादिकम् ।
सभार्यं वसुदेवं च निगडान् मुक्तमीप्सितम् ॥ ८२॥
द्वारे नियुक्तं देवेशं गणेशं गणसंयुतम् ।
ध्यानस्थं च विभान्तं च शुद्धस्फटिकमालया ॥ ८३॥
जपन्तं परमं शुद्धं ब्रह्मज्योतिः सनातनम् ।
निर्लिप्तं निर्गुणं कृष्णं परमं प्रकृतेः परम् ॥ ८४॥
दृष्ट्वा तं च सुरश्रेष्ठं मुनिश्रेष्ठोऽपि नारदः ।
सामवेदोक्तस्तोत्रेण पुष्टाव परमेश्वरम् ।
साश्रुनेत्रः पुलकितो भक्तिनम्रात्मकंधरः ॥ ८५॥

अथ गणपतिस्तोत्रम्

भो गणेश सुरश्रेष्ठ लम्बोदर परात् पर ।
हेरम्ब मङ्गलारम्भ गजवक्त्र त्रिलोचन ॥ ८६॥
मुक्तिद शुभद श्रीद श्रीधरस्मरणे रत ।
परमानन्द परम पार्वतीनन्दन स्वयम् ॥ ८७॥
सर्वत्र पूज्य सर्वेश जगत्पूज्य महामते ।
जगद्गुरो जगन्नाथ जगदीश नमोऽस्तु ते॥ ८८॥
यत्पूजा सर्वपरतो यः स्तुतः सर्वयोगिभिः ।
यः पूजितः सुरेन्द्रैश्च मुनीन्द्रैस्तं नमाम्यहम् ॥ ८९॥
परमाराधनेनैव कृष्णस्य परमात्मनः ।
पुण्यकेन व्रतेनैव यं प्राप पार्वती सती ॥ ९०॥
तं नमामि सुरश्रेष्ठं सर्वश्रेष्ठं गरिष्ठकम् ।
ज्ञानिश्रेष्ठं वरिष्ठं च तं नमामि गणेश्वरम् ॥ ९१॥

इत्येवमुक्त्वा देवर्षिस्तत्रैवान्तर्दधे विभुः ।
नारदः प्रययौ शीघ्रमीश्वराभ्यन्तरं मुदा ॥ ९२॥
इदं लम्बोदरस्तोत्रं नारदेन कृतं पुरा ।
पूजाकाले पठेन् नित्यं जयस्तस्य पदे पदे ॥ ९३॥
संकल्पितं पठेद् यो हि वर्षमेकं सुसंयतः ।
विशिष्टपुत्रं लभते परं कृष्णपरायणम् ॥ ९४॥
यशस्विनं च विद्वांसं धनिनं चिरजीविनम् ।
विघ्ननाशो भवेत् तस्य महैश्वर्यं यशोऽमलम् ।
इहैव च सुखं भक्त्यान्ते याति हरेः पदम् ॥ ९५॥


From http://sanskritdocuments.org

इति  श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
गणपतिस्तोत्रं नाम सप्तमोऽध्यायः

---

प्रथमैकरात्रे अष्टमोऽध्यायः

श्रीव्यास उवाच
अथ चाभ्यन्तरं गत्वा नारदो हृष्टमानसः ।
ददर्श स्वाश्रमं रम्यमतीव सुमनोहरम् ॥ १॥
पयः फेननिभशय्यासहितं रत्नमन्दिरम् ।
साक्षाद् गोरोचनाभैश्च मणिस्तम्भैर्विभूषितम् ॥ २॥
मणीन्द्रसारसोपानैः कपाटैश्च परिष्कृतम् ।
मुक्तामाणिक्यहीराणां मालाराजिविराजितम् ॥ ३॥
शुद्धस्फटिकसंकाशं प्राङ्गणं मणिसंस्कृतम् ।
सुन्दरं मन्दिरचयं सद्रत्नकलशोज्ज्वलम् ॥ ४॥
रत्नपत्रपटाकीर्णं वह्निशुद्धांशुकान्वितम् ।
सुधानां च मधूनाम् च पूर्णकुम्भकं शतं शतम् ॥ ५॥
दासदासीसमूहैश्च रत्नालङ्कारभूषितैः ।
पार्वतीप्रियसङ्गैश्च स्वकर्माकुलसङ्कल्पम् ॥ ६॥
तद् दृष्ट्वा च मुनिश्रेष्ठस्तत् पराभ्यन्तरं ययौ ।
रत्नसिंहासनस्थं च शङ्करं च ददर्श सः ॥ ७॥
व्याघ्रचर्माम्बरधरं सस्मितं चन्द्रशेखरम् ।
प्रसन्नवदनं स्वच्छं शान्तं श्रीमन्तमीश्वरम् ॥ ८॥
विभूतिभूषिताङ्गं च परं गङ्गाजटाधरम् ।
भक्तप्रियं च भक्तेशं ज्वलन्तं ब्रह्मतेजसा ॥ ९॥
त्रिनेत्रं पञ्चवक्त्रं च कोटिचन्द्रसमप्रभम् ।
जपन्तं परमात्मानं ब्रह्म ज्योतिः सनातनम् ॥ १०॥
निर्लिप्तं च निरीहं च दातारं सर्वसम्पदाम् ।
स्वेच्छामयं सर्वबीजं श्रीकृष्णं प्रकृतेः परम् ॥ ११॥
सिद्धेन्द्रैश्च मुनीन्द्रैश्च देवेन्द्रैः परिसेवितम् ।
पार्श्वदप्रवरश्रेष्ठसेवितं श्वेतचामरैः ॥ १२॥
दुर्गासेवितपादाब्जं भद्रकालीपरिष्टुतम् ।
पुरतो हि वसन्तं तं स्कन्दं गणपतीम् तथा ॥ १३॥
गले बद्ध्वा च वसनं भक्तिनम्रात्मकंधरः ।
योगीन्द्रं स्वगुरुं शंभुं शिरसा प्रणनाम सः ॥ १४॥


From http://sanskritdocuments.org

तुष्टाव परया भक्त्या देवर्षिर्जगतां पतिम् ।
स्वगुरुं च पशुपतिं वेदोक्तेन स्तवेन च ॥ १५॥

श्रीनारद उवाच
नमस्तुभ्यं जगन्नाथ मम नाथ मम प्रभो ।
भवरूपतरोर्बीज फलरूप फलप्रद ॥ १६॥
अबीजज प्रज प्राज सर्वबीज नमोऽस्तु ते ।
सद्भाव परमाभाव विभाव भावनाश्रय ॥ १७॥
भवेश भवबन्धेश भावाब्धिनाविनायक ।
सर्वाधार निराधार साधार धरणीधर ॥ १८॥
वेदविद्याधाराधार गङ्गाधर नमोऽस्तु ते ।
जयेश विजयाधार जयबीज जयात्मक ॥ १९॥
जगदादे जयानन्द सर्वानन्द नमोऽस्तु ते।

इत्येवमुक्त्वा देवर्षिः शम्भोश्च पुरतः स्थितः ।
प्रसन्नवदनः श्रीमान् भगवांस्तमुवाच सः ॥ २०॥

श्रीमहादेव उवाच
वरं वृणु महाभाग यत् ते मनसि वर्तते ।
दास्यामि त्वां ध्रुवं पुत्र दाताहं सर्वसंपदाम् ॥ २१॥
सुखं मुक्तिं हरेर्भक्तिं निश्चलामविनाशिनीम् ।
हरेः पादं तद्दास्यं सालोक्यादिचतुष्टयम् ॥ २२॥
इन्द्रत्वममरत्वं वा यमत्वमनिलेश्वरम् ।
प्रजापतित्वं ब्रह्मत्वं सिद्धत्वं सिद्धसाधनम् ॥ २३॥
सिद्धैश्वर्यं सिद्धिबीजं वेदविद्याधिपं परम् ।
अणिमादिकसिद्धिं च मनोयायित्वमीप्सितम् ॥ २४॥
हरेः पदं च गमनं सशरीरेण लीलया ।
एतेषु वाञ्छितार्थेषु किं वा ते वाञ्छितं सुत ॥ २५॥
तन् मे ब्रूहि मुनिश्रेष्ठ सर्वं दातुमहं क्षमः ।

शङ्करस्य वचः श्रुत्वा तमुवाच महामुनिः ॥ २६॥

श्रीनारद उवाच
देहि मे हरिभक्तिं च तन्नामसेवने रुचिः ।
अतितृष्णा गुणाख्याने नित्यमस्तु ममेश्वर ॥ २७॥


From http://sanskritdocuments.org

नारदस्य वचः श्रुत्वा जहास शङ्करः स्वयम् ।
पार्वती भद्रकाली च कार्त्तिकेयो गणेश्वरः ॥ २८ ॥
सर्वं ददौ महादेवो नारदाय च धीमते ।
सर्वप्रदस्तु सर्वेशः सर्वकारणकारणः ॥ २९ ॥
नारदेन कृतं स्तोत्रं नित्यं यः प्रपठेत् शुचिः ।
हरिभक्तिर्भवेत् तस्य तन्नाम्नि गुणतो रुचिः ॥ ३० ॥
दशवारजपेनैव स्तोत्रसिद्धिर्भवेन् नृणाम् ।
सर्वसिद्धिर्भवेत् तस्य सिद्धस्तोत्रो भवेद् यदि ॥ ३१ ॥
इह प्राप्नोति लक्ष्मीं च निश्चलां लक्षपौरुषीम् ।
परिपूर्णमहैश्वर्यमन्ते याति हरेः पदम् ॥ ३२ ॥
पुत्रं विशिष्टं लभते हरिभक्तं जितेन्द्रियम् ।
सुसाध्यां सुविनीतां सुव्रतां च पतिव्रताम् ॥ ३३ ॥
प्रजां भूमिं यशः कीर्तिं विद्यां सकवितां लभेत् ।
प्रसूयते महाबन्ध्या वर्षमेकं शृणोति चेत् ॥ ३४ ॥
गलत्कुष्ठी महारोगी सद्यो रोगात् प्रमुच्यते ।
धनी महादरिद्रश्च कृपणः सत्यवान् भवेत् ।
विप्रद्ग्रस्तो राजबद्धो मुच्यते नात्र संशयः ॥ ३५ ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे अष्टमोऽध्यायः

---

प्रथमैकरात्रे नवमोऽध्यायः

श्रीव्यास उवाच
वरं दत्वा महादेवो भक्त्या तं ब्राह्मणातिथिम् ।
पूजां चकार वेदोक्तां स्वयं वेदविदां वरः ॥ १ ॥
भुक्त्वा पीत्वा मुनिश्रेष्ठो महादेवस्य मन्दिरे ।
तिष्ठन्न् उपासानां चक्रे पार्वतीपरमेशयोः ॥ २ ॥
एकदा चिरकालान्ते तमुवाच महामुनिम् ।
महादेवः सभामध्ये कृपया च कृपानिधिः ॥ ३ ॥

श्रीमहादेव उवाच
किं वा ते वाञ्छितं वत्स ब्रूहि मां यदि रोचते ।
वरो दत्तः किमपरं यत् ते मनसि वर्तते ॥ ४ ॥


From http://sanskritdocuments.org

महादेववचः श्रुत्वा तमुवाच महामुनिः ।
कैलासे च सभामध्ये यत् तन्मनसि वाञ्छितम् ॥ ५॥

श्रीनारद उवाच
ज्ञानमाध्यात्मिकं नाम वेदसारं मनोहरम् ।
हरिभक्तिप्रदं ज्ञानं मुक्तिदं ज्ञानमीप्सितम् ॥ ६॥
योगयुक्तं च यज्ज्ञानं ज्ञानं यत् सिद्धिदं तथा ।
संसारविषयज्ञानमेव पञ्चविधं स्मृतम् ॥ ७॥
आश्रमाणां समाचारं तेषां धर्मपरिष्कृतम् ।
विधवानां च भिक्षूणां यतीनां ब्रह्मचारिणाम् ॥ ८॥
पूजाविधानं कृष्णस्य तत्स्तोत्रं कवचं मनुम् ।
पुरश्चर्याविधानं च सर्वाह्निकमभीप्सितम् ॥ ९॥
जीवकर्मविपाकं च कर्ममूलनिकृन्तनम् ।
संसारवासनां कां वा लक्षणं प्रकृतीशयोः ॥ १०॥
तयोः परं वा किं वस्तु तस्यावतारवर्णमम् ।
को वा तदंशः कः पूर्णः परिपूर्णतमश्च कः ॥ ११॥
नारायणर्षिकवचं सुभद्रप्रवराय च ।
यद् दत्तं किं तद् देवेश तद् आराध्यं प्रयत्नतः ॥ १२॥
मया ज्ञानंमनापृष्टं यद् यद् अस्ति सुरोत्तम ।
तन् मे कथय तत्त्वेन मामेवानुग्रहं कुरु ॥ १३॥
गुरोश्च ज्ञानोद्गिरणाज्ज्ञानं स्यान् मन्त्रतन्त्रयोः ।
तत् तन्त्रं स च मन्त्रः स्याद् यतो भक्तिरधोक्षजे ॥ १४॥
ज्ञानं स्याद् विदुषां किंचिद् वेदव्याख्यानचिन्तया ।
स्वयं भवान् वेदकर्ता ज्ञानाधिष्ठातृदेवता ॥ १५॥

नारदस्य वचः श्रुत्वा सस्मितः पार्वतीपतिः ।
निरीक्ष्य पार्वतीवक्त्रं गजवक्त्रमुवाच सः ॥ १६॥

अथ नारदोपदेशग्रहणम्

श्रीमहादेव उवाच
अहो अनन्तदासानां माहात्म्यं परमाद्भुतम् ।
कुर्वन्त्यहैतुकीं भक्तिं ये च शश्वद् धरेः पदे ॥ १७॥
पद्मनाभपादपद्मं पद्मापद्मेश्वरार्चितम् ।
दिवानिशं ये ध्यायन्ते शेषादिसुरवन्दितम् ॥ १८॥
आलापं गात्रसंस्पर्शं पादरेणुमभीप्सितम् ।


From http://sanskritdocuments.org

वाञ्छन्त्येव हि तीर्थानि वसुधा चात्मशुद्धये ॥ १९॥
कृष्णमन्त्रोपासकानां शुद्धं पादोदकं सुत ।
पुनाति सर्वतीर्थानि वसुधामपि पार्वति ॥ २०॥
कृष्णमन्त्रो द्विजमुखाद् यस्य कर्णं प्रयाति च ।
तं वैष्णवं जगत्पूतं प्रवदन्ति पुराविदः ॥ २१॥
मन्त्रग्रहणमात्रेण नरो नारायनात्मकः ।
पुनाति लीलामात्रेण पुरुषाणां शतं शतम् ॥ २२॥
यज्जन्ममात्रात् पूतं च तत् पितृणां शतं शतम् ।
प्रयाति सद्यो गोलोकं कर्मभोगात् प्रमुच्यते ॥ २३॥
मातामहादिकान् सप्त जन्ममात्रात् समुद्धरेत् ।
यत् कन्यां प्रतिगृह्णाति तस्य सप्तावलीलया ॥ २४॥
मातरं तत्प्रशूं भार्यां पुत्राच्च सप्तपूरुषम् ।
भ्रातरं भगिनीं कन्यां कृष्णभक्तः समुद्धरेत् ॥ २४॥
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
फलं स लेभे पूजानां व्रती सर्वव्रतेषु च ॥ २६॥
विष्णुमन्त्रं यो लभेत् वैष्णवाच्च द्विजोत्तमात् ।
कोटिजन्मार्जितात् पापान् मुच्यते नात्र संशयः ॥ २७॥
कृष्णमन्त्रोपासकानां सद्यो दर्शनमात्रतः ।
शतजन्मार्जितात् पापान् मुच्यते नात्र संशयः ॥ २८॥
वैष्णवाद् दर्शनेनैव स्पर्शनेन च पार्वति ।
सद्यः पूतं जलं वह्निर्जगत् पूतः समीरणः ॥ २९॥
दर्शनं वैष्णवानां च देवा वाञ्छन्ति नित्यशः ।
न वैष्णवात् परः पूतो विश्वेषु निखिलेषु च ॥ ३०॥

इत्युक्त्वा सङ्करः शीघ्रं नारदेन सहात्मजः ।
ययौ मन्दाकिनीतीरं नीरं क्षीरोपमं परम् ॥ ३१॥
तत्र स्नातो महादेवी नारदश्च महामुनिः ।
समाचान्तः शुचिस्तत्र धृत्वा धौते च वासवी ॥ ३२॥
कृष्णमन्त्रं ददौ तस्मै नारदाय महेश्वरः ।
परं कल्पतरुवरं सर्वसिद्धिप्रदं शुक ॥ ३३॥
लक्ष्मीर्मायाकामबीजं ङेन्तं कृष्णपदं ततः ।
जगत्पूतप्रियान्तं च मन्त्रराजं प्रकीर्तितम् ॥ ३४॥
मन्त्रं गृहीत्वा स मुनिः शिवं कृत्वा प्रदक्षिणम् ।
सप्त वारान् नमस्कृत्य स्वात्मानं दक्षिणां ददौ ॥ ३५॥
तत्पादपद्मे विक्रीतमाजन्म मस्तकं परम् ।
मुनिना भक्तियुक्तेन स्वर्गमन्दाकिनीतटे ॥ ३६॥


From http://sanskritdocuments.org

एतस्मिन्न् अन्तरे वत्स पुष्पवृष्टिर्बभूव ह ।
नारदोपरि तत्रैव सुश्राव दुन्दुभिर्मुनिः ॥ ३७॥
ननर्त ब्रह्मणः पुत्रो ब्रह्मलोके निरामये ।
ब्रह्मा जगाम तत्रैव सुप्रसन्नश्च सस्मितः ॥ ३८॥
पुत्रं शुभाशिषं कृत्वा तुष्टाव चन्द्रशेखरम् ।
शम्भुश्च पूजयामास ब्राह्मणमतिथिं तथा ।
शम्भुं शुभाशिषं कृत्वा ब्रह्मलोकं ययौ विधिः ॥ ३९॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
नारदोपदेशग्रहणं नाम नवमोऽध्यायः

---

प्रथमैकरात्रे दशमोऽध्यायः

श्रीशुक उवाच
नारदो हि महाज्ञानी देवर्षिर्ब्रह्मणः सुतः ।
सर्ववेदविदां श्रेष्ठो गरिष्ठश्च वरिष्ठकः ॥ १॥
कथं स नोपदिष्टश्च ज्ञानहीनो महामुनिः ।
तन् मां बोधय विभो सन्देहभञ्जनं कुरु ॥ २॥

श्रीव्यास उवाच
नारदो ब्रह्मणः पुत्रः पुराकल्पे बभूव सः ।
सर्वज्ञानं ददौ तस्मै विधाता जगतामपि ॥ ३॥
वेदांश्च पाठयामास वेदाङ्गान्यपि सुव्रत ।
सिद्धविद्यां शिल्पविद्यां योगशास्त्रं पुराणकम् ॥ ४॥
भगवान् एकदा पुत्रं कथयामास संसदि ।
सृष्टिं कुरु महाभाग कृत्वा दारपरिग्रहम् ॥ ५॥
ब्रह्मणश्च वचः श्रुत्वा कोपरक्तास्यलोचनः ।
उवाच पितरं कोपात् परं कृष्णपरायनः ॥ ६॥

श्रीनारद उवाच
सर्वेषामपि वन्द्यानां पिता चैव महागुरुः ।
ज्ञानदातुः परो वन्द्यो न भूतो न भविष्यति ॥ ७॥
स्तनदात्री गर्भधात्री स्नेहकर्त्री सदाम्बिका ।
जन्मदातान्नदाता स्यात् स्नेहकर्ता पिता सदा ॥ ८॥
न क्षमौ तौ च पितरौ पुत्रस्य कर्म खण्डितुम् ।


From http://sanskritdocuments.org

करोति सद्गुरुः शिष्यकर्ममूलनिकृन्तनम् ॥ ९॥
गुरुश्च ज्ञानोद्गिरणात् ज्ञानं स्यान् मन्त्रतन्त्रयोः ।
तत् तन्त्रं स च मन्त्रश्च कृष्णभक्तिर्यतो भवेत् ॥ १०॥
श्रीकृष्णविमुखो भूत्वा विषये यस्य मानसम् ।
विषमत्यमृतं त्यक्त्वा स च मूढो नराधमः ॥ ११॥
स गुरुः स पिता वन्द्यः सा माता स पतिः सुतः ।
यो ददाति हरौ भक्तिं कर्ममूलनिकृन्तनी ॥ १२॥
श्रीकृष्णभजनं तात सर्वमङ्गलमङ्गलम् ।
कर्मोपभोगरोगआणामौषधं तन्निकृन्तनम् ॥ १३॥
अहो जगद्विधातुश्च धर्मशास्तुरियं मतिः ।
स्वयं मायामोहितश्च परं भ्रष्टं करोति च ॥ १४॥
विष्णुस्त्वां मोहिताम् कृत्वा युयोज स्रष्टुमीश्वरः ।
न ददौ स्वात्मभक्तिं तां स्वदास्यं चातिदुर्लभम् ॥ १५॥
माता ददाति पुत्राय मोदकं क्षुन्निवारकम् ।
स च बालो न जानाति कथंभूतं च मोदकम् ॥ १६॥
बालकं वञ्चनं कृत्वा मिष्टं द्रव्यं प्रदाय सः ।
पिता प्रयाति कार्यार्थं विष्णुना मोहितस्तथा ॥ १७॥
संसारकूपपतितो विष्णुना प्रेरितो भवान् ।
न युक्तं पतनं तत्र तद् उद्धारमभीप्सितम् ॥ १८॥
ज्ञानी गुरुश्च बलवान् भवाब्धेः शिष्यमुद्धरेत् ।
गुरुः स्वयमसिद्धश्च दुर्बलः कथमुद्धरेत् ॥ १९॥
गुरोरत्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ २०॥
स गुरुः परमो वैरी यो ददाति ह्यसन्मतिम् ।
तं नमस्कृत्य सत्शिष्यः प्रयाति ज्ञानदं गुरुम् ॥ २१॥
संसारविषयोन्मत्तो गुरुरार्तः स्वकर्मणि ।
दुर्बलो दुर्वहं भारं ददाति जनकाय च ॥ २२॥

नारदस्य वचः श्रुत्वा क्रुद्धः पुत्रमुवाच सः ।
कम्पितस्तमसा धाता कोपरक्तास्यलोचनः ॥ २३॥

ब्रह्मोवाच
ज्ञानं ते भवतु भ्रष्टं स्त्रीजितो भव पामर ।
सर्वजातिषु गन्धर्वः कामी सोऽपि भवान् भव ॥ २४॥
पञ्चाशत्कामिनीनां च स्वयं भर्ता भवाचिरात् ।
तासां वशश्च सततं स्त्रीणां क्रीडा मृगो यथा ॥ २५॥


From http://sanskritdocuments.org
sanskritdocuments.org

शृङ्गारशूरो भव रे शश्वत्सुस्थिरयौवनः ।
तासां नित्यं यौवनानां सुन्दरीणां प्रियो भव ॥ २६॥
कामबाध्यो भव चिरं दिव्यवर्षसहस्रकम् ।
निर्जने निर्जने रम्ये वने क्रीडां करिष्यसि ॥ २७॥
ततो वर्षसहस्रान्ते मया शप्तः स्वकर्मणा ।
विप्रदास्यां तु शूद्रायां जनिष्यसि न संशयः ॥ २८॥
ततो वैष्णवसंसर्गात् विष्णोरुच्छिष्टभोजनात् ।
विष्णुमन्त्रप्रसादेन विष्णुमायाविमोहितः ॥ २९॥

तातस्य वचनं श्रुत्वा चुकोप नारदो मुनिः ।
शशाप पितरं शिघ्रं दारुणं च यथोचितम् ॥ ३०॥

अपूज्यो भव दुष्टं त्वं त्वन्मन्त्रोपासकः कुतः ।
अगम्यागमनेच्छा ते भविष्यति न संशयः ॥ ३१॥

नारदस्य तु शापेन सोऽपूज्यो जगतां विधिः ।
दृष्ट्वा स्वकन्यारूपं च पश्चाद् धावितवान् पुरा ॥ ३२॥
पुनः स्वदेहं तत्याज भर्त्सितः सनकादिभिः ।
लज्जितः कामयुक्तश्च पुनर्ब्रह्मा बभूव सः ॥ ३३॥
नारदस्तु नमस्कृत्य पितरं कमलोद्भवम् ।
विप्रदेहं परित्यज्य गन्धर्वश्च बभूव सः ॥ ३४॥
नवयौवनकालेन बलवान् मदनोद्धतः ।
जहार कन्याः पञ्चाशत् बलाच्चित्ररथस्य तु ॥ ३५॥
गान्धर्वेन विवाहेन ता उवाह च निर्जने ।
मूर्च्छां प्रापुश्च ताः कन्या दृष्ट्वा सुन्दरमीश्वरम् ॥ ३६॥
विसस्पुरुश्च पितरं मातरं भ्रातरं तथा ।
रेमिरे तेन सार्धं च कामुक्यः कामुकेन च ॥ ३७॥
कन्दरेर्कन्दरे रम्ये रम्ये सुन्दरमन्दिरे ।
शैले शैले सुरहसि कानने कानने तथा ॥ ३८॥

पुष्पोद्यने तरुद्याने नद्यां नद्यां नदे नदे ।
सरःश्रेष्ठे सरःश्रेष्ठे वरे चन्द्रसरोवरे ॥ ३९॥
सुरेशस्यापि निकटे सुभद्रस्य तटे तटे ।
अगम्ये च महाघोरे गन्धमादनगह्वरे ॥ ४०॥
परिजाततरुणां च पुष्पितानां मनोहरे ।
तदन्तरे सुन्दरे चामोदिते पुष्पवायुना ॥ ४१॥


From http://sanskritdocuments.org

मलये निलये रम्ये सुगन्धे चन्दनान्विते ।
चन्दनोक्षितसर्वाङ्गश्चन्दनाक्तेन कामिना ॥ ४२॥
रम्यचम्पकशय्यासु चन्दनाक्तासु सस्मिताः ।
दिवानिशं न जानन्ति कामिना सस्मितेन च ॥ ४३॥
विस्यन्दके शूरसेने नन्दने पुष्पभद्रके ।
स्वाहावने काम्यके च रम्यके पारिभद्रके ॥ ४४॥
सुरन्धके गन्धके च सुरङ्ग्हे पुण्ड्रकेऽपि च ।
कालञ्जरे पञ्जरे च काञ्चीकाञ्चनकानने ॥ ४५॥
मधुमाधवमासे च मधूरे मधुकानने ।
वने कल्पतरूणां च विश्वकारुकृतस्थले ॥ ४६॥
रत्नाकराणां निकरे सुन्दरे सुन्दरान्तरे ।
सुवेले च सुपार्श्वे च प्रवालांकुरकानने ॥ ४७॥
मन्दारे मन्दिरे पूरे गान्धारे च युगन्धरे ।
वने केलिकदम्बानां केतकीनां मनोहरे ॥ ४८॥
माधवीमालतीनां च यूथिकानां वने वने ।
चम्पकानां पलाशानां कुन्दानां विपिने तथा ॥ ४९॥
नागेश्वरलवङ्गानां अन्तरे ललितालये ।
कुमुदानां पङ्कजानां पङ्किले कोमलस्थले ॥ ५०॥
स्थलपद्मप्रकारो च भूमिचम्पककानने ।
लाङ्गलीनां रसालानां पनसानां सुखप्रदे ॥ ५१॥
कदलीबदरीणां च श्रीफलानां च श्रीयुते ।
जम्बीराणां च जम्बूनां करञ्जानां तथैव च ॥ ५२॥
कृत्वा बिहारं ताभिश्च गन्धर्वश्चोपवर्हणः ।
दिव्यं वर्षसहस्रं च स्वाश्रमं पुनराययौ ॥ ५३॥
श्रुत्वा विधातुराह्वानं पुष्करं च ययौ पुनः ।
ददर्श तत्र ब्रह्माणम् रत्नसिंहासनस्थितम् ॥ ५४॥
देवेन्द्रैश्चापि सिद्धेन्द्रैर्मुनीन्द्रैः सन्कादिभिः ।
समावृतं सभायां च रक्षोगन्धर्वकिन्नरैः ॥ ५५॥
सुशोभितं यथा चन्द्रं गगने भगणैः सह ।
प्रणनाम सभामध्ये ताभिः सार्धं जगद्विधिम् ॥ ५६॥
महेशं च गणेशं च धनेशं शेषमीश्वरम् ।
धर्मं धन्वन्तरिं स्कन्दं सूर्यसोमहुताशनम् ॥ ५७॥
उपेन्द्रेन्द्रं विश्वकारुं वरुणं पवनं स्मरम् ।
यममष्टौ वसून् रुद्रान् जयन्तं नलकूवरम् ॥ ५८॥
सर्वान् देवान् नमस्कृत्य ननाम मुनिपुङ्गवम् ।
अगस्त्यं च पुलस्त्यं च पुलहं च प्रचेतसम् ॥ ५९॥


From http://sanskritdocuments.org

सर्वश्रेष्ठं वसिष्ठं च दक्षं च कर्दमं तथा ।
सनकं सनन्दं च तृतीयं च सनातनम् ॥ ६०॥
सनत्कुमारं योगीशं ज्ञानिनां च गुरोर्गुरुम् ।
वोढुं पञ्चशिखं सङ्कं भृगुमङ्गिरसं तथा ॥ ६१॥
आसुरिं कपिलं कौत्सं क्रतुं नारायणं नरम् ।
मरीचिं कश्यपं कण्वं व्यासं दुर्वाससं कविम् ॥ ६२॥
बृहस्पतिं च च्यवनं मार्कण्डेयं च लोमशम् ।
वाल्मीकिं परशुरामं संवर्तं च विभाण्डकम् ॥ ६३॥
देवलं च वामदेवम् ऋशयशृङ्गं पराशारम् ।
एतान् सर्वान् नमस्कृत्य तस्थौ स पुरतो विधेः ॥ ६४॥
तुष्टाव सर्वान् देवांश्च मुनीन्द्रांश्च तथैव च ।
तमुवाच सभामध्ये विधाता जगतामपि ।
सस्मितः सुप्रसन्नश्च गन्धर्वमुपवर्हणम् ॥ ६५॥

ब्रह्मोवाच
श्रीकृष्णरससङ्गीतं वीणाध्वनिसमन्वितम् ।
कुरु वत्साधुनात्रैव शृण्वन्तु मुनयः सुराः ॥ ६६॥
गोपीनां वस्त्रहरणं हरं रासमहोत्सवम् ।
ताभिः सार्धं जलक्रीडां हरेरुत्कीर्तनं कुरु ॥ ६७॥
कृष्णसङ्कीर्तनं तूर्णं पुनाति श्रुतिमात्रतः ।
श्रोतारं च प्रवक्तारं पुरुषैः सप्तभिः सह ॥ ६८॥
यत्रैव प्रभवेद् वत्स तन्नामगुणानुकीर्तनम् ।
तत्र सर्वाणि तीर्थानि पुण्यानि मङ्गलानि च ॥ ६९॥
तत्कीर्तनध्वनिं श्रुत्वा सर्वाणि पातकानि च ।
दूराद् एव पलायन्ते वैनतेयमिवोरगाः ॥ ७०॥
तद् दिनं सफलं धन्यं यशस्यं सर्वमङ्गलम् ।
श्रीकृष्णकीर्तनं यत्र तत्रैव नायुषो व्ययः ॥ ७१॥
संकीर्तनध्वनिं श्रुत्वा ये च नृत्यन्ति वैष्णवाः ।
तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा ॥ ७२॥
तत्कीर्तनं भवेद् यत्र कृष्णस्य परमात्मनः ।
स्थानं तच्च भवेत् तीर्थं मृतानां तत्र मुक्तिदम् ॥ ७३॥
नात्र पापानि तिष्ठन्ति पुण्यानि सुस्थिराणि च ।
तपस्विनां च व्रतिनां व्रतानां तपसां स्थलम् ॥ ७४॥
वर्तते पापिनां देहे पापानि त्रिविधानि च ।
महापापोपपापातिपापान्येव स्मृतानि च ॥ ७५॥
हन्ता यो विप्रभिक्षूणां यतीनां ब्रह्मचारिणाम् ।


From http://sanskritdocuments.org

स्त्रीणां च वैष्णवानां च स महापातकी स्मृतः ॥ ७६॥
भ्रूणाघ्नश्चापि गोघ्नश्च शूद्रघ्नश्च कृतघ्नकः ।
विश्वासघाती विड्भोजी स एव ह्युपपातकी ॥ ७७॥
अगम्यागामिनो ये च सुरविप्रस्वहारिणः ।
अतिपातकिनश्चैते वेदविद्भिः प्रकीर्तिताः ॥ ७८॥
कृष्णसंकीर्त्तनध्यानात् तन्मन्त्रग्रहणाद् अहो ।
मुच्यन्ते पातकैस्तैस्तैः पापिनस्त्रिविधाः स्मृताः ॥ ७९॥
तपोयज्ञकृती पूतस्तीर्थस्नातव्रती तथा ।
भिक्षुर्यतिर्ब्रह्मचारी वानप्रस्थश्च तापसः ॥ ८०॥
पवित्रः परमो वह्निः सुपवित्रं जलं यथा ।
एते सर्वे वैष्णवानां कलां नार्हन्ति षोडशीम् ॥ ८१॥
विष्णुपादोदकोच्छिष्टं भुञ्जते ये च नित्यशः ।
पश्यन्ति च शिलाचक्रं पूजां कुर्वन्ति नित्यशः ॥ ८२॥
जीवन्मुक्तास्च ते धन्या हरिदासाश्च भारते ।
पदे पदेऽश्वमेधस्य प्राप्नुवन्ति फलं ध्रुवम् ॥ ८३॥
नहि तेषां पराभूताः पुण्यवन्तो जगत्त्रये ।
तेषां च पादरजसा तीर्थं पूतं तथा धरा ॥ ८४॥।
तेषां च दर्शनं स्पर्शं वाञ्छन्ति मुनयः सुराः ।
पुरुषाणां सहस्रं च पूतं तज्जन्ममात्रतः ॥ ८५॥

इत्युक्त्वा जगतां धाता तत्र तूर्ष्णीं बभूव सः ।
आश्चर्यं मेनिरे श्रुत्वा देवाश्च मुनयस्तथा ॥ ८६॥
एतस्मिन्न् अन्तरे तत्र विद्याधर्यः समागताः ।
गन्धर्वाश्चापि विविधा ननृतुः किन्नरा जगुः ॥ ८७॥
रम्भोर्वशी घृताची च मेनका च तिलोत्तमा ।
सुधामुखी पूर्णचित्ती मोहिनी कलिका तथा ॥ ८८॥
चम्पावती चन्द्रमुखी पद्मा पद्ममुखीति च ।
एताश्चान्याश्च बह्व्यश्च श्वश्वत् सुस्थिरयौवनाः ॥ ८९॥
बृहन्नितम्बश्रोणीकास्तनभारैः समानताः ।
ईषद्धास्याः प्रसन्नास्याः कामार्ताश्च समाययुः ॥ ९०॥
वेदज्ञा मूर्तिमन्तश्च वेदाश्चात्वार एव च ।
ब्राह्मणा भिक्षवः सिद्धा यतयो ब्रह्मचारिणः ॥ ९१॥
समाययुस्तथा मन्दा दैवज्ञाः स्तुतिपाठकाः ।
लक्ष्मी सरस्वती दुर्गा सावित्री रोहिणी रतिः ॥ ९२॥
तुलसी पृथिवी गङ्गा स्वाहा च यमुना तथा ।
वारुणी मनसेन्द्राणी ताः सर्वा देवयोषितः ॥ ९३॥



From http://sanskritdocuments.org

मुनिपत्न्यश्च गन्धर्व्यो हर्षयुक्ताः समाययुः ।
अहो महोत्सवं परमानन्दमानसाः ।
विचित्रां च ब्रह्मसभां पुष्करं तीर्थमाययुः ॥ १४॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
महोत्सवारम्भो नाम दशमोऽध्यायः

---

प्रथमैकरात्रे एकादशोऽध्यायः

अथ महोत्सवदर्शनम्

श्रीव्यास उवाच
अथ गन्धर्वराजस्तु भगवान् आज्ञया विधेः ।
संगीतं च जगौ तत्र कृष्णरासमहोत्सवम् ॥ १॥
सुसमं तालमानं च सुतानं मधुरं श्रुतम् ।
वीणामृदङ्गमुरजयुक्तं ध्वनिसमन्वितम् ॥ २॥
रागिणीयुक्तरागेण समयोक्तेन सुन्दरम् ।
माधुर्यं मूर्च्छनायुक्तं मनसे हर्षकारणम् ॥ ३॥
विचित्रं नृत्यरुचिरं रूपवेशमुत्तमम् ।
लोकानुरागबीजं च नाट्योपयुक्तहस्तकम् ॥ ४॥
दृष्ट्वा श्रुत्वा सुराः सर्वे मुनयः सर्वयोषितः ।
मूर्च्छां प्रायुश्च सहसा चेतनां च पुनः पुनः ॥ ५॥
गोपीनां वस्त्रहरणं गोपीगणविलापनम् ।
ताभ्यो वस्त्रप्रदानं च संमानं वरदानकम् ॥ ६॥
कात्यायनीव्रतं चापि विप्रदारान्नभोजनम् ।
महेन्द्रदर्पपूजादि भञ्जनं शैलपूजनम् ॥ ७॥
पुनश्च शुश्रुवुः सर्वे श्रीवृन्दावनवर्णनम् ।
संप्रापुश्च पुनर्मूर्च्छां पुनः प्रापुश्च चेतनाम् ॥ ८॥
तस्मै ददौ पुरो ब्रह्मा वह्निशुद्धांशुकं परम् ।
परं शुभाशीर्वचनं यत् तन्मानसवाञ्छितम् ॥ ९॥
अमूल्यरत्ननिर्माणं चारुकुण्डालयुग्मकम् ।
मणीन्द्रसारमुकुटं परं रत्नाङ्गुरीयकम् ॥ १०॥
सुगन्धि चन्दनं पुष्पं स्वपादरेणुमीप्सितम् ।
अमूल्यरत्नतिलकं रत्नभूषणमुज्ज्वलम् ॥ ११॥


From http://sanskritdocuments.org

प्रत्येकं वस्तु रुचिरं तद्योषिद्भयश्च संददौ ।
विश्वकर्मा च निर्माणमणिं भूषणमुत्तमम् ॥ १२॥
प्रत्येकं शङ्खसिन्दूरं कस्तूरीयुक्तचन्दनम् ।
सकर्पूरं च ताम्बूलं रत्नेन्द्रसारदर्पणम् ॥ १३॥
मणिनिर्माणामञ्जोरं श्वेतचामरशोभनम् ।
मनोयायि रथं दिव्यं ईस्वरेच्छाविनिर्मितम् ॥ १४॥
मुक्तामाणिक्यहीरेन्द्रैर्मणीन्द्रैश्च परिष्कृतम् ।
सद्रत्नमालाजालैश्च श्वेतचामरदर्पणैः ॥ १५॥
सुशोभितं च परितो लक्षैः सुन्दरमन्दिरैः ।
मणिमानिक्यहीराढ्यं सद्रत्नकलशोज्ज्वलम् ॥ १६॥
सहस्रचक्रसंसक्तं योजनायतसम्मितम् ।
धनुर्लक्षोच्छ्रितं चैव सहस्राश्वेन योजितम् ॥ १७।
एतद् एव ददौ ब्रह्मा प्रहृष्टस्तुष्ट एव च ।
शम्भुस्तुष्टो ददौ हृष्टो हरिभक्तिं च निश्चलाम् ॥ १८॥
ज्ञानमध्यात्मिकं चैव योगज्ञानं सुदुर्लभम् ।
नानाजन्मस्मृतिज्ञानं नैपुण्यं सर्वसिद्धिषु ॥ १९॥
हरेश्चर्चाविधानं च स्तवनं पूजनं तथा ।
माणिक्यहीराहारं च रत्नलक्षं सुदुर्लभम् ॥ २०॥
नागहारं ददौ शेषो नागेन्द्रमौलिमण्डनम् ।
नागकन्याशतं चैव वरभूषणभूषितम् ॥ २१॥
नागेभ्यश्चाभ्यं नित्यं हिस्रजन्तुभ्य एव च ।
नृपालयगतिज्ञानं सर्वलोकविलोकनम् ॥ २२॥
निर्विघ्नत्वं ददौ तस्मै विघ्नराजश्च संसदि ।
सुदुर्लभं पादपद्मयुग्मरेणुमभीप्सितम् ॥ २३॥
अमूल्यं च निरुपमं ग्रीष्मसूर्यप्रभोपमम् ।
मणिराजं सुदीप्तं च त्रिषु लोकेषु दुर्लभम् ॥ २४॥
सर्वत्र विजयं चैव वाञ्छितं निर्मलं यशः ।
संगीतविद्याविज्ञानं तन्नैपुण्यं मनोहरम् ॥ २५॥
लक्षस्वर्णं धनेशश्च दासानां च शतं शतम् ।
धर्मः कीर्तिमयीं मालां स्कन्दो धैर्यं ददौ तथा ॥ २६॥
विषयजीर्णापहरणं ददौ धन्वन्तरिर्मनुम् ।
सूर्यः स्यमन्तकमणिं स्वर्णाभाराष्टकप्रसुम् ॥ २७॥
चन्द्रः श्वेताश्वरत्नं च ह्यमूल्यमुत्तमं ददौ ।
वह्निशुद्धांशुकयुगं ददौ वह्निश्च संसदि ॥ २८॥
उपेन्द्रो रत्नकोटिं च तद् एवेन्द्रो ददौ पुरा ।
वीणाशिल्पं विश्वकर्मा वरुणश्च मणिस्रजम् ॥ २९॥


From http://sanskritdocuments.org

स्मरः शृङ्गारनैपुण्यं वीर्यस्तम्भनमेव च ।
कामसन्दीपनं ज्ञानं कामिनीप्रेममूर्छनम् ॥ ३० ॥
कामिनीवशगं शिल्पं रतितत्त्वं ददौ तथा ।
पापदाहनमन्त्रं च रत्नछत्रं समीरणः ॥ ३१ ॥
यमश्च धर्मतत्त्वं च नरकत्राणकारणम् ।
वसवश्च वसून् दिव्यान् रुद्रस्तेभ्योऽभयं ददौ ॥ ३२ ॥
मधुपात्रं सुधापात्रं जयन्तो नलकूवरः ।
शुक्लपुष्पं शुक्लधान्यं पादरेणुमभीप्सितम् ॥ ३३ ॥
मनोभिरां मनुयो ददौ तस्मै शुभाशिषम् ।
लक्ष्मीश्च परमैश्वर्यं भारती हारमुत्तमम् ॥ ३४ ॥
रत्नमालां ददौ दुर्गा सर्वत्राभयमीप्सितम् ।
तत्पत्नीभ्यश्च रत्नानि सिन्दूराभरणानि च ॥ ३५ ॥
क्रीडापद्मं रोहिनी च रतिः सद्रत्नदर्पणम् ।
तुलसी चातुलं माल्यं दिव्यं वसु वसुन्धरा ॥ ३६ ॥
गङ्गा च विपुलं पुण्यं स्वाहा सद्रत्नपाशकम् ।
यमुना जलजं पद्ममम्लानं सार्वकालिकम् ॥ ३७ ॥
वारुणीं वारुणी तुष्टा रत्नपात्रं शची ददौ ।
मनसा प्रददौ तस्मै नागानां मौलिमण्डनम् ॥ ३८ ॥
गन्धर्वाश्चापि तत्पत्न्यः स्वशिल्पं प्रददुस्तथा ।
परमानन्दयुक्ताश्च मुनिपत्न्यः शुभाशिषम् ॥ ३९ ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
महोत्सवदर्शनं नाम एकादशोऽध्यायः

---

प्रथमैकरात्रे द्वादशोऽध्यायः

शुक उवाच
महोत्सवे सुनिष्पन्ने दानस्योत्तरकालतः ।
किं बभूव रहस्यं च तन् मां व्याख्यातुमर्हसि ॥ १ ॥

श्रीव्यास उवाच
संप्राप्य दानं देवानां गन्धर्वश्चोपवर्हणः ।
तेषां च पुरतो भक्त्या विदयामास वै सदा ॥ २ ॥
श्रुत्वा तद् वचनं ब्रह्मा तमुवाच च संसदि ।



From http://sanskritdocuments.org

शम्भुना च समालोच्य ब्रह्मोवाच विधाता जगतामपि ॥ ३॥
मथुरागमनं चैव कृष्णस्य परमात्मनः ।
विलापं गोपगोपीनां श्रावयास्मांश्च साम्प्रतम् ॥ ४॥।
महोत्सवं कुरु पुनः शृण्वन्तु मुनयः सुराः ।
गायन्तु ताश्च संगीतं नृत्यन्त्वप्सरां गणाः ॥ ५॥
ब्रह्मणश्च वचः श्रुत्वा ननृत्युश्चाप्सरोगणाः ।
चक्रुस्ताः सरसं गीतं विद्याधर्यश्च संसदि ॥ ६॥
मायिनां चैव प्रवरो गन्धर्वश्चोपवर्हणः ।
जगौ सन्धानभावेन मथुरागमनं हरेः ॥ ७॥
विलापं गोकुलस्थानां श्रुत्वा विप्राः सुरादयः ।
मूर्च्छां प्रापुश्च रुरुदुर्ददुर्दानं पुनः पुनः ॥ ८॥
गोपीनां विरहालापैर्मूर्च्छितश्चोपवर्हणः ।
विस्वरेण वितनात् तु तालभङ्गो बभूव ह ॥ ९॥
तत् तालभङ्गं विज्ञाय देवाश्च मुनयस्तथा ।
चुकुपुः सहसा सर्वे निर्गतास्तन् मुखाग्नयः ॥ १०॥
तद् दृष्ट्वा सहसा भीतो गन्धर्वश्चोपवर्हणः ।
सस्मार कृष्णं स्वभीष्टं परमात्मानमीश्वरम् ॥ ११॥
ददृशुः स्मृतिमात्रेण तत्तेजो नभसि स्थितम् ।
स्तम्भिता देवताः सर्वाशिचक्रपुत्तलिका यथा ॥ १२॥
स्तम्भिता वह्नयः सर्वे मुनयश्च विजृम्भिताः ।
हरिस्मृतिश्चाभयदा शुभदा विघ्ननाशिनी ॥ १३॥
ददृशुर्देवताः सर्वाः मुनयश्चापि योषितः ।
गन्धर्वाश्च तथैवान्ये तेजो दृश्यं सुखप्रदम् ॥ १४॥
परं कुञ्ज्झटिकाकारं कोटीन्दुकिरणप्रभम् ।
योजनायतविस्तीर्णं सुस्निग्धं सुमनोहरम् ॥ १५॥
तत् तेजोऽभ्यन्तरे सर्वे ददृशू रथमुत्तमम् ।
गव्यूतिमानं विस्तीर्णं धनुष्कोटिसमुच्छ्रितम् ॥ १६॥
श्वेताश्वानां च चक्राणां सहस्रेण समावृतम् ।
अमूल्यरत्नरचितमीश्वरेच्छाविनिर्मितम् ॥ १७॥
नानाचित्रविचित्राढ्यं मनोयायि ममोहरम् ।
मुक्तामाणिक्यपरमहीराहारैर्विराजितम् ॥ १८॥
रत्नदर्पणलक्षैश्च त्रिलक्षैः श्वेतचामरैः ।
वह्निशुद्धांशुकानां च त्रिलक्षैः परिशोभितम् ॥ १९॥
त्रिकोटिभिश्च ज्वलितं क्रीडासुन्दरमन्दिरैः ।
पारिजातप्रसूनानां मन्दराणां मनोहरैः ॥ २०॥
मालाजालैस्त्रिलक्षैश्च मालतीनां च मण्डितम् ।


From http://sanskritdocuments.org

एवंभूतं रथं दृष्ट्वा ददृशुस्ते तदनन्तरे ॥ २१॥
मध्यकोष्ठाभ्यन्तरे च किशोरं श्यामसुन्दरम् ।
वह्निशुद्धांशुकेनैव पीतवर्णेन शोभितम् ॥ २२॥
रत्नकेयूरवलयरत्नमञ्जीररञ्जितम् ।
रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वलम् ॥ २३॥
ईषद्धास्यप्रसन्नास्यं नित्योपास्यं सुरासुरैः ।
चन्दनोक्षितसर्वाङ्गं मालतीमाल्यमण्डितम् ॥ २४॥
मणिना कौस्तुभेन्द्रेण गण्डस्थलविभूषितम् ।
परं प्रधानं परमं परमात्मानमीश्वरम् ॥ २५॥
स्तुतं ब्रह्मेशशेषैश्च राधावक्षः स्थलस्थितम् ।
वेदानिर्वचनीयं च स्वेच्छामयमनीश्वरम् ॥ २६॥
नित्यं नित्यं निर्गुणं च ज्योतिरूपं सनातनम् ।
प्रकृतेः परमीशानं भक्तानुग्रहकातरम् ॥ २७॥
कोटिकन्दर्पलावण्यलीलाधाममनोहरम् ।
मयूरपुच्छचूडं च वरं वंशीधरं परम् ॥ २८॥
दृष्ट्वा तमद्भुतं रूपं तुष्टाव कमलोद्भवः ।
गणेशः शेषः शम्भुश्च तदन्ये मुनयः सुराः ॥ २९॥

ब्रह्मोवाच
परं ब्रह्म परं धाम परमात्मानमीश्वरम् ।
वन्दे वन्द्यं च सर्वेषां सर्वकारणकारणम् ॥ ३०॥
सर्वेश्वरं सर्वरूपं सर्वाद्यं सद्भिरीडितम् ।
वेदावेद्यं च विद्वद्भिर्न दृष्टं स्वप्नगोचरे ॥ ३१॥

श्रीमहादेव उवाच
सिद्धस्वरूपं सिद्धाद्यं सिद्धबीजं सनातनम् ।
प्रसिद्धं सिद्धिदं शान्तं सिद्धानां च गुरोर्गुरुम् ॥ ३२॥
वन्दे वन्द्यं च महतां परात् परतरं विभुम् ।
स्वात्मारामं पूर्णकामं भक्तानुग्रहकातरम् ॥ ३३॥
भक्तिप्रियं च भक्तेशं स्वभक्तिदास्यदं परम् ।
स्वपदप्रदमेकं च दातारं सर्वसम्पदाम् ॥ ३४॥

अनन्त उवाच
वक्त्राणां च सहस्रेण किं वा स्तौमि श्रुतिश्रुतम् ।
कोटिभिः कोटिभिर्वक्त्रैः को वा स्तोतुं क्षमः प्रभो ॥ ३५॥
किमु स्तोष्यति शम्भुश्च पञ्चवक्त्रेण वाञ्छितम् ।


From http://sanskritdocuments.org

कर्ता चतुर्णां वेदानां किं स्तोष्यति चतुर्मुखः ॥ ३६॥
षड्वक्त्रो गजवक्त्रश्च देवाश्च मुनयोऽपि वा ।
वेदा वा किं वेदविदः स्तुवन्ति प्रकृतेः परम् ॥ ३७॥
वेदानिर्वचनीयं च वेदा निर्वक्तुमक्षमाः ।
वेदविज्ञातवाक्येन विद्वांसः किं स्तुवन्ति तम् ॥ ३८॥

श्रीगणेश उवाच
मूर्खो वदति विष्णाय बुधो वदति विष्णवे ।
नम इत्येवमर्थम् च द्वयोरेव समं फलम् ॥ ३९॥
यस्मै दत्तं च यज्ज्ञानं ज्ञानदाता हरिः स्वयम् ।
ज्ञानेन तेन स स्तौति भावग्राही जनार्दनः ॥ ४०॥
एकवक्त्रोऽनेकवक्त्रो मूर्खो विद्वान् स्वकर्मणा ।
अधनी च धनी वापि सपुत्रो वाप्यपुत्रकः ॥ ४१॥
कर्मणा परमीशं च स्तोतुं को वाप्यनुत्तमम् ।
यथाशक्ति स्तुतिः पूजा वन्दनं स्मरणं हरेः ॥ ४२॥
संकीर्तनं च भजनं जपनं बुद्ध्यनुक्रमम् ।
कुर्वन्ति सन्तोऽसन्तश्च सन्ततं परमात्मनः ॥ ४३॥

कार्तिकेय उवाच
सर्वान्तरात्मा भगवान् ज्ञानं च सर्वजीविनाम् ।
ज्ञानानुरूपं स्तवनं सन्तो नैव हसन्ति तम् ॥ ४४॥
भवेषु त्रिविधो लोकोऽप्युत्तमो मध्यमोऽधमः ।
सर्वे स्वकर्मवशगा निषेकः केन वार्यते ॥ ४५॥
सर्वेश्वरं च संवीक्ष्य सर्वो वदति मत्प्रभुम् ।
मदीश्वरस्य समता सर्वेषु किंकरेषु च ॥ ४६॥
भजन्ति केचित् शुद्धान्तं परमात्मानमीश्वरम् ।
केचित् तदंशांशं प्राप्नुवन्ति क्रमेण तम् ॥ ४७॥

धर्म उवाच
अहं साक्षी च सर्वेषां विधिना निर्मितः पुरा ।
विधातुश्च विधाता त्वं सर्वेश्वरं नमोऽस्तु ते ॥ ४८॥

देवा ऊचुः
यं स्तोतुमसमर्थश्च सहस्रायुः स्वयं विधिः ।
ज्ञानाधिदेवः शम्भुश्च तं स्तोतुं किं वयं क्षमाः ॥ ४९॥


From http://sanskritdocuments.org

वेदा ऊचुः
किं जानीमो वयं के वाप्यनन्तेशस्य यो गुणः ।
वयं वेदाश् त्वमस्माकं कारणस्यापि कारकः ॥ ५० ॥

मुनयः ऊचुः
यदि वेदा न जानन्ति माहात्म्यं परमात्मनः ।
न जानीमस्तव गुणं वेदानुसारिणो वयम् ॥ ५१ ॥

सरस्वत्युवाच
विद्याधिदेवताहं च वेदा विद्याधिदेवकाः ।
वेदाधिदेवो धाता च तदीशं स्तौमि किं प्रभो ॥ ५२ ॥

पद्मोवाच
यत् पादपद्मं पद्मेशः शेषाश्चान्ये सुरास्तथा ।
ध्यायन्ते मुनयो देवा ध्याये तं प्रकृतेः परम् ॥ ५३ ॥

सावित्र्युवाच
सावित्री वेदमाताहं वेदानां जनको विधिः ।
त्वामेव धत्ते धातरं नमामि त्रिगुणात् परम् ॥ ५४ ॥

श्रीपार्वत्युवाच
तव वक्षसि राधाहं रासे वृन्दावने वने ।
महालक्ष्मीश्च वैकुण्ठे पादपद्मार्चने रता ॥ ५५ ॥
श्वेतद्वीपे सिन्धुकन्या विष्णोरुरसि भूतले ।
ब्रह्मलोके च ब्रह्माणी वेदमाता च भारती ॥ ५६ ॥
तवाज्ञया च देवानामविर्भूता च तेजसि ।
निहत्य दैत्यान् देवारीन् दत्वा राज्यं सुराय च ॥ ५७ ॥
तत्पश्चाद् दक्षकन्याहमधुना पार्वती हरे ।
तवाज्ञया हरक्रोडे त्वद्भक्ता प्रतिजन्मनि ॥ ५८ ॥
नारायणप्रिया शश्वत् तेन नारायणी श्रुतौ ।
विष्णोरहं पराशक्तिर्विष्णुमाया च वैष्णवी ॥ ५९ ॥
अनन्तकोटि ब्रह्माण्डं मया सम्मोहितं सदा ।
विदुषां रसनाग्रे च प्रत्यक्षं हि सरस्वती ॥ ६० ॥
महाविष्णोश्च माताहं विश्वानि यस्य लोमसु ।
रामेश्वरी च सर्वाद्या सर्वशक्तिस्वरूपिणी ॥ ६१ ॥
तद्रासे धारणाद् राधा विद्वद्भिः परिकीर्तिता ।


From http://sanskritdocuments.org

परमानन्दपादाब्जं वन्दे सानन्दपूर्वकम् ॥ ६२॥
यत्पादपद्मं ध्यायन्ते परमानन्दकारणम् ।
पादपद्मेशशेषाद्या मुनयो मनवः सुराः ॥ ६३॥
योगिनः सन्ततं सन्तः सिद्धाश्च वैष्णवास्तथा ।
अनुग्रहं कुरु विभो बुद्धिशक्तिरहं तव ॥ ६४॥

इति संवृतं स्तोत्रं यः पठेत् संयतः शुचिः ।
इहैव च सुखं भुङ्क्ते यात्यन्ते श्रीहरेः पदम् ॥ ६५॥
निवृत्तेषु च वेदेषु देवीषु मुनिपुङ्गवे ।
उपवर्हणगन्धर्वः स्तुतिं कर्तुं समुद्यतः ॥ ६६॥

अथ गन्धर्वकृतस्तोत्रम्

गन्धर्व उवाच
वन्दे नवघनश्यामं पीतकौशेयवाससम् ।
सानन्दं सुन्दरं शुद्धं श्रीकृष्णं प्रकृतेः परम् ॥ ६७॥
राधेशं राधिकाप्राणवल्लभं वल्लवीसुतम् ।
राधासेवितपादाब्जं राधावक्षःस्थलस्थितम् ॥ ६८॥
राधानुरागं राधिकेष्टं राधापहृतमानसम् ।
राधाधरं भवाधारं सर्वाधारं नमामि तम् ॥ ६९॥
राधाहृत्पद्ममध्ये च वसन्तं सन्ततं शुभम् ।
राधासहचरं शश्वत् राधाज्ञापरिपालकम् ॥ ७०॥
ध्यायन्ते योगिनो योगात् सिद्धाः सिद्धेश्वराश्च यम् ।
तं ध्याये सततं शुद्धं भगवन्तं सनातनम् ॥ ७१॥
सेवन्ते सन्ततं सन्तो ब्रह्मेशशेषसंज्ञकाः ।
सेवन्ते निर्गुणं ब्रह्म भगवन्तं सनातनम् ॥ ७२॥
निर्लिप्तं च निरीहं च परमात्मानमीश्वरम् ।
नित्यं सत्यं च परं भगवन्तं सनातनम् ॥ ७३॥
यं सृष्टेरादिभूतं च सर्वबीजं परात् परम् ।
योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम् ॥ ७४॥
बीजं नानावताराणां सर्वकारणकारणम् ।
वेदावेद्यं वेदबीजं वेदकारणकारणम् ॥ ७५॥
योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम् ।

इत्येवमुक्त्वा गन्धर्वः पपात धरणीतले ॥ ७६॥
ननाम दण्डवद् भूमौ देवदेवं परात् परम् ।



From http://sanskritdocuments.org

इति तेन कृतं स्तोत्रं यः पठेत् प्रयतः शुचिः ॥ ७७॥
इहैव जीवन्मुक्तश्च परे याति परां गतिम् ।
हरिभक्तिं हरेर्दास्यं गोलोके च निरामयः ।
पार्षदप्रवरत्वं च लभते नात्र संशयः ॥ ७८॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
गन्धर्वकृतस्तोत्रं नाम द्वादशोऽध्यायः

---

प्रथमैकरात्रे त्रयोदशोऽध्यायः

श्रीशुक उवाच
स्तोत्रान्तरे च काले च किं रहस्यं बभूव ह ।
तन् मे कथय भद्रं ते भगवन् भगवद्वचः ॥ १॥

श्रीव्यास उवाच
स्तोत्रान्तरे च काले च गन्धर्वश्चोपवर्हणः ।
उवाच ब्रह्मसंसदि भगवन्तं सनातनम् ॥ २॥

सर्वैर्देवैरहं शप्तश्चाधुना देवहेतुना ।
देवानामग्निपुञ्जश्च प्रदीप्तश्च सुमेरुवत् ॥ ३॥
अधुना च त्वयि गते भस्मासान् मां करिष्यति ।
अतो रक्ष जगन्नाथ मां समुद्धर्तुमर्हसि ॥ ४॥
त्वदंशशूकरेणैव धरोद्धारः कृतः पुरा ।
हिरण्याख्यं महादैत्यं निहत्य चावलीलया ॥ ५॥
पाद्मपद्मार्चितपदे पद्मे ते शरणागतम् ।
मामनाथं भयाक्रान्तं रक्ष रक्ष सुरानलात् ॥ ६॥

गन्धर्वस्य वचः श्रुत्वा प्रहस्य जगदीश्वरः ।
उवाच श्लक्ष्णया वाचा ब्रह्मेशो ब्रह्मसंसदि ॥ ७॥

अथ गन्धर्वमोक्षणम्

श्रीभगवान् उवाच
गन्धर्वराजप्रवर स्थिरो भव भयं त्यज ।
शुभाश्रयस्य भक्तस्य भयं किं ते मयि स्थिते ॥ ८॥


From http://sanskritdocuments.org

सर्वेभ्योऽपि भयं नास्ति मद्भक्तानामकर्मणाम् ।
जन्ममृत्युजराव्याधिभयं तेषां न विद्यते ॥ ९॥
मन्मन्त्रोपासकश्चैव स्वतन्त्रो नित्यविग्रहः ।
पुनर्न विद्यते जन्म मन्त्रग्रहणमात्रतः ॥ १०॥
नास्ति कालाद् भयं तस्य न निषेकाद् विधेरपि ।
मन्त्रग्रहणमात्रेण मुच्यते सर्वकर्मणः ॥ ११॥
मन्मन्त्रो हि देहात् पापं कोटिजन्मकृतं च यत् ।
सुदीप्तो ज्वलदग्निश्च तृणपुञ्जं देहाद् यथा ॥ १२॥
मन्मन्त्रग्रहणाद् योगान् मन्नामग्रहणस्य वा ।
तेषां पापानि वेपन्ते कोटिजन्मकृतानि च ॥ १३॥
यमस्तन्नामलिखनं दूरीभूतं करोति च ।
अन्ते दास्यं च लभते गत्वा गोलोकमुत्तमम् ॥ १४॥
यावद् आयुर्भ्रमेत् तावत् स्वतन्त्रो मत्तकुञ्जरः ।
ततः पापाः फलायन्ते वैनतेयाद् इवोरगाः ॥ १५॥
तेषां च पादरजसा सद्यः पूता वसुन्धरा ।
पुनाति सर्वतीर्थानि दूरतो दर्शनाद् अपि ॥ १६॥
पूतश्च पवनो वह्निर्जलं च तुलसीदलम् ।
पूतान्येव हि तीर्थानि गङ्गादीनि च गायन ॥ १७॥
पूता सुशीला धर्मिष्ठा सुव्रता स्त्री पतिव्रता ।
मन्मन्त्रोपासकाश्चैव तेभ्यः पूतोत्तमाः सदा ॥ १८॥
मन्त्रोपासकानां च तीर्थस्थानं व्रतं सुत ।
श्राद्धं दानं पूजनं च यथा चर्वितचर्वणम् ॥ १९॥
भक्त्या तीर्थानि पूतानि स्वतः पूतो हि वैष्णवः ।
तत् तन्त्रं च तथा दानमलं श्राद्धं च निष्फलम् ॥ २०॥
श्राद्धस्य सम्प्रदानं च कर्तुश्च पुरुषत्रयम् ।
पुरुषाणां शतं मुक्तं को भुङ्क्ते श्राद्धवस्तु च ॥ २१॥
केचिद् एवं वदन्तीति पितृलोकार्थमेव च ।
तद्विरुद्धं च ते तुष्टा मन्त्रग्रहणमात्रतः ॥ २२॥
तेषां शुभाशिषं कर्म नैव भोगाय कल्पते ।
देवान् न प्रभवेद् वत्स सिद्धधान्ये यथाङ्कुरः ॥ २३॥
साक्षात् करोति तेषां च कर्ममूलनिकृन्तनम् ।
मन्त्रोपासकाद् अन्ये कर्मभोगं च भुञ्जते ॥ २४॥
मया स्वयं प्रदत्तश्च स्वमन्त्रः पुरुषाय च ।
परद्वाराद् ग्राहयित्वा भक्तं मुक्तं करोम्यहम् ॥ २५॥
मया प्रदत्तमन्त्रश्च पुरा मृत्युञ्जयस्तथा ।
मृत्युञ्जयाय गोलोके शुद्धसत्त्वगुणाय च ॥ २६॥



From http://sanskritdocuments.org

पुनः सनत्कुमाराय धर्माय ब्रह्मणे तथा ।
कपिलाय च शेषाय गणेशाय च महामते ॥ २७॥
नारायणर्षये चैव धर्मपुत्राय धीमते ।
पुनर्महाविष्णवे च विश्वानि यस्य लोमसु ॥ २८॥
कालाधिष्ठातृदेवाय तस्मै सर्वान्तकाय च ।
उपेन्द्राय च कामाय भृगवेऽङ्गिरसे तथा ॥ २९॥
सरस्वत्यै च पद्मायै राधायै विरजातटे ।
शवित्र्यै विष्णुमायायै पार्षदेभ्यश्च पुत्रक ॥ ३०॥
तुभ्यं न दत्तो मन्त्रोऽत्र श्रूयतां तन् निमित्तकम् ।
जनिष्यसि शूद्रयोनौ ब्रह्मणो वाक्यपालनात् ॥ ३१॥
इत्येवं कथितं सर्वं गच्छ वत्स यथा सुखम् ।
द्वादशाब्दान्तरे शूद्रयोनौ देवाज्जनिष्यसि ॥ ३२॥
पञ्चवर्षाभ्यन्तरे च मन्मन्त्रं प्राप्य विप्रतः ।
दशाब्दान्ते वपुस्त्यक्त्वा ब्रह्मपुत्रो भविष्यसि ॥ ३३॥
मन्मन्त्रं पुनरेवेति शम्भुवक्त्राल् लभिष्यसि ।

इत्येवमुक्त्वा सर्वात्मा तत्रैवान्तरधीयत ॥ ३४॥
गन्धर्वः प्रययौ तस्माद् योषिद्भिः सह पुत्रक ।
इत्येवं कथितं सर्वं पूर्ववृत्तान्तमेव च ॥ ३५॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे
गन्धर्वमोक्षणं नाम त्रयोदशोऽध्यायः

---

प्रथमैकरात्रे चतुर्दशोऽध्यायः

श्रीशुक उवाच
प्रयाते राधिकानाथे गोलोकं च निरामयम् ।
बभूव किं रहस्यं च गते गन्धर्वपुङ्गवे ॥ १॥

श्रीव्यास उवाच
सर्वे देवाश्च मुनयः प्रयाते परमात्मनि ।
सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ २॥
उवाच शम्भुर्ब्रह्माणं नीतिसारविशारदम् ।
ज्ञानाधिदेवो भगवान् परिणामसुखं वचः ॥ ३॥


From http://sanskritdocuments.org

श्रीमहादेव उवाच
रक्षिता यस्य भगवान् कल्याणं तस्य सन्ततम् ।
स यस्य विघ्नकर्ता च रक्षितुं तं च कः क्षमः ॥ ४॥
स्मृतिमात्रेण निर्विघ्ना ये च कृष्णपरायणः ।
विघ्नं कर्तुं के समर्थास्तेषां च मुनयः सुराः ॥ ५॥
कोपाग्निनां स्थलं कुत्र स्तम्भितानां च साम्प्रतम् ।
देवानां च मुनीनां च क्षणेनैवेश्वरेच्छया ॥ ६॥
यदि तिष्ठन्ति भूमौ च दग्धशस्या वसुन्धरा ।
जले यदि ततस्तप्तं नष्टास्ते जलजन्तवः ॥ ७॥
स्थाले दहन्ति लोकांश्च वृक्षांश्च प्रलयाग्नयः ।
विधानं कर्तुमुचितमेषां च जगतां विधे ॥ ८॥
त्वमेव धाता जगतां पिता च विष्णुरीश्वरः ।
कालाग्निरुद्रः संहर्ता नेदानी प्रलयक्षमः ॥ ९॥
एते विषयिणः सर्वे कृष्णस्य परमात्मनः ।
आज्ञावहाश्च सततं दिक्पालाश्च दिगीश्वराः ॥ १०॥
तस्यैवाज्ञावहो धर्मः साक्षी च कर्मणां नृणाम् ।
भ्रमन्ति विषये शश्वन् मोहिता मायया हरेः ॥ ११॥
अहं न पाता न स्रष्टा न संहर्ता च जीवनाम् ।
निर्लिप्तोऽ हं तपस्वी च हरेराराधनोन्मुखः ॥ १२॥
संहारविषयं मह्यं श्रीकृष्णश्च पुरा ददौ ।
दत्वा रुद्राय तद् अहं तपस्यासु रतो हरेः ॥ १३॥
तदर्चनेन ध्यानेन तपसा पूजनेन च ।
स्तवेन कवचनेनैव नाममन्त्रजपेन च ॥ १४॥
मृत्युञ्जयोऽ हं अधुना न च कालाद् भयं मम ।
कालः संहरते सर्वं मां विना च तथेश्वरम् ॥ १५॥
पुरा सर्वादिसर्गे च कस्यचित् स्रष्टुरेव च ।
भालोद्भवाश्च ते रुद्रास्तेष्वेकोऽ हं शङ्करः ॥ १६॥
कल्पश्च ब्रह्मणः पाते लये प्राकृतिके तथा ।
सर्वे नष्टा विषयिणो न भक्ताश्च यथेश्वरः ॥ १७॥
असंख्यब्रह्मणः पातः कल्पश्चासंख्य एव च ।
समतीतः कतिविधो भविता या पुनः पुनः ॥ १८॥
श्रीकृष्णस्य निमेषेण ब्रह्मणः पतनं भवेत् ।
तत्र प्राकृतिकाः सर्वे तिरोभूताः पुनः पुनः ॥ १९॥
न प्राकृतो न विषयी नित्यदेही च वैष्णवः ।
हरेर्वरेणामरोऽहं शिवाधारस्ततस्ततः ॥ २०॥



From http://sanskritdocuments.org

जलप्लुतं च विश्वौघं लये प्राकृतिके ध्रुवम् ।
आब्रह्मलोकपर्यन्तं परं कृष्णालयं विना ॥ २१॥
सर्वा देव्यो विलीनाश्च कृष्णः सत्यं सुनिश्चितम् ।
सर्वे पुमांसो लीनाश्च सत्ये नित्ये सनातने ॥ २२॥
अहं कृष्णश्च प्रकृतिः पार्षदप्रवरो हरेः ।
नित्यं नित्या विद्यमाना गोलोके च निरामये ॥ २३॥
एक ईशो न द्वितीय इति सर्वादिसर्गतः ।
नहि नश्यन्ति तद्भक्ताः प्रकृतिप्राकृते लये ॥ २४॥
तस्य भक्तोत्तमानां च सततं स्मरणेन च ।
आयुर्व्ययो नहि भवेत् कथं मृत्युर्भविष्यति ॥ २५॥
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
तेषां भक्तोत्तमानां च सततं स्मरणेन च ॥ २६॥
जन्ममृत्युजराव्याधिभयं नाप्युपजायते ।
अत्र कल्पे भवान् ब्रह्मा व्यवस्थाता च कर्मसु ॥ २७॥
स्थलं कोपानलानां च विधानं यद् विधे कुरु ।
शम्भोश्च वचनं श्रुत्वा कम्पितः कमलासनः ।
स्थलं चकार वह्नीनामाज्ञया शङ्करस्य च ॥ २८॥

ब्रह्मोवच
ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥ २९॥
भवे भवतु सर्वत्र भवकोपानलोऽधुना ।
प्राकृतेषु च देहेषु व्यापारोऽस्य मया कृतः ॥ ३०॥
मम कोपानलः शम्भो संस्कृताग्निर्द्विजस्य च ।
भवे भवतु सर्वत्र व्यापारोऽस्य मया कृतः ॥ ३१॥
शेषस्य कोपवह्निश्च शेषास्येऽस्त्वधुना शिव ।
यतो विश्वं च प्रलये दहेद् गोमयपिण्डवत् ॥ ३२॥
वह्नेर्मुख्यानलो विश्वे व्यवहाराग्निरीश्वरः ।
भ्वत्वेव हि सर्वत्र सर्वेषामुपकारकः ॥ ३३॥
धर्मास्यकोपवह्निश्च कृष्णाग्निश्च भवत्वयम् ।
अधर्मं कुर्वतां सर्वं दाहनं च करिष्यति ॥ ३४॥
सूर्यकोपानलश्चायं दावाग्निश्च वनेषु च ।
स्थितिरस्य तरोः स्कन्धे तद्भक्ष्याः पशुपक्षिणः ॥ ३५॥
चन्द्रकोपानलो विश्वे कामिनां विरहानलः ।
दम्पत्योर्विरहे शश्वद् भक्ष्यति स्म द्वयोस्तनुम् ॥ ३६॥
इन्द्रकोपानलः सद्यो वज्राग्निश्च बभूव ह ।


From http://sanskritdocuments.org

उपेन्द्रस्यानलश्चैव विद्युद् एव भ्वत्वयम् ॥ ३७॥
रुद्राणामास्यवह्निश्च महोल्काग्निर्भवत्वयम् ।
गणेशाग्निः पृथिव्यां तु यथास्थाने तु तिष्ठति ॥ ३८॥
यत्र तिष्ठेत् तद् उषरमेवमेवं विदुर्बुधाः ।
स्कन्दकोपानलश्चैव रणास्त्राग्निर्बभूव ह ॥ ३९॥
कामेतराणां देवानां मुनीनां च मुखानलः ।
जग्राहौर्वमुनिस्तत्र तेजसि ब्रह्मणः सुतः ॥ ४०॥
स्वदक्षिणोरौ स मुनिः संस्थाप्य वेदमन्त्रतः ।
ब्रह्मणं च नमस्कृत्य शङ्करं तपसे ययौ ॥ ४१॥
कालेन तस्मान् निःसृत्य समुद्रे वाडवानलः ।
स बभूव पुरा पुत्र परमौर्वानलः स्वयम् ॥ ४२॥
कामाग्निमुल्वणं दृष्ट्वा विचिन्त्य मनसा विधिः ।
समालोच्य सुरैः सार्धं मुनीन्द्रैः सह संसदि ॥ ४३॥
अजुहाव स्त्रियः सर्वाः सुव्रताश्च पतिव्रताः ।
आयुयुर्योषितः सर्वास्ता ऊचुः कमलोद्भवम् ॥ ४४॥

स्त्रिय ऊचुः
किमस्मान् ब्रूहि भगवन् शाधि नः करवाम किम् ।
आलोच्य मनसा सर्वं देहि भारं वयं स्त्रियः ॥ ४५॥

ब्रह्मोवाच
गृहीत्वा मदनाग्निं च मैथुने सुखदायकम् ।
विश्वे च योषितः सर्वाः शश्वत्कामा भवन्तु च ॥ ४६॥

ब्रह्मणश्च वचः श्रुत्वा कोपरक्तास्यलोचनः ।
तमूचुः योषितः सर्वा भयं त्यक्त्वा च संसदि ॥ ४७॥

स्त्रिय ऊचुः
धिक् त्वां जगद्विधिं व्यर्थं चकार परमेश्वरः ।
अपूज्यो मोहिनीशापात् पुत्रशापेन साम्प्रतम् ॥ ४८॥
गृहीत्वा मदनाग्निं च पुरुषाश्च तथा स्त्रियः ।
नित्यं दहन्ति सततं वास्तवं दुःसहं परम् ॥ ४९॥
तदेकभागः पुरुषे त्रिभागश्चापि योषिति ।
तेन दुग्धाः स्त्रियः सर्वाश्चास्माकमपरेण किम् ॥ ५०॥
समर्पणं चेत् पुरुषे यद् यस्मासु स्मरानलः ।
भस्मीभूतं करिष्यामो रक्षिता को भवेत् तव ॥ ५१॥


From http://sanskritdocuments.org

पतिव्रतावचः श्रुत्वा तमुवाच शिवः स्वयम् ।
हितं सत्यं नितिसारं परिणामसुखावहम् ॥ ५२॥

अथ कुलटोत्पत्तिः

श्रीमहादेव उवाच
त्यज द्वन्द्वं महाभाग सुव्रताभिः  सहाधुना ।
पतिव्रतानां तेजश्च सर्वेभ्यश्च परं भवेत् ॥ ५३॥
निर्माणं कुरु देवेन्द्र कृत्यां स्त्रीजातिमीश्वर ।
तस्यै देहि दुःखबीजं कामकोपानलं परम् ॥ ५४॥

शङ्करस्य वचः श्रुत्वा सत्वरं जगतां विधिः ।
ससृजे तत्क्षणं मूर्तिं स्त्रीरूपां सुमनोहराम् ॥ ५५॥
अहो रूपमहो वेशमहो अस्या नवं वयः ।
अहो चक्षुः कटाक्षं च मुनीनां मोहयन् मनः ॥ ५६॥
अहो कठिनं चारु स्तनयुग्मं सुवर्तुलम् ।
विचित्रं कठिनं स्थूलं श्रोणियुग्मं च सुन्दरम् ॥ ५७॥
नितम्बयुग्मं वलितं चक्राकारं सुकोमलम् ।
श्वेतचम्पकवर्णाभं सर्वावयमीप्सितम् ॥ ५८॥
शरत्पार्वणकोटीन्दुविनिन्दास्यं सुशोभनम् ।
ईषद्धास्यप्रसन्नास्यं वस्त्रेणाच्छादितं मुदा ॥ ५९॥
वपुः सुकोमलम् चालं नातिदीर्घं न वखरम् ।
वह्निशुद्धांशुकं रत्नभूषणैर्भूषितं सदा ॥ ६०॥
दाडिम्बकुमुदाकारं सान्द्रं सिन्दूरसुन्दरम् ।
कस्तूरीविन्दुना सार्धं स्निग्धचन्दनविन्दुभिः ॥ ६१॥
पक्वबिम्बफलाकारमधरौष्ठपुटं परम् ।
दन्तपंक्तियुगं चैव दाडिम्बबीजसन्निभम् ॥ ६२॥
सुचारु कवरीभारं मालतीमाल्यमण्डितम् ।
तस्यै ददौ च कामाग्निं दृष्ट्वा तां कमलोद्भवः ॥ ६३॥
दृष्ट्वा सा चन्द्ररूपं च कामोन्मत्ता विचेतना ।
कृत्वा कटाक्षं स्मेराश्या मां भजस्वेत्युवाच सा ॥ ६४॥
सस्पितः प्रययौ चन्द्रो लज्जया च सभातलात् ।
कामं दृष्ट्वा च चकमे कामार्ता सा गतत्रपा ॥ ६५॥
दुद्राव कामस्तस्माच्च तत्पश्चात् सा दधाव च ।
जहसुर्देवताः सर्वा मुनयश्चापि संसदि ॥ ६६॥



From http://sanskritdocuments.org

लज्जिता योषितह् सर्वास्तां वारयितुमक्षमाः ।
सर्वे चक्रुः परीहासं स्त्रीवर्गं शङ्करादयः ॥ ६७॥
कामं न लब्ध्वा सा च स्त्री निवृत्यागत्य संसदि ।
तमश्विनीकुमारं चाप्युवाच सुरसन्निधौ ॥ ६८॥

कृत्याकामिन्युवाच
मां भजस्व रवेः पुत्र प्रियां रसवतीं मुदा ।
शृङ्गारे सुखदां शान्तां परां कामातुरां वराम् ॥ ६९॥
त्वया शार्धं भ्रमिष्यामि सुन्दरे गहने वने ।
रहसि रहसि क्रीडां करिष्यामि दिवानिशम् ॥ ७०॥
मधुपानं च दास्यामि वासितं चामलं जलम् ।
सकर्पूरं च ताम्बूलं भोगवस्तु मनोहरम् ॥ ७१॥
शय्यां मनोरमां कृत्वा सपुष्पचन्दनार्चिताम् ।
भगवन्तं करिष्यामि पुष्पचन्दनचर्चितम् ॥ ७२॥

कुमार उवाच
वचनं वद वामे मामात्मनो हृदयङ्गम ।
विहाय कपटं कान्ते कपटं धर्मनाशनम् ॥ ७३॥
स्त्रीधर्मं स्त्रीमनस्कामं स्त्रीस्वभावं च कीदृशम् ।
तदाचारं कतिविधं तन् मां व्याख्यातुमर्हसि ॥ ७४॥

अश्विनीजवचः श्रुत्वा कामार्ता तमुवाच सा ।
कामार्तानां क्व लज्जा च क्व भयं मानमेव च ॥ ७५॥

अथ कुलटास्वभावकथनम्

कामिन्युवाच
स्थानं नास्ति क्षणं नास्ति नास्ति दूती तद् उत्तमा ।
तेनैव युवतीनां च सतीत्वमुपजायते ॥ ७६॥
सुवेशं कामुकं दृष्ट्वा कामिनी मदनातुरा ।
तद् रात्रं च पुलकितं योनौ कण्डूयनं परम् ॥ ७७॥
विचेतना भवेत् सा च कामज्वरप्रपीडिता ।
सर्वं त्यजति तद्धेतोः पुत्रं कान्तं गृहं धनम् ॥ ७८॥।
लब्ध्वा युवानं पुरुषं देशत्यागं करोति सा ।
तदुत्तमं पुनर्लब्ध्वा तं त्यजेत् सा क्षणेन च ॥ ७९॥
विषं दातुं समर्था सा स्वामिनं गुणिनां वरम् ।


From http://sanskritdocuments.org

म्लेच्छं युवानं सम्प्राप्य सर्वस्वं दातुमुत्सुका ॥ ८०॥
त्यजेत् कुलभयं लज्जां धर्मं बन्धुं यशः श्रियम् ।
सम्प्राप्य रतिशूरं च युवानं सुरतोन्मुखम् ॥ ८१॥
सुदृश्यं सुन्दरमुखं शश्वन्मधुरितं वचः ।
हृदयं क्षुरधाराभं को वा जानाति तन्मनः ॥ ८२॥
विद्युच्छटा जले रेखा चास्थिरा च यथाम्बरे ।
तथास्थिरा च कुलटाप्रीतिः स्वप्नं च तद्वचः ॥ ८३॥
कुलटानां न सत्यं च न च धर्मो भयं दया ।
न लौकिकं न लज्जा स्याज्जारजिन्ता निरन्तरम् ॥ ८४॥
स्वप्ने जागरणे चैव भोजने शयने सदा ।
निरन्तरं कामचिन्ता जारे स्नेहो न चान्यतः ॥ ८५॥
कुलटा नरघातिभ्यो निर्दया दुष्टमानसाः ।
जारार्थे च सुतं हन्ति बान्धवस्य च का कथा ॥ ८६॥
न हि वेदा विदन्त्येवं कुलताहृदयङ्गमम् ।
कथं देवास्च मुनयः सन्तो जानन्ति निश्चयम् ॥ ८७॥
रतिशूरं प्रियं दृष्ट्वा क्षीरं घृतमिवाचरेत् ।
गते वयसि जीर्णं तं विषं दृष्ट्वा त्यजेत् क्षणात् ॥ ८८॥
न विश्वसेयुस्तां दुष्टो तस्मात् सन्तो हि सन्ततम् ।
न रिपुः पुरुषाणां च दुष्टस्त्रीभ्यः परो भुवि ॥ ८९॥
विषं मन्त्राद् उपशमं जलाद् वह्निश्च निश्चितम् ।
अग्नेश्च कण्ठकोच्छन्नं दुर्जनः स्तवनाद् वशः ॥ ९०॥
लुब्धो धनेन राजा च सेवया सततं वशः ।
मिश्रं स्वच्छस्वभावेन भयेन च रिपुर्वशः ॥ ९१॥
आदरेण वशो विप्रो यौवती प्रेमभारतः ।
बन्धुर्वशः समतया गुरुः प्रणतिभिः सदा ॥ ९२॥
मूर्खो वशः कथायां च विद्वान् विद्याविचारतः ।
न हि दुष्टा च कुलटा पुंसश्च वशगा भवेत् ॥ ९३॥
स्वकार्ये तत्परा शश्वत् प्रीतिः कार्यानुरोधतः ।
न सर्वस्य वशीभूता विना शृङ्गारमुल्वणम् ॥ ९४॥
न प्रीत्या न धनेनैव न स्तवान् न सेवया ।
न प्राणदानतो वेश्या वशीभूता भवेत् क्षणम् ॥ ९५॥
आहारो द्विगुणस्तासां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणा मन्त्रणा तासां कामश्चाष्टगुनः स्मृतः ॥ ९६॥
शश्वत्कामा च कुलटा न च तृप्तिश्च क्रीडया ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ९७॥
दिवानिशं च शृङ्गारं कुरुते तत्पुमान् यदि ।



From http://sanskritdocuments.org

न तृप्तिः कुलटानां च पुमांसं ग्रस्तुमिच्छति ॥ ९८ ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां नासां तृप्यति सम्पदाम् ॥ ९९ ॥
न श्रेयसां मनस्तृप्तं वाडवाग्निर्न पाथसाम् ।
वसुन्धरा न रजसां न पुंसां कुलटा तथा ॥ १०० ॥
इत्येवं कथितं किंचित् सर्वं वक्तुं च नोचितम् ।
लज्जा बीजं योषितां च निबोध भास्करात्मज ॥ १०१ ॥

श्रुत्वा च कृत्यास्त्रीवाक्यं जहसुर्मुनयः सुराः ।
चुकुपुर्योषितः सर्वाः पद्माद्या लज्जिताः सुत ॥ १०२ ॥
लज्जानतानना लक्ष्मीर्निर्ययौ देवमण्डलात् ।
तत् पश्चात् पार्वती सार्धं सरस्वत्या नतानना ॥ १०३ ॥
सावित्री रोहिनी स्वाहा वारुणी च रतिः शची ।
सर्वा बभूवुरेकत्र प्रचक्रुर्मन्त्रणां च ताः ॥ १०४ ॥
कृत्यास्त्रियः समाहूय ता ऊचुश्च क्रमेण च ।
रोधयामासुरिष्टां तां सुगोप्यां अपि योषितः ॥ १०५ ॥
तस्या मुखे ददौ हस्तं सुशीला कमलालया ।
सलज्जिता भव सुते शान्ता चेति शुभाशिषम् ॥ १०६ ॥
सरस्वती ददौ तस्यै चाभिमानं च धैर्यताम् ।
मौखर्यं वावदूकत्वं मन्त्रणामात्मरक्षणम् ॥ १०७ ॥
सावित्री च ददौ तस्यै सौशील्यं चातिदुर्लभम् ।
आत्मसंगोपनं चैव गाम्भीर्यं कुलतो भयम् ॥ १०८ ॥

पार्वत्युवाच
धिक् त्वां स्वभावकुलटां लज्जिता भव सुन्दरि ।
स्वमानं गौरवं रक्ष ह्यस्माकं च स्मरातुर ॥ १०९ ॥
जनि लभ पृथिव्यां च कायव्यूहं विधाय च ।
पुंसामष्टगुणं कामं लभस्व च पृथक् प्रथक् ॥ ११० ॥
लज्जां चतुर्गुणां चापि द्विगुणां धैर्यतां तथा ।
अभोगेच्छधमे गच्छ दूरं गच्छ ममान्तिकात् ॥ १११ ॥
पुंसां च द्विगुणः कामो वास्तवीणां च योषिताम् ।
लज्जा चाष्टगुणा चापि धैर्यता च चतुर्गुणा ॥ ११२ ॥
कुलधर्मः कुलभयं सौशील्यं मानमूर्जितम् ।
शश्वत् तिष्ठतु पुंस्येव स्त्रीषु च ममाज्ञया ॥ ११३ ॥
यस्मात् सदसि सर्वेभ्यो लज्जाहीनः सुराधमः ।
स्त्रीस्वभावं च पप्रच्छ यज्ञभाक् न भवेत् ततः ॥ ११४ ॥


From http://sanskritdocuments.org

अद्यप्रभृति विश्वेषु नाग्राह्यं पापसंयुतम् ।
चिकित्सकानां विदुषां न भक्ष्य ममाज्ञया ॥ ११५॥

इत्येवमुक्त्वा प्रययुर्देव्यश्च सर्वयोषितः ।
देवाश्च मुनयश्चापि ये चान्ये च समागतः ॥ ११६॥
देवाश्च मुनयश्चापि ये चान्ये सर्वतः सुत ।
पतिव्रताणां स्त्रीणां च लज्जा बीजस्वरूपिणी ॥ ११७॥

इति श्रीनारदपञ्चरात्रे ज्ञाणामृतसारे प्रथमैकरात्रे
कुलटोत्त्पत्तिर्नाम चतुर्दशोऽध्यायः

---

प्रथमैकरात्रे पञ्चदशोऽध्यायः

गते नियमिते काले गन्धर्वश्चोपवर्हणः ।
स्वयोगेन जहौ देहं भारते प्राक्तनाद् अहो ॥ १॥
स जज्ञे शुद्रयोनौ च पितुः शापेन च दैवतः ।
विष्णुप्रसादं भुक्त्वा च बभूव ब्रह्मणः सुतः ॥ २॥
विमुक्तस्तातशापेन सम्प्राप्य ज्ञानमुत्तमम् ।
प्रतिजन्मस्मृतिस्तस्य कृष्णमन्त्रप्रसादतः ॥ ३॥
पितुः सकाशाद् आगत्य सम्प्राप चन्द्रशेखरात् ।
श्रीकृष्णमन्त्रमतुलं स्वर्गमन्दाकिनीतटे ॥ ४॥
स्वर्गमन्दाकिनीतीराद् गुरुणा शङ्करेण च ।
सहितः प्रययौ तूर्णं पार्वतीसन्निधानतः ॥ ५॥
उवास तत्र शम्भुश्च नारदश्च महामुनिः ।
पार्वती भद्रकाली स्कन्दो गणपतिः स्वयम् ॥ ६॥
महाकालश्च नन्दी च वीरभद्रः प्रतापवान् ।
सिद्धा महर्षयश्च मुनयः सन्कादयः ॥ ७॥
योगीन्द्रा ज्ञानिनः सर्वे समूचुः शम्भुसंसदि ।
यत् स्तोत्रं कवचं ध्यानं सुभद्राय च कानने ॥ ८॥
नारायणर्षिभगवान् ब्राह्मणाय ददौ पुरा ।
पूजाविधानं यद् यच्च पुरश्चरणपूर्वकम् ॥ ९॥
तद् एव भगवान् शम्भुः प्रददौ नारदाय च ।
उवाच शम्भुं देवर्षिर्योगिनां च गुरोर्गुरुम् ।
पार्वतीसन्निधौ तत्र नारदश्च महामुनिः ॥ १०॥



From http://sanskritdocuments.org

भगवन् सर्वधर्मज्ञ सर्वज्ञ सर्वकारण ।
सद् यत् पृष्टं मया पूर्वं तन् मां व्याख्यातुमर्हसि ॥ ११॥
यद् यत् पृष्टं त्वया ब्रह्मन् प्रत्येकं च क्रमेण च ।
पुनः प्रश्नं कुरु मुने शृण्वन्तु मत्सभासदः ॥ १२॥
आध्यात्मिकं च यज्ज्ञानं वेदानां सारमुत्तमम् ।
ज्ञानं ज्ञानिषु सारं यत् कृष्णभक्तिप्रदं शुभम् ॥ १३॥
निर्वाणमुक्तिदं ज्ञानं कर्ममूलनिकृन्तनम् ।
तत्सिद्धियोगान् मुक्तिश्च योगिनामपि वाञ्च्छितम् ॥ १४॥
संसारविषयं ज्ञानं शश्वत् सम्मोहवेष्टितम् ।
आश्रमाणां समाचारं तेषां धर्मपरिष्कृतम् ॥ १५॥
चतुर्णां वर्णनां विधानां महेश्वर ।
भिक्षूणां वैष्णवानां च यतीनां ब्रह्मचारिणाम् ॥ १६॥
वानप्रस्थाश्रमाणां च पण्डितानां तथैव च ।
पतिव्रतानां यद् यच्च श्रीकृष्णपूजनं च यत् ॥ १७॥
यत् स्तोत्रं कवचं मन्त्रं पुरश्चरणमीप्सितम् ।
सार्वाह्निकमभीष्टं च विपाकं कर्मजीविनाम् ॥ १८॥
संसारवासनाबद्धं लक्षणं प्रकृतीशयोः ।
तयोः परं वा यद् ब्रह्म तस्यावतारवर्णनम् ॥ १९॥
कस्तत् कलावतीर्णश्च कस्तदंशश् तथैव च ।
परिपूर्णतमः कश्च कः पूर्णः कः कलांशकः ॥ २०॥
कस्य वाराधने शम्भो किं फलं किं यशस्तथा ।
अङ्गाङ्गिनोर्भेदफलं विस्तीर्णं निरपेक्षकम् ॥ २१॥
नारायणर्षिकवचं सुभद्रब्राह्मणाय च ।
यद् दत्तं किं तद् देवेश तदाराध्यश्च कः सुरः ॥ २२॥
अतिसंगोपनीयं च कवचं परमाद्भुतम् ।
सुदुर्लभं च विश्वेषु नोक्तं मां ब्रह्मणा पुरा ॥ २३॥
सनत्कुमारो जानाति नोक्तं तेन पुरा च माम् ।
मया ज्ञानमनापृष्टं यद् यज्जानासि मङ्गलम् ॥ २४॥
वेदसारमनुपमं कर्ममूलनिकृन्तनम् ।
तन् मे कथय भद्रेश मामेवानुग्रहं कुरु ॥ २५॥
अपूर्वं राधिकाख्यानं वेदेषु च सुदुर्लभम् ।
पुराणेष्वितिहासे च वेदाङ्गेषु सुदुर्लभम् ॥ २६॥
गुरोश्च ज्ञानोदिगरणात् ज्ञानं स्यान् मन्त्रतन्त्रयोः ।
तत् तन्तं स च मन्त्रः स्यात् कृष्णभक्तिर्यतो भवेत् ॥ २७॥
ज्ञानं स्याद् विदुषां किंचिद् वेदव्याख्यानतः प्रभो ।


From http://sanskritdocuments.org

वेदकारणपूज्यश् त्वं ज्ञानाधिष्ठातृदेवता ॥ २८॥
तस्माद् भवान् परं ज्ञानं वद वेदविदां वर ।
मां भक्तमनुरक्तं च शरणागतमीश्वर ॥ २९॥

नारदस्य वचः श्रुत्वा योगिनां च गुरोर्गुरुः ।
भगवत्या सहालोच्य ज्ञानं वक्तुं समुद्यतः ॥ ३०॥
इत्येवं कथितं सर्वं पूर्वाख्यानं मनोहरम् ।
हरिभक्तिप्रदं सर्वं कर्ममूलनिकृन्तनम् ॥ ३१॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे
प्रथमैकरात्रे पञ्चदशोऽध्यायः

---

समाप्तश्चेदं नारदपञ्चरात्रैकरात्रम्
श्रीनारदपञ्चरात्रम्

(२ १)

द्वितीयरात्रे प्रथमोऽध्यायः
अथाध्यात्मिकवर्णनम्

श्रीमहादेव उवाच --
नारायणं नमस्कृत्य परमात्मानमीश्वरम् ।
शृणु नारद वक्ष्यामि परमं धर्ममीप्सितम् ॥ १॥
प्रकृतेः परमिष्टं च सर्वेषामभिवाञ्छितम् ।
स्वेच्छामयं परं ब्रह्म पञ्चरात्राभिधं स्मृतम् ॥ २॥
कारणं कारणानां च कर्ममूलनिकृन्तनम् ।
अनन्तबीजरूपं च स्वाज्ञानध्वान्तदीपकम् ॥ ३॥
सर्वेश्वरं सर्वधाम परं वैराग्यकारणम् ।
परमं परमानन्दमायाबन्धनिकृन्तनम् ॥ ४॥
निर्लिप्तं निर्गुणं सारं वेदानां गोपनीयकम् ।
कर्मिणां कर्मणां शश्वत् साक्षिरूपं सुनिर्मलम् ॥ ५॥
ब्रह्मेशशेषप्रमुखदेववन्द्यं प्रशंसितम् ।
वेदज्ञानागोचरं तं योगिनां प्राणतः प्रियम् ॥ ६॥
सर्वाधारं च सर्वाद्यं सर्वसन्देहभञ्जनम् ।



From http://sanskritdocuments.org

सर्वाभीष्टप्रदातारं सर्वेषां च सुदुर्लभम् ॥ ७॥
दुराराध्यं च सर्वेषां भक्तिसाध्यं च मुक्तिदम् ।
मङ्गल्यं मङ्गलार्हं च सर्वविघ्नविनाशनम् ॥ ८॥
पवित्रं तीर्थपूतं च मङ्गलानां च मङ्गलम् ।
वरं स्वपददातारम् भक्तिदास्यप्रदं हरेः ॥ ९॥
पापघ्नं पुण्यदं शुद्धं पापेन्धदाहनानलम् ।
सर्वावतारबीजं तं सर्वावतारवर्णनम् ॥ १०॥
श्रुतिज्ञं श्रुतिदुर्बोधं सर्वेषां श्रुतिसुन्दरम् ।
प्रसाददं चाशुतोषं प्रसादगुणसंयुतम् ॥ ११॥
पञ्चरात्रं इदं ब्रह्मन् पञ्चसंवादमेव च ।
यत्र पञ्चविधं ज्ञानं त्रिषु लोकेषु दुर्लभम् ॥ १२॥
कृष्णेन ब्रह्मणे दत्तं गोलोके विरजातटे ।
निरामये ब्रह्मलोके मह्यं दत्तं च ब्रह्मणा ॥ १३॥
पुरा सर्वादिसर्गे च सर्वज्ञानप्रदं शुभम् ।
मया तुभ्यं प्रदत्तं च ज्ञानामृतमभीप्सितम् ॥ १४॥
त्वमेव वेदव्यासाय पश्चाद् दास्यसि निश्चितम् ।
व्यासो दास्यति पुत्राय निर्जनेऽपि शुकाय च ॥ १५॥
अतः परं न दातव्यं यस्मै कस्मै च नारद ।
विना नारायणांशं तं व्यासदेवं सुपुण्यदम् ॥ १६॥
सत्यं सत्यस्वरूपं च सतीसत्यवतीसुतम् ।
क्रमेण वर्णनं सर्वमेकचित्तं निशामय ॥ १७॥
सर्वाद्याध्यात्मिकं ज्ञानं वेदसारं मनोहरम् ।
दुर्गं नानाप्रकारं च नानातन्त्रेषु पुत्रक ॥ १८॥
सर्वसारोद्धृतं तत्र श्रीकृष्णपादसेवनम् ।
सर्वेषां सम्मतं ज्ञानं निर्लिप्तं भवबन्धतः ॥ १९॥
लक्षश्लोकमिदं शास्त्रं श्रीकृष्णेन कृतं पुरा ।
कथयामि कथं ब्रह्मन् स्वल्पं संक्षेपतः शृणु ॥ २०॥
आब्रह्मस्तम्बपर्यन्तं सर्वं कृष्णं चराचरम् ।
पुनस्तस्मिन् प्रलीनं च पुनरेव च सम्भवम् ॥ २१॥
एक एवेश्वरः शश्वद् विश्वेषु निखिलेषु च ।
सर्वे तत्कर्मसिद्धाश्च मोहितास्तस्य मायया ॥ २२॥
अनन्तस्य च कृष्णस्याप्यनन्तं गुणकीर्तनम् ।
अनन्तरूपा कीर्तिश्चाप्यनन्तं ज्ञानमेव च ॥ २३॥
नामान्यस्याप्यनन्तानि तीर्थपूतानि नारद ।
अनन्तानि च विश्वानि विचित्रकृत्रिमाणि च ॥ २४॥
नानाविधानि सर्वाणि जीवरूपाणि सर्वतः ।


From http://sanskritdocuments.org

मध्यमानि च क्षुद्राणि महन्ति चापि सर्वतः ॥ २५॥
पृथक् पृथख़् च प्रत्येकं प्रत्यक्षं सर्वजीविषु ।
सन्ततं सन्ति ये देवाः सन्तो जानन्ति निश्चितम् ॥ २६॥
परमात्मस्वरूपश्च भगवान् राधिकेश्वरः ।
निर्लिप्तः साक्षिरूपश्च स च कर्मसु कर्मिणाम् ॥ २७॥
जीवस्तत्प्रतिबिम्बश्च भोक्ता च सुखदुःखयोः ।
केचिद् वदन्ति तं नित्यं कारणस्य गुणेन च ॥ २८॥
विद्यमानात् तिरोधानं तिरोधानाच्च संभवः ।
देहाद् देहान्तरं यान्ति न मृत्युस्तस्य कुत्रचित् ॥ २९॥
ततः प्रलीनः प्रलयः परं सर्वालयालये ।
अतो नित्यस्वरूपश्च जीव एव यथात्मकः ॥ ३०॥
केचिद् वदन्त्यनित्यश्च मिथ्यैव कृत्रिमः सदा ।
प्रलीयते पुनस्तत्र  प्रतिबिम्बो यथा रवेः ॥ ३१॥
यथैव शातकुम्भेषु निर्मलेषु जलेषु च ।
प्रत्येकं प्रतिबिम्बश्च दृश्य एव हि जीविनाम् ॥ ३२॥
पुनः प्रलीयते सूर्ये गतेषु च घटेषु च ।
एवं चन्द्रस्य बोद्धव्यं दर्पणे जीवने यथा ॥ ३३॥
तस्मिन् नित्यं परं ब्रह्म सजीवो नित्य एव सः ।
सर्वान्तरात्मा भगवान् प्रत्यक्षं प्रतिजीविषु ॥ ३४॥
अहं ज्ञानस्वरूपश्च ज्ञानाधिष्ठातृदेवता ।
बुद्धिरूपा भगवती सर्वशक्तिस्वरूपिणी ॥ ३५॥
इयं दुर्गा तव पुरो विष्णुमाया सनातनी ।
अनया मोहिताः सर्वे कृष्णभक्तं विना मुने ॥ ३६॥
मनःस्वरूपो ब्रह्मा च मनोऽधिष्ठातृदेवता ।
स्वयं स विषयी विष्णुः प्राणाः पञ्चस्वरूपिणः ॥ ३७॥
एते ह्यभ्यन्तरे देवी चन्द्रः सूर्यश्च चक्षुषोः ।
सर्वे चन्द्रादयो देवाश्चेन्द्रियेषु पृथक् पृथक् ॥ ३८॥
धर्मः शीरश्च सर्वेषां जठरे च हुताशनः ।
प्राणाद् भिन्नश्च पवनः स विश्वासः प्रकीर्तितः ॥ ३९॥
गुणेशः कण्ठदेशस्थो विघ्नदो विघ्ननाशकृत् ।
स्कन्दः प्रतापरूपश्च कामो मनसि कामदः ॥ ४०॥
पापं पुण्यं हृदयजं लक्ष्मीः सत्त्वानुसारिणी ।
आकण्ठदेशात् सर्वेषां रसनासु सरस्वती ॥ ४१॥
सैव मन्त्रणारूपा पृथङ् मुक्त्या च सर्वतः ।
बुद्धिजाः शक्तयः सर्वा विद्यन्ते सर्वजन्तुषु ॥ ४२॥
निद्रा तन्द्रा दया श्रद्धा तुष्टिः पुष्टिः क्षमा च क्षुत् ।



From http://sanskritdocuments.org

लज्जा तृष्णा यथेच्छा च शान्तिश्चिन्ता जरा जडा ॥ ४३॥
याते स्वामिनि यान्त्येते नरदेवमिवानुगाः ।
चिन्ता ज्वरा च सततं शोभां पुष्टिं च द्वेष्टिं च ॥ ४४॥
सर्वेषां जीविनामेव देहोऽयं पाञ्चभौतिकः ।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्मृतः ॥ ४५॥
स्वदेहे च प्रपतिते स्वभागं प्राप्नुवन्ति च ।
पृथक् पृथक् च प्रत्येकमेकमेव क्रमेण च ॥ ४६॥
सङ्केतपूर्वकं नाम तत् स्मरन्ति च बान्धवाः ।
रुदन्ति सततं भ्रान्त्या मायया मायिनस्तथा ॥ ४७॥
तस्मात् सन्तो हि सेवन्ते श्रीकृष्णचरणाम्बुजम् ।
नित्यं सत्यमभयदं जन्ममृत्युजराहरम् ॥ ४८॥
प्रभातस्वप्नवद् विश्वमनित्यं कृत्रिमं मुने ।
पाद्मपद्मार्चितं पादपद्मं भज हरेर्मुदा ॥ ४९॥
मयोक्तं प्रथमं ज्ञानं ज्ञानं पञ्चविधेषु च ।
द्वितीयं श्रूयतां वत्स यत्सारं कृष्णभक्तिदम् ॥ ५०॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे
प्रथमज्ञानाध्यात्मिकवर्णनं नाम
प्रथमोऽध्यायः
॥ १॥

---

(२)
द्वितीयरात्रे द्वितीयोऽध्यायः
अथ भक्तिज्ञाननिरूपणम्

श्रीमहादेव उवाच --
हरिभक्तिप्रदं ज्ञानं ज्ञानं पञ्चविधेषु च ।
विदुषां वाञ्छिता मुक्तिः सततं परमा सताम् ॥ १॥
सा च श्रीकृष्णभक्तेश्च कलां नार्हति षोडशीम् ।
श्रीकृष्णभक्तसङ्गेन भक्तिर्भवती नैष्ठिकी ॥ २॥
अनिमित्ता च सुखदा हरिदास्यप्रदा शुभा ।
यथा वृक्षलतानां च नवीनः कोमलाङ्कुरः ॥ ३॥
वर्धते मेघवर्षेण शुष्कः सूर्यकरेण च ।
तथैव भक्तालापेन भक्तिवृक्षनवाङ्कुरः ॥ ४॥



From http://sanskritdocuments.org

वर्धते शुष्कतां याति चाभक्तालापमात्रतः ।
तस्माद् भक्तैः सहालापं कुरुते पण्डितः सदा ॥ ५॥
यात्येवाभक्तसंसर्गाद् दुष्टात् सर्पाद् यथा नरः ।
आलापाद् गात्रसंस्पर्शात् शयनात् सहभोजनात् ॥ ६॥
सञ्चरन्ति च पापानि तैलविन्दुमिवाम्भसा ।
संसर्गजा गुणा दोषा भवन्त्येव हि जीविनाम् ॥ ७॥
तस्मात् सतां हि संसर्गं सन्तो वाञ्छन्ति संततम् ।
मुने संसर्गजो दोषो वस्तूनां प्रभवेद् इह ॥ ८॥
हीनधातुप्रसङ्गेन स्वर्णदोषः प्रजायते ।
तस्माच्च हीनसंसर्गं न वाञ्छन्ति मनीषिणः ॥ ९॥
तस्माद् वैष्णवसंसर्गं कुर्वन्ति वैष्णवाः सदा ।
कुर्वन्ति वैष्णवाः शश्वत् षड्विधं भजनं हरेः ॥ १०॥
स्मरनं कीर्तनं चैव वन्दनं पादसेवनम् ।
पूजनं सततं भक्त्या परं स्वात्मनिवेदनम् ॥ ११॥
गृह्णाति भक्तो भक्त्या च कृष्णमन्त्रश्च वैष्णवात् ।
अवैष्णवाद् गृहीत्वा च हरिभक्तिर्न वर्धते ॥ १२॥
चाण्डलाद् अपि पापी स श्रीकृष्णविमुखो नरः ।
निष्फलं तद्धर्मकर्म नाधिकारी स कर्मणाम् ॥ १३॥
शश्वद् अशुचिः पापिष्ठो निन्दां कृत्वा हसत्यपि ।
भगवन्तं भागवतमात्मानं नैव मन्यते ॥ १४॥
गुरुमुखात् कृष्णमन्त्रो यस्य कर्णे विशेद् अहो ।
तं वैष्णवं महापूतं प्रवदन्ति पुराविदः ॥ १५॥
मन्त्रग्रहणमात्रेण नरो नारायणानुजः ।
पुरुषाणां शतं सार्धं स्वात्मानं च समुद्धरेत् ॥ १६॥
मातामहानां शतकं सोदरं मातरं सुतम् ।
भृत्यं कलत्रं बन्धुश्च शिष्यवर्गांस्तथैव च ॥ १७॥
यदा नारायणक्षेत्रे मन्त्रं गृह्णाति वैष्णवात् ।
विष्णुः पुंसां सहस्रं च लीलया च समुद्धरेत् ॥ १८॥
मया श्रीकृष्णमन्त्रश्च कृष्णालये मुने पुरा ।
गोलोके विरजातीरे नीरे क्षीरनिभेऽमले ॥ १९॥
शतलक्षजपं कृत्वा पुण्ये वृन्दावने वने ।
श्रीकृष्णानुग्रहेणैव मन्त्रः सिद्धो बभूव मे ॥ २०॥
ब्रह्मभालोद्भवोऽहं च सर्वादिसर्गतो मुने ।
प्राप्तं मृत्युञ्जयं ज्ञानं कृष्णाच्च परमात्मनः ॥ २१॥
सिद्धो मृत्युञ्जयोऽहं नित्यनूतनविग्रहः ।
ब्रह्मणः पतनेनैव निमेषो मे यथा हरेः ॥ २२॥



From http://sanskritdocuments.org

एवं तेषां पार्षदानां नास्ति मृत्युर्यथा हरेः ।
यस्मिन् देहे लभेन् मन्त्रं वैष्णवो वैष्णवाद् अपि ॥ २३॥
पूर्वकर्माश्रितं देहं त्यक्त्वा स पार्षदो भवेत् ।
पञ्चवक्त्रेण सततं तन्नामगुणकीर्तनम् ॥ २४॥
करोमि भार्यया सार्धं पुत्राभ्यां चापि नारद ।
तद् दिनं दुर्दिनं मन्ये मेघाच्छन्नं न दुर्दिनम् ॥ २५॥
यद् दिनं कृष्णसंलापकथापीयुषवर्जितम् ।
तं क्षणं निष्फलं मन्ये श्रीकृष्णकीर्तनं विना ॥ २६॥
आयुर्हरति कालश्च पुंसां तत्कीर्तनेन च ।
तं क्षणं मङ्गलं मन्ये सर्वहर्षकरं परम् ॥ २७॥
तस्मात् पापाः पलायन्ते वैनतेयाद् इवोरगाः ।
ब्रह्मणापि पुरा लब्धस्तस्मात् तन्मन्त्र एव च ॥ २८॥
पद्मनाभनाभिपद्मे शतलक्षं जजाप स ।
तदाललाप ज्ञानं च निर्मलं सृष्टिकारणम् ॥ २९॥
अनिमादिकसिद्धिं च चकार तत्प्रभावतः ।
सृष्टिं च विविधां कृत्वा विधाता च बभूव सः ॥ ३०॥
बरं तस्मै ददौ कृष्णो मत्समत्वं भवेति च ।
शेषस्तत्कलया पूर्वं बभूव कश्यपात्मजः ॥ ३१॥
तस्मात् सम्प्राप तन्मन्त्रं सिद्धः कोटिजपेन च ।
सहस्रशिरसस्तस्य मस्तकस्यैकदेशतः ॥ ३२॥
विश्वं सर्षपवत् सर्पस्यैकदेशे यथा मुने ।
कूर्मस्तत्कलया पूर्वं बभूवायोनिजः स्वयम् ॥ ३३॥
अनन्तस्तत्पृष्ठदेशे गजेन्द्रे मशको यथा ।
वाय्वाधारश्च कूर्मश्च जलाधारः समीरणः ॥ ३४॥
महज्जलं महाविष्णोः प्रत्येकं लोमकूपतः ।
महाविष्णुर्जलाधारः सर्वाधारो महज्जलम् ॥ ३५॥
शून्याश्रयं निराधारं परमेतन् महज्जलम् ।
तस्मिन् महज्जले शेते बभूव कलया हरेः ॥ ३६॥
महज्जलं महावायुर्बभूव कलया हरेः ।
राधागर्भोद्भवो डिम्भः स च डिम्भोद्भवः पुरा ॥ ३७॥
बभञ्ज डिम्भः सहसा गोलोकात् प्रेरितस्तथा ।
भूत्वा द्विखण्डं पतितो डिम्भो मग्नो जलार्णवे ॥ ३८॥
बालश्च शेते तोये पर्यङ्के च यथा नृपः ।
महाविष्णोश्च लोम्नां च विवरेषु पृथक् पृथक् ॥ ३९॥
ब्रह्माण्डानि च प्रत्येकमसंख्यानि च नारद ।
पृथक् पृथक् जलं व्याप्तं प्रतिलोम्नश्च कूपतः ॥ ४०॥


From http://sanskritdocuments.org

वायुस्तदूर्ध्वं प्रत्येकं तदूर्ध्वं कमठस्तथा ।
शेषः कमठपृष्ठे च सहस्रमितमस्तकः ॥ ४१॥
मस्तकस्यैकदेशे च डिम्भः सर्षपवन् मुने ।
डिम्भान्तरे च ब्रह्माण्डमनित्यं कृत्रिमं च तत् ॥ ४२॥
डिम्भान्तरे च ब्रह्माण्डनिर्माणक्रममीप्सितम् ।
सद्भिर्ज्ञातं श्रुतिद्वारा साक्षाद् दृष्टं मया मुने ॥ ४३॥
एवं च सप्तपातालं यथैवाट्टालिकागृहम् ।
प्रययुः परिनिर्माणं क्रमेण च पृथक् पृथक् ॥ ४४॥
अतलं वितलं चैव सुतलं च तलातलम् ।
रसातलं महातलं पातालं परिकीर्तितम् ॥ ४५॥
वितलं सुन्दरं शुद्धं निर्माणं स्वर्गवन् मुने ।
सद्रत्नरचितं सर्वमीश्वरेच्छाविनिर्मितम् ॥ ४६॥
पातालाधस्तलं कृष्णं गभीरं च भयानकम् ।
डिम्भाधरं तज्जलं च डिम्भाढः शेष एव च ॥ ४७॥
अतलोपरि तोयं च तोयोपरि वसुन्धरा ।
काञ्चनी भूमिसंयुक्ता सप्तद्वीपमनोहरा ॥ ४८॥
सप्तसागरसंयुक्ता वनशैलसरिद्युता ।
वर्त्तुला चन्द्रविम्भाभा जलमध्येऽब्जपत्रवत् ॥ ४९॥
जम्बुद्वीपश्च तन्मध्ये लवणोदेन वेष्ठितः ।
लवणोदसमुद्रश्च लक्षयोजनप्रस्थकः ॥ ५०॥
दैर्घ्यं तस्माद् दशगुणो ग्रामस्य परिखा यथा ।
उपद्वीपैर्बहुतरैः शोभायुक्तैः समन्वितः ॥ ५१॥
जम्बुद्वीपे जम्बुवृक्षो विस्तीर्णोऽतिविचित्रकः ।
श्यामवर्णं पक्वफलं गजेन्द्रनिभमेव च ॥ ५२॥
सुमेरुशिखरो यत्र कैलासः शङ्करालयः ।
रत्नाकरो हिमगिरिर्द्वीपमध्ये मनोहरः ॥ ५३॥
मेरोश्चाष्टसु शृङ्गेषु विचित्राविष्कृतेषु च ।
यत्राष्टलोकपालानामाश्रमाणि च नारद ॥ ५४॥
इन्द्रो वह्निः पितृपतिनैर्ऋतो वरुणो मरुत् ।
कुवेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ ५५॥
एतेषामालयं शुद्धं रमणीयं मनोहरम् ।
पूर्वस्माद् एव प्रत्येकं क्रमेण च पृथक् पृथक् ॥ ५६॥
ऊर्ध्वं शृङ्गोऽतिविस्तीर्णो ब्रह्मलोकस्तदग्रतः ।
ब्रह्मलोकोर्ध्वडिम्भश्च विश्वं डिम्भान्तरं तथा ॥ ५७॥
ऊर्ध्वशृङ्गे षष्टलोके ब्रह्मलोकस्तदूर्ध्वतः ।
भूर्लोकोऽपि भुवर्लोकः स्वर्लोकश्च तथैव च ॥ ५८॥



From http://sanskritdocuments.org

जनलोको महर्लोकः सत्यलोकश्च मध्यतः ।
चतुर्युगे सत्यलोके पूर्णो धर्मश्च सन्ततम् ॥ ५९॥
ब्रह्मलोकस्य वामे च ध्रुवलोकस्तथैव च ।
विश्वं च ब्रह्मलोकान्तं स्रष्टा सृष्टञ्च कृत्रिमम् ॥ ६०॥
जम्बुद्वीपश्च कथितो यथा दृष्टो मया मुने ।
सरित्शैलैर्बहुविधैः काननैः कन्दरैर्युतः ॥ ६१॥
यत्र भारतवर्षं च सर्वेषामीप्सितं वरम् ।
कर्मक्षेत्रं सतां सद्भिः प्रशस्यं पुण्यदं परम् ॥ ६२॥
आविर्भावोऽत्र कृष्णस्य यत्र वृन्दावनं वनम् ।
अन्यस्थाने सुखं जन्म निष्फलं च गतागतम् ॥ ६३॥
भारते च क्षणं जन्म सार्थकं शुभकर्मजम् ।
अनेकजन्मपुण्येन साधूनां जन्म भारते ॥ ६४॥
कृष्णानुग्रहतो विद्वान् लब्ध्वा च जन्म भारते ।
न भजेत् कृष्णपादाब्जं तद् अत्यन्तविडम्बनम् ॥ ६५॥
असार्थकं तस्य जन्म वृथा तद्गर्भयातना ।
निष्फलं तच्छरीरं च नश्वरं व्यर्थजीवनम् ॥ ६६॥
जीवन् मृतो हि पापी स चाण्डालाद् अधमोऽशुचिः ।
भुङ्क्ते नित्यमभक्ष्यं चाप्यनिवेद्यं हरेरहो ॥ ६७॥
विण्मूत्रक्लृप्तभक्ष्यं च नित्यं भुङ्क्ते च शूकरः ॥
नहि क्लृप्तमभक्ष्यं च भुङ्क्ते स शूकराधमः ॥ ६८॥
अभक्ष्यं ब्राह्मणानां तद् अनिवेद्यं हरेरहो ।
अन्नं विष्ठा जलं मूत्रं यद् विष्णोरनिवेदितम् ॥ ६९॥
नित्यं पादोदकं भुङ्क्ते नैवेद्यं च हरेर्द्विज ।
तन्मन्त्रग्रहणं कृत्वा जीवन्मुक्तो हि भारते ॥ ७०॥
तस्यैव पादरजसा सद्यः पूता वसुन्धरा ।
सर्वान्येव हि तीर्थानि पवित्राणि च नारद ॥ ७१॥
स एव शुद्धः सर्वेषु सद्यो मुक्तो महीतले ।
पदे पदेऽश्वमेधस्य लभते निश्चितं फलम् ॥ ७२॥
एवं भृत्यस्य रक्षार्थं कृष्णो दत्वा सुदर्शनम् ।
तथापि सुस्थो न प्रीतस्तं त्यक्तुमक्षमः क्षणम् ॥ ७३॥
एवं भूतो दयासिन्धुर्भक्तानुग्रहकातरः ।
अतः सन्तो हि तं त्यक्त्वा न सेवन्ते सुरान्तरम् ॥ ७४॥
जम्बुद्वीपश्च कथितः स्वर्गान् मेरुक्रमेण च ।
अन्येषामपि द्वीपानां श्रूयतामनुवर्त्तनम् ॥ ७५॥
जम्बुद्वीपात् परः प्लक्षस्ततोऽपि द्विगुणक्रमात् ।
वृतश्चेक्षुरसादेन पूर्वस्माद् द्विगुणेन च ॥ ७६॥



From http://sanskritdocuments.org

पूर्वस्माद् द्विगुणैर्युक्तः सरिच्छैलवनादिकैः ।
नानाविधभोगाद् युक्तः शुद्धोऽतिसुन्दरः ॥ ७७॥
तत्र क्रीडन्ति तत्रस्था जरारोगादिवर्जिताः ।
न तत्र कर्मणो जन्म भुङ्क्ते कर्म पुरातनम् ॥ ७८॥
भुक्त्वा शुभाशुभं कर्म स्वर्गं वा नरकं पुनः ।
व्रजन्ति ते क्रमेणैव मूढाः प्राक्तनतो मुने ॥ ७९॥
प्लक्षद्वीपात् परः शाकद्वीपो हि सुन्दरो मुने ।
पूर्वस्माद् द्विगुणो युक्तः सुरोदद्विगुणेन च ॥ ८०॥
शाकद्वीपत् कुशद्वीपो द्विगुणः सुमनोहरः ।
पूर्वस्माद् द्विगुणेनैव घृतोदेन समावृतः ॥ ८१॥
कुशद्वीपाच्च द्विगुणो वकद्वीपो महामुने ।
वृतो दधिसमुद्रेण क्रमात् तद्द्विगुणेन च ॥ ८२॥
वकद्वीपाच्च द्विगुणः शाल्मलिद्वीप एव च ।
पूर्वस्माद् द्विगुणेनैव क्षीरोदेन समावृतः ॥ ८३॥
श्वेतद्वीपश्च क्षीरोदे चोपद्वीपो मनोहरः ।
तत्रैव भगवान् विष्णुः सेवितः सिन्धुकन्यया ॥ ८४॥
नारायणांशो वैकुण्ठः शुद्धः सत्त्वगुणाश्रयः ।
श्यामश्चतुर्भुजः शान्तो वनमालाविभूषितः ॥ ८५॥
चतुर्भुजैः श्यामवर्णैः पार्षदैः परिवारितः ।
ब्रह्मादिभिस्तूयमानो मुनिभिः सनकादिभिः ॥ ८६॥
सुखदो मोक्षदः श्रीमान् प्रदाता सर्वसम्पदाम् ।
द्वीपश्च वर्तुलाकारो विशुद्धश्चन्द्रविम्बवत् ॥ ८७॥
योजनायुतविस्तीर्णो दैर्घ्यं च तत्समः सदा ।
अमूल्यरत्ननिर्माणो बभूव स्वेच्छया हरेः ॥ ८८॥
आत्मानं मन्यते तुच्छं विश्वकर्मा निरीक्ष्य यम् ।
समावृतं पार्षदानां शिविरैर्लक्षकोटिभिः ॥ ८९॥
उद्यानैः कल्पवृक्षाणां संसक्तं शतकोटिभिः ।
शतकोटिभिरष्टाभिः कामधेनुभिरावृतम् ॥ ९०॥
पुष्पोद्यानैरावृतैश्च सरोभिः शतकोटिभिः ।
गन्धर्वैर्नर्तकैः सिद्धैर्योगेन्द्रैरप्सरोगणैः ॥ ९१॥
तस्माद् द्वीपाच्च द्विगुणः क्रौञ्चद्वीपो मनोहरः ।
पूर्वस्माद् द्विगुणेनैव जलोदेन समावृतः ॥ ९२॥
सप्तद्वीपाश्च कथिताः सरित्सागरकाननाः ।
शैलैर्बहुविधैर्युक्ताः सुन्दरैः कन्दरोदरैः ॥ ९३॥
तत्परा काञ्चनी भूमिः सर्वसत्त्वविवर्जिता ।
तेजःस्वरूपा परमा प्रज्वलन्ती दिवानिशम् ॥ ९४॥


From http://sanskritdocuments.org

एवं डिम्भोदरस्थं च विश्वं विश्वसृजा कृतम् ।
डिम्भस्तल्लोमकूपे च महाविष्णुश्च नारद ॥ ९५॥
यावन्ति लोमकूपाण्यविष्कृतानि हरेरहो ।
तावन्त्येव हि विश्वानि चासंख्यानि च नारद ॥ ९६॥
जले शेते महाविष्णुर्जलं तत्प्रतिलोमसु ।
जलोपरि महावायुर्वायोरुपरि कच्छपः ॥ ९७॥
कच्छपोपरि शेषश्च गजेन्द्रमशको यथा ।
सहस्रमूर्ध्वं शेषस्य मस्तकस्यैकदेशतः ॥ ९८॥
विश्वाधारश्च डिम्भश्च शूर्पे च सर्षपो यथा ।
स एव च महाविष्णुः कृष्णस्य परमात्मनः ॥ ९९॥
षोडशांशो भगवतः परस्य प्रकृतेः परेः ।
ब्रह्मादिस्तम्बपर्यन्तं सर्वं मिथ्यैव नारद ।
भज सत्यं परं ब्रह्म राधेशं त्रिगुणात् परम् ॥ १००॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे
भक्तिज्ञाननिरूपणं नाम
द्वितीयोऽध्यायः
॥ २॥

---

(३)
द्वितीयरात्रे तृतीयोऽध्यायः
अथ हरिभक्तिनिरूपणं

श्रीनारद उवाच --
श्रुतं नाथ किममृतमपूर्वं परमाद्भुतम् ।
भक्तिज्ञानं परं शुद्धममलं कोमलं विभो ॥ १॥
अतः परं यमपरं तीर्थकीर्तेर्गुणान्तरम् ।
ज्ञानामृतं रसं शुद्धं कथ्यतां श्रवणामृतम् ॥ २॥

श्रीमहदेव उवाच --
गुणान्तरं तीर्थकीर्तेः को वा वक्तुं क्षमो मुने ।
नाहं ब्रह्मा च शेषश्च धर्मः सूर्यस्तथैव च ॥ ३॥
नारायणर्षिर्भगवान् नरर्षिः कपिलस्तथा ।


From http://sanskritdocuments.org

सनत्कुमारो वेदाश्चाप्यन्यः को वा न भारती ॥ ४॥
परमात्मा यथा दृष्टः सिमा च नभसस्तथा ।
यथा दृष्टं मनश्चापि बुद्धिर्ज्ञानं विवेचनम् ॥ ५॥
तथा गुणश्च कृष्णस्य सर्वा ज्ञातश्च नारद ।
तथापि वक्ति तज्ज्ञानं पण्डितश्च यथागमम् ॥ ६॥
कलाः कलांशास्तस्यापि ये ये सन्तश्च योगिनः ।
ते महान्तश्च पूज्याश्चाप्यंशं वक्तुं च कः क्षमः ॥ ७॥
नैव कृष्णात् परो देवी नैव कृष्णात् परः पुमान् ।
नैव कृष्णात् परो ज्ञानी न योगी च ततः परः ॥ ८॥
नैव कृष्णात् परोः सिद्धस्तत्परोऽपि नहीश्वरः ।
न तत्परश्च जनको विश्वेषां परिपालकः ॥ ९॥
न तत्परश् बलवान् बुद्धिमान् कीर्तिमांस्तथा ।
न तत्परः सत्यवादी दयावान् भक्तवत्सलः ॥ १०॥
न तत्परश्च गुणवान् सुशीलश्च जितेन्द्रियः ।
शुद्धाश्रयश्च शुद्धश्च न तस्माद् भक्तवत्सलः ॥ ११॥
न तस्मात् परो धर्मी प्रदाता सर्वसम्पदाम् ।
नहि तस्मादत् परः शान्तो लक्स्मीकान्तात् परश्च कः ॥ १२॥
अनन्तकोटिब्राह्माण्डो मोहितो मायया यया ।
सा चातिभीता पुरतो यमेव स्तोतुमक्षमा ॥ १३॥
सरस्वती जडीभूता यमेव स्तोतुमक्षमा ।
महालक्ष्मीश्चातिभीता पादपद्मं निसेवते ॥ १४॥
प्रत्येकं प्रतिविश्वेषु महाविष्णुश्च लोमसु ।
कोटिशः कोटिशः सन्ति देवा ब्रह्मादयो मुने ॥ १५॥
यथा रेणुरसंख्यश्च तथा विश्वानि नारद ।
एतेषामीश्वरश्चैको राधेशः प्रकृतेः परः ॥ १६॥
इत्येवं कथितं किञ्चित् किं भूयः श्रोतुमिच्छसि ।
अनिरूप्यः कृष्णगुणो यथा विश्वं यथा रजः ॥ १७॥

नारद उवाच --
राधोद्भवं वद विभो श्रोतुं कौतूहलं मम ।
का वा सा कुत उत्पन्ना तत्प्रभावश्च कः शिव ॥ १८॥

श्रीमहादेव उवाच --
सर्वादिसर्गपर्यन्तं शृणु नारद मन्मुखात् ।
एकोऽयं न द्वितीयश्च देहो मे तेजसोऽन्तरे ॥ १९॥
गोलोको नित्यवैकुण्ठो यथाकाशो यथादिशः ।



From http://sanskritdocuments.org

यथा स परमात्मा च सर्वेषां जगतामपि ॥ २० ॥
द्विभुजः सोऽपि गोलोके बभ्राम रासमण्डले ।
गोपवेषश्च तरुणो जलदश्यामसुन्दरः ॥ २१ ॥
कोटीन् सदृशः श्रीमांस्तेजसा प्रज्वलन्न् इव ।
अतीवसुखदृश्यश्च कोटिकन्दर्पनिन्दितः ॥ २२ ॥
दृष्ट्वा शून्यं सर्वविश्वमूर्ध्वं चाधोपि तुल्यकम् ।
सृष्ट्युन्मौखश्च श्रीकृष्णः सृष्टिं कर्तुं समुद्यतः ॥ २३ ॥
एक ईशः प्रथमतो द्विधारूपो बभूव सः ।
एका स्त्री विष्णुमाया या पुमान् एकः स्वयं विभुः ॥ २४ ॥
स च स्वेच्छामयः श्यामः सगुणो निर्गुणः स्वयम् ।
तां दृष्ट्वा सुन्दरीं लीलां रतिं कर्तुं समुद्यतः ॥ २५ ॥
सा दधाव नचोवाच भीता मनसि कम्पिता ।
तां धृत्वोरसि संस्थाप्य स उवाचातिलज्जिताम् ॥ २६ ॥
स्त्रीजात्यधिष्ठातृदेवीं मूलप्रकृतिमीश्वरीम् ।
तत्प्राणाधिष्ठातृदेवीं तद्वामाङ्गसमुद्भवाम् ॥ २७ ॥

श्रीभगवान् उवाच --
मम प्राणाधिदेवी त्वं स्थिरा भव ममोरसि ।
अत्र स्थानं मया दत्तं तुभ्यं प्राणेश्वरि प्रिये ॥ २८ ॥
प्राणेभ्योऽपि प्रियतमे परमाद्या सनातनि ।
त्यज लज्जां क्षमाशीले नवसंगमलज्जिते ॥ २९ ॥

इत्येवमुक्त्वा तां देवीं प्रियां कृत्वा स्ववक्षसि ।
चुचुम्ब गण्डं कठिनमाशिश्लेषस्तनं मुदा ॥ ३० ॥
शय्याह रतिकर्त्रीं कृत्वा पयः फेननिभा शुभाम् ।
सुगन्धिवायुसंयुक्ता पुष्पचन्दनचार्चिताम् ॥ ३१ ॥
स रेमे रामया सार्धं यावद् वै ब्रह्मणो वयः ।
विदग्धया विदग्धेन बभूव सङ्गमः शुभः ॥ ३२ ॥
एतदन्ते तदुदरे वीर्याधानं चकार सः ।
गर्भं दधार सा देवी यावद् वै ब्रह्मणो वयः ॥ ३३ ॥
भूरिश्रमेण कृष्णस्य गात्रे धर्मो बभूव ह ।
अधः पपात तद् बिन्दुकणमेव च नारद ॥ ३४ ॥
दधार तज्जलं शून्ये नित्यवायुश्च योगतः ।
तद् एव प्लावयामास विश्वे चोरसि सर्वतः ॥ ३५ ॥
रासे संभूय तरुणीमादधार हरेः पुरः ।
तेन राधा समाख्याता पुराविद्भिश्च नारद ॥ ३६ ॥


From http://sanskritdocuments.org

कृष्णवामांशसंभूता बभूव सुन्दरी पुरा ।
यस्याश्चांशांशकलया बभूवुर्देवयोषितः ॥ ३७॥
राशब्दोच्चारणाद् भक्तो भक्तिं मुक्तिं च रातिं सः ।
धाशब्दोच्चारणेनैव धावत्येव हरेः पदम् ॥ ३८॥
सुषाव डिम्भं सा देवी रासे वृन्दावने वने ।
दृष्ट्वा डिम्भं क्रुधा राधा प्रेरयामास पादतः ॥ ३९॥
पपात डिम्भस्तोये च द्विखण्डश्च बभूव सः ।
डिम्भान्तरे च यो वालो महाविष्णुः स एव हि ॥ ४०॥
तल्लोमविवरेष्वेव ब्रह्माण्डानि पृथक् पृथक् ।
प्रत्येकं माययासंख्यडिम्भाश्चाप्यभवन् पुरा ॥ ४१॥
विश्वान्येव हि भूरीणि तेषामभ्यन्तरं मुने ।
बभूवुरेवं क्रमतः प्रत्येकं च पृथक् पृथक् ॥ ४२॥
इत्येवं कथितं विप्र राधिकाख्यानमेव च ।
गोपनीयं पुराणेषु स्वादु स्वादु पदे पदे ॥ ४३॥
जन्ममृत्युजराव्याधिहरं मोक्षकरं परम् ।
हरिदास्यप्रदं तस्य भक्तिदं शुभदं शुभम् ॥ ४४॥
सर्वं ते कथितं वत्स यत् ते मनसि वाञ्छितम् ।
यथा श्रुतं कृष्णमुखात् किं भूयः श्रोतुमिच्छसि ॥ ४५॥

श्रीनारद उवाच --
किमपूर्वं श्रुतं शम्भो योगीन्द्राणां गुरोर्गुरो ।
समासेन सर्वमुक्तं व्यासेन वक्तुमर्हसि ॥ ४६॥
पुरा त्वयोक्तं देवीनां देवानां चरितं शिव ।
जगत्प्रसूं च पृच्छतीं पार्वतीं पुष्कराश्रमे ॥ ४७॥
राधाख्यानं तत्र नोक्तं कथं वा विदुषां गुरो ।
सर्वबीजेश्वर सर्ववेदकारणकारण ॥ ४८॥
मां भक्तमनुरक्तं च वद वेदविदां वर ।
कृपां कुरु कृपासिन्धो दीनबन्धो परात् पर ॥ ४९॥

श्रीमहादेव उवाच --
अपूर्वं राधिकाख्यानं गोपनीयं सुदुर्लभम् ।
सद्यो मुक्तिप्रदं शुद्धं वेदसारं सुपुण्यदम् ॥ ५०॥
यथा ब्रह्मस्वरूपश्च श्रीकृष्णः प्रकृतेः परः ।
तथा ब्रह्मस्वरूपा च निर्लिप्ता प्रकृतेः परा ॥ ५१॥
यथा स एव सगुणः काले कर्मानुरोधतः ।
तथैव कर्मणा काले प्रकृतिस्त्रिगुणात्मिका ॥ ५२॥


From http://sanskritdocuments.org

तस्यैव परमेशस्य प्राणेषु रसनासु च ।
बुद्धौ मनसि योगेन प्रकृतेः स्थितिरेव च ॥ ५३॥
आविर्भावस्तिरोभावस्तस्याः कालेन नारद ।
न कृत्रिमा च सा नित्या सत्यरूपा यथा हरिः ॥ ५४॥
प्राणाधिष्ठात्री या देवी राधारूपा च सा मुने ।
रसनाधिष्ठात्री या देवी दुर्गा दुर्गतिनाशिनी ॥ ५५॥
बुद्ध्यधिष्ठात्री या देवी दुर्गा दुर्गतिनाशिनी ।
अधुना या हिमगिरेः कन्या नाम्ना च पार्वती ॥ ५६॥
सर्वेषामपि देवानां तेजःसु समाधिस्ठता ।
संहन्त्री सर्वदैत्यानां देववैरिविमर्दनी ॥ ५७॥
स्थानदात्री च तेषां च धात्री त्रिजगतामपि ।
क्षुत्पिपासा दया निद्रा तुष्टिः पुष्टिः क्षमा तथा ॥ ५८॥
लज्जा भ्रान्तिश्च सर्वेषामधिदेवी प्रकीर्तिता ।
मनोऽधिष्ठात्री देवी सा सावित्री विप्रजातिषु ॥ ५९॥
राधावमांशसम्भूता महालक्ष्मीः प्रकीर्तिता ।
ऐश्वर्याधिष्ठात्री देवीश्वरस्य हि नारद ॥ ६०॥
तदंशा सिन्धुकन्या च क्षीरोदमथनोद्भवा ।
मर्त्यलक्ष्मीश्च सा देवी पत्नी क्षीरोदशायिनः ॥ ६१॥
तदंशा स्वर्गलक्ष्मीश्च शक्रादीनां गृहे गृहे ।
स्वयं देवी महालक्ष्मीः पत्नी वैकुण्ठशायिनः ॥ ६२॥
सावित्री ब्रह्मणः पत्नी ब्रह्मलोके निरामये ।
सरस्वती द्विधाभूता पुरैव साज्ञया हरेः ॥ ६३॥
सरस्वती भारती च योगेन सिद्धयोगिनी ।
भारती ब्रह्मणः पत्नी विष्णोः पत्नी सरस्वती ॥ ६४॥
राधाधिष्ठात्री देवी च स्वयं रसेश्वरी परा ।
वृन्दावने च सा देवी परिपूर्णतमा सती ॥ ६५॥
रासमण्डलमध्ये च रासक्रीडां चकार सा ।
कृष्णचर्विततताम्बूलं चखाद राधिका सती ॥ ६६॥
राधाचर्विततताम्बूलं चखाद मधुसूदनः ।
एकाङ्गौ हि तनोर्भेदो दुग्धधारण्ययोर्यथा ॥ ६७॥
भेदका नरकं यान्ति यावच्चन्द्रदिवाकरौ ।
तयोर्भेदं करिष्यन्ति ये च निन्दन्ति राधिकाम् ।
कुम्भीपाकेन पच्यन्ते यावद् वै ब्रह्मणो वयः ॥ ६८॥

श्रीनारद उवाच --
राधामन्त्रेषु यो मन्त्रः प्रधानः पूज्तः सताम् ।



From http://sanskritdocuments.org

तन् मे ब्रूहि जगन्नाथ यद् ध्यानं कवचं स्तवम् ॥ ६९॥
पूजाविधानं तन्मन्त्रं यद् यत् पूजाफलं शिव ।
समासेन कृपासिन्धो मां भक्तमपि कथ्यताम् ॥ ७०॥

श्रीमहादेव उवाच --
नारायणर्षिणा दत्तं सुभद्रब्राह्मणाय च ।
कवचं यन् मुनिश्रेष्ठ तद् एव कवचं परम् ॥ ७१॥
षडस्खरी महाविद्या श्रीकृष्णेनैव सेविता ।
सारभूता च मन्त्रेषु दास्यभक्तिप्रदा हरेः ॥ ७२॥
ध्याणं स्तोत्रं सर्वपूज्यं सामवेदोक्तमेव च ।
कार्तिकीपूर्णिमाप्राप्तं नराणां जन्मखण्डनम् ॥ ७३॥
परमानन्दसन्दोहकवचं तत् सुदुर्लभम् ।
यद् धृतं कण्ठदेशे च कृष्णेन परमात्मना ॥ ७४॥

नारद उवाच --
षडक्षरीं महाविद्यां वद वेदविदां वर ।
केन केनोपासिता सा किं वा तत्फलमीश्वर ॥ ७५॥

श्रीमहादेव उवाच --
षडक्षरी महाविद्या वेदेषु च सुदुर्लभा ।
निषिद्धा हरिणा पूर्वं वक्तुमेव हि नारद ॥ ७६॥
पार्वत्या परिपृष्टेन मया नोक्ता पुरा मुने ।
अस्माकं प्राणतुल्या च कृष्णस्य परमात्मनः ॥ ७७॥
सर्वसिद्धिप्रदा विद्या भक्तिमुक्तिप्रदा हरेः ।
वह्निस्तम्भं जलस्तम्भं मृदां च मनसस्तथा ॥ ७८॥
सर्वं जानाति भक्तश्च विद्या सिद्धिर्भवेद् यदि ।
यदा नारायणक्षेत्रे दशलक्षं जपेच्छुचिः ॥ ७९॥
मन्त्रसिद्धिर्भवेत् तस्य विष्णुतुल्यो भवेन् नरः ।
इत्येवं कथितं वत्स मन्त्रतन्त्रपराक्रमम् ॥ ८०॥
राज्यं देयं शिरो देयं प्राणा  देयाश्च नारद ।
पुत्रो देयः प्रिया देया धर्मं देयं सुदुर्लभम् ॥ ८१॥
ज्ञानं मृत्युञ्जयं नाम यदि देयं महामुने ।
तथापि गोपनीया च न देया सा षडक्षरी ॥ ८२॥
ब्रह्मशापभयाद् विप्र तथापि कथयाम्यहम् ।
स्नातः शुद्धाम्बरधरो यती संयत्येव च ॥ ८३॥
गृह्णीयाच्च महाविद्यां कामधेनुस्वरूपिणीम् ।



From http://sanskritdocuments.org

प्रदात्रीं कवितां विद्यां सर्वसिद्धिं च सम्पदाम् ॥ ८४॥
बलं पुत्रं महालक्ष्मीं निश्चलां शतपौरुषीम् ।
भक्तिं दास्यप्रदामन्ते गोलोके वासमीप्सितम् ॥ ८५॥
मन्त्रग्रहणमात्रेण नरो नारायणो भवेत् ।
कोटिजन्मार्जितात् पापान् मुच्यते नात्र संशयः ॥ ८६॥
पुरुषाणां शतं चैव लीलया च समुद्धरेत् ।
मातरं भ्रातरं पुत्रं पत्नीं च बान्धवांस्तथा ॥ ८७॥
मन्त्रग्रहणमात्रेण सद्यः पूतो भवेन् नरः ।
यथा सुवर्णं वह्नौ च गङ्गतोये यथा नरः ॥ ८८॥
तस्यैव पादरजसो सद्यः पूता वसुन्धरा ।
पवित्राणि च तीर्थानि तुलसी चापि जाह्नवी ॥ ८९॥
पदे पदेऽश्वमेधस्य लभते निश्चितं फलम् ।
षडक्षरीं महाविद्यां यो गृह्णीयाच्च पुण्यदः ॥ ९०॥
भूतवर्गात् पराद् वर्णो द्वितीयो दीर्घवान् मुने ।
चतुर्वर्गतुरीयश्च दीर्घवांश्च फलप्रदः ॥ ९१॥
भूतवर्गात् परो वर्णो वाणीवान् सर्वसिद्धिदः ।
सर्वशुद्धप्रियान्ता च तस्या बीजादिका स्मृता ॥ ९२॥
षडक्षरी महाविद्या कथिता सर्वसिद्धिदा ।
प्रणवाद्या महामाया राधा लक्ष्मी सरस्वती ॥ ९३॥
कृष्णप्राणाधिका ङेन्तानलजायान्त एव च ।
कल्पवृक्षस्वरूपश्च मन्त्रोऽयं भुवनाक्षरः ॥ ९४॥
कुमारपदवीदाता सिद्धो यदि भवेन् नरः ।
कुमारेणार्चितो मन्त्रः पाद्मे पाद्मसुतेन च ॥ ९५॥
पाद्मेन दत्तः पुत्राय पुष्करे सूर्यपर्वणि ।
सप्तलक्षजपेनैव मन्त्रसिद्धिर्भवेन् नृणाम् ॥ ९६॥
सर्वस्तम्भं सर्वसिद्धिं लभते साधकः सदा ।
कृष्णेन दत्तो गोलोके ब्रह्मणो विरजातटे ॥ ९७॥
तेन दत्तश्च मह्यं च तुभ्यं दत्तो महामुने ।
प्रणवाद्या च सर्वाद्या महामाया सरस्वती ॥ ९८॥
कृष्णप्रिया चतुर्थ्यन्ता चित्रभानुप्रियान्तका ।
एकादशाक्षरो मन्त्रो रङ्गयोपासितस्तथा ॥ ९९॥
मुक्तिप्रदश्च मन्त्रोऽयं तीर्थपूतश्च सिद्धिदः ।
मनोयायी भवेद् अत्र चान्तो याति परां गतिम् ॥ १००॥
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन् नृणाम् ।
प्रणवाद्या च सर्वाद्या महालक्ष्मीः सरस्वती ॥ १०१॥
सर्वाद्या सा चतुर्थ्यन्ता वीतहोत्रप्रियान्तका ।


From http://sanskritdocuments.org

दशाक्षरो महामन्त्रो दास्यभक्तिप्रदो हरेः ॥ १०२॥
योगीन्द्रश्च भवेद् अत्र मन्त्रसिद्धिर्भवेद् यदि ।
नवलक्षजपेनैव मन्त्रसिद्धिर्भवेन् नृणाम् ॥ १०३॥
सर्वमन्त्रेषु सारश्च मन्त्रराजः प्रकीर्तितः ।
तुलस्योपासितो मन्त्रश्चतुर्वर्गफलप्रदः ॥ १०४॥
व्यासेनोपासितोऽयं च तथा नारायणार्षिणा ।
सारभूतं मयोक्तं ते परं मन्त्रचतुष्टयम् ।
सुखदं भक्तिदं शुद्धं किं भूयः श्रोतुमिच्छसि ॥ १०५॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
हरिभक्तिज्ञाननिरूपणं नाम
तृतीयोऽध्यायः
॥ ३॥

---

(४)
द्वितीयरात्रे चतुर्थोऽध्यायः
अथ राधाप्रश्नकथनम्

श्रीनारद उवाच --
मन्त्रोपयुक्तं ध्यानं च तथा पूजाविधानकम् ।
स्तवनं कवचं चैव वद वेदविदां वर ॥ १॥

श्रीभगवान् उवाच --
ध्यानं च श्रूयतां वत्स सामवेदोक्तमेव च ।
श्रीकृष्णेन कृतं पूर्वं सर्वेषामभिवाञ्छितम् ॥ २॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ।
बिभ्रतीं कवरीभारं मालतीमाल्यभूषितम् ॥ ३॥
वह्निशुद्धांशुकाधानां रत्नभूषणभूषितम् ।
ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकारिकाम् ॥ ४॥
ब्रह्मस्वरूपां परमां कृष्णरामां मनोहराम् ।
कृष्णप्राणाधिकां देवीं कृष्णवक्षःस्थलस्थिताम् ॥ ५॥
कृष्णस्तुतां कृष्णकान्तां शान्तां सर्वप्रदां सतीम् ।
निर्लिप्तां निर्गुणां नित्यां सत्यां शुद्धां सनातनीम् ॥ ६॥


From http://sanskritdocuments.org

गोलोकवासिनीं गोप्त्रीं विधात्रीं धातुरेव ताम् ।
वृन्दां वृन्दावनचरीं वृन्दावनविनोदिनीम् ॥ ७॥
तुलस्यधिष्ठातृदेवीं गङ्गार्चितपदाम्बुजाम् ।
सर्वसिद्धिप्रदां सिद्धां सिद्धेशीं सिद्धयोगिनीम् ॥ ८॥
सुयज्ञयज्ञाधिष्ठात्रीं सुयज्ञाय महात्मने ।
वरदात्रीं च वरदां सर्वसम्पत्प्रदां सताम् ॥ ९॥
गोपीभिः सुप्रियाभिश्च सेवितां श्वेतचामरैः ।
रत्नसिंहासनस्थां च रत्नदर्पणधारिणीम् ॥ १०॥
क्रीडापङ्कजहस्ताभ्यां परां कृष्णप्रियां भजे ।
ध्यात्वा शिरसि पुष्पं च दात्वा प्रक्षाल्य हस्तकम् ॥ ११॥
पुनर्ध्यात्वा च भक्त्या च दद्यात् तस्यै प्रसूनकम् ।
तां षोडशोपचरेण संपूज्य परमेश्वरीम् ॥ १२॥
पुष्पाञ्जलित्रयं दत्वा स्तुत्वा च कवचं पठेत् ।
पूजाक्रमं परीहारं वत्स मत्तो निशामय ॥ १३॥
मन्त्रं समुपचाराणां शृण्वनुक्रमणेन च ।
पुनर्ध्यात्वा यथा देवी पुष्पाञ्जलियुतो भवेत् ॥ १४॥
इमं मन्त्रं परीहारं कुरुते भक्तिपूर्वकम् ।
नारायणि महामाये विष्णुमाये सनातनि ॥ १५॥
प्राणाधिदेवि कृष्णस्य मामुद्धार भवार्णवात् ।
संसारसागरे घोरे भीतं मां शरणागतम् ॥ १६॥
प्रपन्नं पतितं मातर्मां उद्धार हरिप्रिये ।
असंख्यायोनिभ्रमणाद् अज्ञानान्धतमोऽन्वितम् ॥ १७॥
ज्वलद्भिर्ज्ञानदीपैश्च मां सुवर्त्म प्रदर्शय ।
सर्वेभ्योऽपि विनिर्मुक्तं कुरु राधे सुरेश्वरि ॥ १८॥
मां भक्तानुरक्तं च कातरं यमताडनात् ।
त्वत्पादपद्मयुगले पादपद्मालयार्चिते ॥ १९॥
देहि मह्यं परां भक्तिं कृष्णेन परिसेविते ।
स्निग्धदूर्वाङ्कुरैः शुक्लपुष्पैः कुसुमचन्दनैः ॥ २०॥
कृष्णदत्तार्घ्यशोभाढ्ये भक्तिमाध्वीकसंकुले ।
आसनं भास्वदुत्तुङ्गममूल्यं रत्ननिर्मितम् ॥ २१॥
मया निवेदितं भक्त्या गृहाण परमेश्वरि ।
नानातीर्थोद्भवं पुण्यं शीतलं च सुनिर्मलम् ॥ २२॥
मया निवेदितं भक्त्या पाद्यं च प्रतिगृह्यताम् ।
स्निग्धदूर्वाक्षतं शुक्लपुष्पकुंकुमचन्दनम् ॥ २३॥
तीर्थतोयान्वितं देवि गृहणार्घ्यं सुरेश्वरि ।
वह्निशुद्धं वस्त्रयुग्ममममूल्यमतुलं परम् ॥ २४॥



From http://sanskritdocuments.org

मया निवेदितं भक्त्या गृहाण जगदम्बिके ।
ग्रथितं सूक्ष्मसूत्रेण पारिजातविनिर्मितम् ॥ २५॥
जन्ममृत्युजराव्याधिहरे माल्यं गृहाण मे ।
कस्तूरीकुंकुमाक्तं च सुगन्धि स्निग्धचन्दनम् ॥ २६॥
राधे मातर्निराबोधे मद्गृहाणानुलेपनम् ।
शुक्लपुष्पसमूहं च सुगन्धि चन्दनान्वितम् ॥ २७॥
मया निवेदितं भक्त्या पुष्पं देवि प्रतिगृह्यताम् ।
वनस्पतिरसो दिव्यो गन्धवस्तुभिरन्वितः ॥ २८॥
मया निवेदितो भक्त्या धूतोपं प्रतिगृह्यताम् ।
अन्धकारभयध्वंसी माङ्गल्यो विश्वपावनः ॥ २९॥
मया निवेदितो भक्त्या दीपोऽयं प्रतिगृह्यताम् ।
सुधापूर्नं रत्नकुम्भं शतकं च सुदुर्लभम् ॥ ३०॥
माध्वीककुम्भलक्षं च नैवेद्यं देवि गृह्यताम् ।
मिष्टान्नस्वस्तिकानां च लक्षपुञ्जं मनोहरम् ॥ ३१॥
शर्कराराशिलक्षं च नैवेद्यं देवि गृह्यताम् ।
संस्कृतं पायसं पिष्ठं शाल्यन्नं व्यञ्जनान्वितम् ॥ ३२॥
शर्करादधिदुग्धाक्तं नैवेद्यं देवि गृह्यताम् ।
फलानां च सुपक्वानामाम्रादीनां त्रिलक्षम् ॥ ३३॥
राशीनां च मया दत्तं भक्त्या च देवि गृह्यताम् ॥
दधिकुल्याशतं चैव मधुकुल्याशतं तथा ॥ ३४॥
घृतकुल्याशतं चैव गृहाण परमेश्वरि ।
दुग्धकुल्याशतं रम्यं गुडकुल्याशतं तथा ॥ ३५॥
मया निवेदितं भक्त्या गृहाण परमेश्वरि ।
नानातीर्थोद्भवं रम्यं सुगन्धिवस्तुवासितम् ॥ ३६॥
मया निवेदितं भक्त्या शीततोयं गृहाण मे ।
पयःफेननिभा शय्या रत्नेन्द्रसारनिर्मिता ॥ ३७॥
मया निवेदिता भक्त्या तां गृहाण सुरेश्वरि ।
भूषणानि च रम्याणि सद्रत्ननिर्मितानि च ॥ ३८॥
मया निवेदितानि भक्त्या गृहाण परमेश्वरि ।
ताम्बूलं च परं रम्यं कर्पूरादिसुवासितम् ॥ ३९॥
मया निवेदितं भक्त्या गृहाण परमेश्वरि ।
सिन्दूरं शोभनं राधे योषितां सुप्रियं सदा ॥ ४०॥
मया निवेदितं भक्त्या सिन्दूरं प्रतिगृह्यताम् ।
परं सुपक्वतैलं च सुगन्धिवस्तुसंस्कृतम् ॥ ४१॥
मया निवेदितं भक्त्या तैलं च प्रतिगृह्यताम् ।
पुष्पाञ्जलित्रयं दत्वा दासीवर्गं प्रपूजयेत् ॥ ४२॥



From http://sanskritdocuments.org

पाद्यादिकं पृथग् दत्वा प्रणमेद् दण्डवद् भुवि ।
मालतीं माधवीं रक्तां रत्नमालावतीं सतीम् ॥ ४३॥
चम्पावतीं मधुमतीं सुशीलां वनमालिकाम् ।
चन्द्रवालीं चन्द्रमुखीं पद्मां पद्ममुखीं शुभाम् ॥ ४४॥
कमलां कालिकां कृष्णप्रियां विद्माधरीं तथा ।
सम्पूज्य भक्त्या सर्वास्ता बटुवर्गं प्रपूजयेत् ॥ ४५॥
सानन्दं परमानन्दं सुमित्रं सन्तनुं तथा ।
एतान् संपूज्य प्रत्येकं स्तोत्रं च कवचं पठेत् ॥ ४६॥
जपेत् षडक्षरीं विद्यां श्रीकृष्णेनैव सेविताम् ।
यथाशक्ति भक्तियुक्तो दण्डवत् प्रणमेत् सदा ॥ ४७॥
स्तोत्रं च सामवेदोक्तं प्रपठेद् भक्तिसम्युतः ।
राधा रसेश्वरी रम्या रामा च परमात्मनः ॥ ४८॥
रासोद्भवा कृष्णकान्ता कृष्णवक्षःस्थलस्थिता ।
कृष्णप्राणाधिदेवी च महाविष्णोः प्रसूरपि ॥ ४९॥
सर्वाद्या विष्णुमाया च सत्या नित्या सनातनी ।
ब्रह्मस्वरूपा परमा निर्लिप्ता निर्गुणा परा ॥ ५०॥
वृन्दा वृन्दावने सा च विरजातटवासिनी ।
गोलोकवासिनी गोपी गोपीशा गोपमातृका ॥ ५१॥
सानन्दा परमानन्दा नन्दनन्दनकामिनी ।
वृषभानुसुता शान्ता कान्ता पूर्णतमा च सा ॥ ५२॥
काम्या कलावती कन्या तीर्थपूता सती शुभा ।
सप्तत्रिंशच्च नामानि वेदोक्तानि शुभानि च ॥ ५३॥
सारभुतानि पुण्यानि सर्वनामसु नारद ।
यः पठेत् संयुतः शुद्धो विष्णुभक्तो जितेन्द्रियः ॥ ५४॥
इहैव निश्चलां लक्ष्मीं लब्ध्वा याति हरेः पदम् ।
हरिभक्तिं हरेर्दास्यं लभते नात्र संशयः ॥ ५५॥
भक्तो लक्षजपेनैव स्तोत्रसिद्धो भवेद् ध्रुवम् ।
सिद्धस्तोत्रो यदि भवेत् सर्वसिद्धेश्वरो भवेत् ॥ ५६॥
वह्निस्तम्भं जलस्तम्भं मनस्तम्भं ह्रदस्तथा ।
मनोयायित्वमिष्टं च लभते नात्र संशयः ॥ ५७॥
स्तोत्रस्मरणमात्रेण जीवन्मुक्तो भवेन् नरः ।
पदे पदेऽश्वमेधस्य लभते निश्चितं फलम् ॥ ५८॥
कोटिजन्मार्जितात् पापात् ब्रह्महत्याशताद् अपि ।
स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशयः ॥ ५९॥
मृतवत्सा काकबन्ध्या महाबन्ध्या प्रसूयते ।
शृणोति वर्षमेकं या शुद्धा स्विन्नान्नभोजिनी ॥ ६०॥



From http://sanskritdocuments.org

शृणोति मासमेकं यः सर्वाभीष्टं लभेन् नरः ।
सामवेदकुमारं तमित्याह कमलोद्भवः ॥ ६१॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे
हरिभक्तिज्ञानकथने
राधाप्रश्नकथनं नाम
चतुर्थोऽध्यायः
॥ ४॥

---

(५)
द्वितीयरात्रे पञ्चमोऽध्यायः
अथ राधिकाकवचम्

श्रीनारद उवाच --
सर्वं श्रुतं जगन्नाथ यद् यन् मनसि वाञ्छितम् ।
अधुना श्रोतुमिच्छामि राधिकाकवचं परम् ॥ १॥

श्रीमहादेव उवाच --
क्षमस्व ब्रह्मनः पुत्र देवर्षे मुनिपुङ्गव ।
यन् निषिद्धं भगवता कृष्णेन परमात्मना ॥ २॥
कथं वक्ष्यामि हे वत्स सुगुप्तं कवचं मुने ।
कण्ठे दधार भगवान् भक्त्या रत्नपुटेन यत् ॥ ३॥
परमानन्दसन्दोहकवचं  च सुदुर्लभम् ।
षडक्षरीं महाविद्यां नित्यभक्त्या जपेद् धरिः ॥ ४॥
नित्यं प्रपूजयेन् नित्यं नित्यः सत्यः परात् परः ।
सा पूजयेत् प्रभुं नित्यं जपेद् एकादशाक्षरम् ॥ ५॥
मह्यं च कवचं दत्वा निषिद्धं परमात्मना ।
इदमेवेति कवचं दत्तं  तेनैव ब्रह्मणे ॥ ६॥
धर्माय ब्रह्मणा दत्तं तेन नारायणाय च ।
नारायणेन कण्ठस्थं सुभद्राय ददे पुरा ॥ ७॥
क्षमस्व कथितुं नालं क्षमस्व भगवन् मुने ।
गुरुणा च निषिद्धं च न वक्तव्यं कदाचन ॥ ८॥

श्रीनारद उवाच --



From http://sanskritdocuments.org

मां भक्तमनुरक्तं च नाथ मा कुरु वञ्चनाम् ।
त्वमेव कृष्णस्त्वं शम्भुर्द्वयोर्भेदो न साम्नि च ॥ ९॥
परतन्त्रो निषिद्धं च वाक्यं कथितुमक्षमः ।
शृणोति कस्य वा वाक्यं यः स्वतन्त्रः स्वयं प्रभुः ॥ १०॥
यदि मां कवचं नाथ न वक्ष्यसि सुदुर्लभम् ।
देहं त्यक्त्वा ब्रह्महत्यां दास्यामि तुभ्यमीश्वर ॥ ११॥
सद्वंशजातः शिष्यश्च शुद्धः सुब्राह्मणः सुधीः ।
मन्यते कृष्णतुल्यं च गुरुं परमधार्मिकः ॥ १२॥
देवमन्यं कृष्णतुल्यं यो ब्रवीति नराधमः ।
ब्रह्महत्यां च लभते महामूर्खो न संशयः ॥ १३॥
परमात्मा स्वयं कृष्णो निर्गुणः प्रकृतेः परः ।
ततो देवास्तदंशाश्च सगुणाः प्राकृताः स्मृताः ॥ १४॥
सर्वे जन्याः कृत्रिमाश्च पुरा ब्रह्मादयः सुराः ।
सर्वेषां जनकः कृष्णः परमाद्यः परात् परः ॥ १५॥
शृणु वक्ष्यामि विप्रेन्द्र राधिकाकवचं शुभम् ।
परमानन्दसन्दोहाभिधमिष्टं सुदुर्लभम् ॥ १६॥
कृष्णेन दत्तं मह्यं च शतशृङ्गे च पर्वते ।
निरामये च गोलोके पुण्ये वृन्दावने वने ॥ १७॥
राधिकासन्निधाने च शोभने रासमण्डले ।
गोपगोपीकदम्बैश्च वेष्टिते समभीप्सिते ॥ १८॥
अहं तुभ्यं प्रदास्यामि प्रवक्तव्यं न कस्यचित् ।
यद् धृत्वा पठनाद् भक्तो जीवन्मुक्तो भवेद् ध्रुवम् ॥ १९॥
ब्रह्महत्यालक्षपापान् मुच्यते नात्र संशयः ।
कोटिजन्मार्जितात् पापाद् उपदेशात् प्रमुच्यते ॥ २०॥
अश्वमेधसहस्रं च राजसूयशतं तथा ।
विप्रेन्द्र कवचस्यास्य कलां नार्हति षोडशीम् ॥ २१॥
शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत् ।
शठाय परशिष्याय दत्वा मृत्युं लभेन् नरः ॥ २२॥
विप्रेन्द्र कवचस्यास्य ऋषिर्नारायणः स्वयम् ।
कृष्णस्य भक्तिदास्ये च विनियोगः प्रकीर्तितः ॥ २३॥
सर्वाद्या मे शिरः पातु केशं केशवकामिनी ।
भालं भगवती पातु लीला लोचनयुग्मकम् ॥ २४॥
नासां नारायणी पातु सानन्दा चाधरौष्ठकम् ।
जिह्वां पातु जगन्माता दन्तं दामोदरप्रिया ॥ २५॥
कपोलयुग्मं कृष्णेशा कण्ठं कृष्णप्रियावतु ।
कर्णयुग्मं सदा पातु कालिन्दीकूलवासिनी ॥ २६॥


From http://sanskritdocuments.org

वसुन्धरेशा वक्षो मे परमा सा पयोधरम् ।
पद्मनाभप्रिया नाभिं जठरं जाह्नवीश्वरी ॥ २७॥
नित्या नितम्बयुग्मं मे कङ्कालं कृष्णसेविता ।
परात् परा पातु पृष्ठं सुश्रोणी श्रोणिकायुगम् ॥ २८॥
परमाद्या पानयुग्मं नखरांश्च नरोत्तमा ।
सर्वाङ्गं मे सदा पातु सर्वेशा सर्वमङ्गला ॥ २९॥
पातु रामेश्वरी राधा स्वप्ने जागरणे च माम् ।
जले स्थले चान्तरीक्षे सेविता जलशायिनी ॥ ३०॥
प्राच्यां मे सततं पातु परिपूर्णतमप्रिया ।
वह्नीश्वरी वह्निकोणे दक्षिणे दुःखनाशिनी ॥ ३१॥
नैर्ऋते सततं पातु नरकार्णवतारिणी ।
वारुणे वनमालीशा वायव्यां वायुपूजिता ॥ ३२॥
कौबेरे मां सदा पातु कूर्मेण परिषेविता ।
ऐशान्यामीश्वरी पातु शतशृङ्गनिवासिनी ॥ ३३॥
वने वनचरी पातु वृन्दावनविनोदिनी ।
सर्वत्र सन्ततं पातु सर्वेशा विरजेश्वरी ॥ ३४॥
प्रथमे पूजिता या  च कृष्णेन परमात्मना ।
षडक्षर्या विद्यया च सा मां रक्षतु कातरम् ॥ ३५॥
द्वितीये पूजिता देवी शम्भुना रासमण्डले ।
नानासंभृतसंभारैर्माया प्रकृतिरीश्वरी ॥ ३६॥
सप्ताक्षर्या विद्यया च पूज्यया प्रनवाद्यया ।
तृतीये पूजिता देवी ब्रह्मना परमादरम् ॥ ३७॥
श्रीबीजयुक्तया भक्त्या चाष्टाक्षर्या च विद्यया ।
चतुर्थे पूजिता देवी शिषेण विघ्ननाशिनी ॥ ३८॥
तेनैव सेविता विद्या मायायुक्ता नवाक्षरी ।
विद्या सा चापि धर्मेण सेविता परमेश्वरी ॥ ३९॥
धर्मेण दत्ता सा विद्या पुत्र नारायणर्षये ।
नराय शुद्धभक्ताय सा च विद्या मनोहरा ॥ ४०॥
नवाक्षरी महाविद्या कामदेवेन सेवीता ।
तदधीनं सर्वविश्वं पूज्यया विद्यया यया ॥ ४१॥
सम्प्राप दाहिकां शक्तिं वह्निश्च विद्यया यया ।
नवाक्षरी महाविद्या वायुना परिषेविता ॥ ४२॥
विश्वेषां प्राणरूपश्च पूज्यया विद्यया यया ।
सर्वाधारश्च पूज्यश्च बलवान् सर्वतोऽभवत् ॥ ४३॥
शेषाधारश्च कूर्मश्च पूज्यया विद्यया यया ।
विश्वाधारश्च शेषश्च तया च विद्यया यया ॥ ४४॥


From http://sanskritdocuments.org

धराधरा च सर्वेषां तया च विद्यया सदा ।
तयैव विद्यया शुद्धा रङ्गा भुवनपावनी ॥ ४५॥
तयैव तुलसी शुद्धा तीर्थपूता बभूव सा ।
तया स्वाहा वह्निजाया पितृणां कामिनी स्वधा ॥ ४६॥
लक्ष्मीर्माया कामवाणी सर्वाद्या प्रणवादिका ।
रामेश्वरी राधिका सा ङेन्ता वह्निप्रियान्तका ॥ ४७॥
तत्षोडशी महाविद्या परिपूर्णतमा श्रुतौ ।
कामधेनुस्वरूपा सा सर्वसिद्धिप्रदायिनी ॥ ४८॥
पुरा सनत्कुमारेण षोडशी परिसेविता ।
सनकेन सनन्देन तथा सनातनेन च ॥ ४९॥
शुक्रेण गुरुणा पूज्या सिद्धा व्यासेन सेविता ।
पपौ समुद्रं सोऽगस्त्यः पूज्यया विद्यया यया ॥ ५०॥
रमेश्वरी ङेन्तहीना षोडश्या मुनिपङ्गव ।
दधीचिना सेविता सा विद्या च द्वादशाक्षरी ॥ ५१॥
तया तदस्थि चाव्यर्थमन्त्रमेव बभूव ह ।
चतुर्दशेन्द्रावच्छिन्नं मुनिरासीन् निरापदः ॥ ५२॥
स्वेच्छामृत्युर्मुनिश्चैव जितः कालोऽपि विद्यया ।
देवानां प्राथनेनैव तत्याज स कलेवरम् ॥ ५३॥
मत्तो मन्त्रं गृहीत्वा च जजाप पुष्करे मुनिः ।
शतवर्षं तपस्तप्ता ददर्श परमेश्वरीम् ॥ ५४॥
दत्वा सा स्वपदं तस्मै गोलोकं च जगाम सा ।
देहं त्यक्त्वा च स मुनिर्गोलोकं प्रययौ पुरा ॥ ५५॥
इत्येवं कथितं वत्स कवचं परमाद्भुतम् ।
परमानन्दसन्देहं वेदेषु च सुदुर्लभम् ॥ ५६॥
श्रीकृष्णेनैव कथितं मह्यं भक्ताय भक्तितः ।
मया तुभ्यं प्रदत्तं च प्रवक्तव्यं न कस्यचित् ॥ ५७॥
गुरुमभ्यर्च्य विधिना वस्त्रालंकारचन्दनैः ।
नमस्कृत्य परं भक्त्या कवचं धारयेत् सुधीः ॥ ५८॥
पठित्वा कवचं दिव्यं परमादरपूर्वकम् ।
गुरवे दक्षिणां दत्वा लभेत् तस्य शुभाशिषम् ॥ ५९॥
महामूढो नोपदिष्टः कवचं धारयेत् पठेत् ।
निष्फलं तद् भवेत् सर्वं शतलक्षं जपेद् यदि ॥ ६०॥
उपदिष्टो यदि पठेत् धारयेत् कण्ठदेशतः ।
जले वह्नौ च शस्त्रास्ते मरणं नो भवेद् ध्रुवम् ॥ ६१॥
कवचस्य प्रसादेन जीवन्मुक्तो भवेन् नरः ।
अनेन कवचनेनैव शङ्खचूडः प्रतापवान् ॥ ६२॥



From http://sanskritdocuments.org

युयुधे स मया सार्धं वर्षं च नर्मदातटे ।
न विद्धो मम शूलेन दत्वा च कवचं मृतः ॥ ६३॥
सर्वाण्येव हि दानानि व्रतानि नियमानि च ।
तपांसि यज्ञाः पुण्यानि तीर्थान्यनशनानि च ॥ ६४॥
सर्वाणि कवचस्यास्य कलां नार्हन्ति षोडशीम् ।
इदं कवचमज्ञात्वा भजेद् यः परमेश्वरीम् ॥ ६५॥
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ।
इत्येवं कथितं सर्वं राधिकाकवचं मुने ॥ ६६॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे
हरिभक्तिज्ञानकथने
कवचप्रकाशनं नाम
पञ्चमोऽध्यायः
॥ ५॥

---

(६)
द्वितीयरात्रे षष्टोऽ ध्यायः
अथ राधाप्रशंसा

श्रीमहादेव उवाच --
जगन्मातुरुपाख्यानं तुभ्यं च कथितं मया ।
सुदुर्लभं सुगुप्तं च वेदेषु च चतुर्षु च ॥ १॥
पुराणेष्वितिहासेषु पञ्चरात्रेषु पञ्चसु ।
अतीव पुण्यदं शुद्धं सर्वपापप्रणाशनम् ॥ २॥
संक्षेपेणैव कथितं राधाख्यानं मनोहरम् ।
कापिलेये पञ्चरात्रे विस्तीर्णमतिसुन्दरम् ॥ ३॥
नारायणेन कथितं मुनये कपिलाय च ।
सिद्धक्षेत्रे पुण्यतमे प्रत्यक्षं मम सन्निधौ ॥ ४॥
तत्रोक्तं हरिणा सार्धं सुश्राव कमलोद्भवः ।
शुश्रुवुर्मुनयः सर्वे चेदमेव परं वचः ॥ ५॥
आदौ समुच्चरेद् राधां पश्चात् कृष्णं च माधवम् ।
विपरीतं यदि पठेत् ब्रह्महत्यां लभेद् ध्रुवम् ॥ ६॥
श्रीकृष्णो जगतां तातो जगन्माता च राधिका ।
पितुः सद्गुणो माता वन्द्या पूज्या गरीयसी ॥ ७॥


From http://sanskritdocuments.org

दैवदोषेण महता ये च निन्दन्ति राधिकाम् ।
वामाचाराश्च मूर्खाश्च पापिनश्च हरिद्विषः ॥ ८॥
कुम्भीपाके तप्ततैले तिष्ठन्ति ब्रह्मणः शतम् ।
इहैव तद्वंशहीनः सर्वनाशाय कल्पते ॥ ९॥
भवेद् रोगी च पतितो विघ्नस्तस्य पदे पदे ।
हरिणोक्तं ब्रह्मक्षेत्रे मया च ब्रह्मणा श्रुतम् ॥ १०॥
त्रैलोक्यपावनीं राधां सन्तोऽसेवन्त नित्यशः ।
यत् पादपद्मे भक्त्यार्घ्यं नित्यं कृष्णो ददाति च ॥ ११॥
यत् पादपद्मनखरे पुण्ये वृन्दावने वने ।
सुस्निग्धालक्तकरसं प्रेम्ना भक्त्या ददौ परा ॥ १२॥
राधाचर्विततताम्बूलं चखाद मधुसूदनः ।
द्वयोश्चैके न भेदश्च दुग्धघावल्ययोऽर्था ॥ १३॥
श्रीकृष्णोरसि या राधा यद् वामांशेन सम्भवा ।
महालक्ष्मीश्च वैकुण्ठे सा च नारायणोरसि ॥ १४॥
सरस्वती सा च देवी विदुषां जननी परा ।
क्षीरोदसिन्धुकन्या सा विष्णोरुरसि मायया ॥ १५॥
सावित्री ब्रह्मणो लोके ब्रह्मवक्षस्थलस्थिता ।
पुरा सुराणां तेजःसु साविर्भूत्वा दया हरेः ॥ १६॥
स्वयं मूर्तिमती भूत्वा जघान दैत्यसङ्घकान् ।
ददौ राज्यं महेन्द्राय कृत्वा निष्कण्टकं पदम् ॥ १७॥
कालेन सा भगवती विष्णुमाया सनातनी ।
बभूव दक्षकन्या च परं कृष्णाज्ञया मुने ॥ १८॥
त्यक्त्वा देहं पितुर्यज्ञे ममैव निन्दया मुने ।
पितृणां मानसी कन्या मेना कन्या बभूव सा ॥ १९॥
आविर्भूता पर्वते सा तेनेयं पार्वती सती ।
सर्वशक्तिस्वरूपा सा दुर्गा दुर्गतिनाशिनी ॥ २०॥
बुद्धिस्वरूपा परमा कृष्णस्य परमात्मनः ।
सम्पद् रूपेन्द्रगेहे सा स्वर्गलक्ष्मीस्वरूपिणी ॥ २१॥
मर्त्ये लक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे ।
पृथक् पृथक् च सर्वत्र ग्रामेषु ग्रामदेवता ॥ २२॥
जले सत्यस्वरूपा सा गन्धरूपा च भूमिषु ।
शब्दरूपा च नभसि शोभारूपा निशाकरे ॥ २३॥
प्रभारूपा भास्करे सा नृपेन्द्रेषु स सर्वतः ।
बह्नौ सा दाहिका शक्तिः सर्वशक्तिश्च जन्तुषु ॥ २४॥
सृष्टिकाले च सा देवी मूलप्रकृतिरीश्वरी ।
माता भवेन् महाविष्णोः स एव महान् विराट् ॥ २५॥


From http://sanskritdocuments.org

यस्य लोमसु विश्वानि तेन वासुः प्रकीर्तितः ।
तस्य देवोऽपि श्रीकृष्णो वासुदेव इतीरितः ॥ २६॥
महतो वै सृष्टिविधौ चाहङ्कार्यभवन् मुने ।
ततो हि रूपतन्मात्रं शब्दतन्मात्र इत्यतः ॥ २७॥
ततो हि स्पर्शतन्मात्रमेवं सृष्टिक्रमो मुने ।
सृष्टिबीजस्वरूपा सा नहि सृष्टिस्तया विना ॥ २८॥
विना मृदं घटं कर्तुं कुलालश्च न च क्षमः ।
विना स्वर्णं स्वर्णकारः कुण्डलं कर्तुमक्षमः ॥ २९॥
एवं ते कथितं सर्वमाख्यानमतिदुर्लभम् ।
जन्ममृत्युजराव्याधिशोकदुःखहरं परम् ॥ ३०॥
आराध्य सुचिरं कृष्णं यद् यत् कार्यं भवेन् नृणाम् ।
राधोपासनया तच्च भवेत् स्वल्पेन कालतः ॥ ३१॥
तस्यापि मायया सार्धं सर्वं विश्वं महामुने ।
विष्णुमाया भगवती कृपां यं यं करोति च ॥ ३२॥
स च प्राप्नोति कृष्णं च तद्भक्तिदास्यमीस्पितम् ।
इत्येवं कथितं सर्वं परं च सुखमोक्षदम् ।
नातिसारं च सुभदं किं भूयः श्रोतुमिच्छसि ॥ ३३॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे
शिवनारदसंवादे भक्तिज्ञानकथने
राधाप्रशंसा नाम
षष्ठोऽध्यायः
॥ ६॥

---

(७)

द्विटियरात्रे सप्तमोऽध्यायः

श्रीनारद उवाच --
भक्तिज्ञानं श्रुतं नाथ परमाद्भुतमीप्सितम् ।
मुक्तिज्ञानविधानं च विस्तीर्णं वक्तुमर्हसि ॥ १॥

श्रीमहादेव उवाच --
लीनता हरिपादाब्जे मुक्तिरत्यभिधीयते ।


From http://sanskritdocuments.org

इदमेव हि निर्वाणं वैष्णवानामसम्मतम् ॥ २॥
सालोक्यसार्ष्टिसामीप्यसारूप्यमित्यतः क्रमात् ।
भोगरीपं च सुखदमित् मुक्तिचतुष्टयम् ॥ ३॥
श्रीहरेर्भक्तिदास्यं च सर्वमुक्तेः परं मुने ।
वैष्णवानामभिमतं सारात् सारं परात् परम् ॥ ४॥
काश्यां च मरणं पुत्र परं निर्वाणाकारणम् ।
दक्षकर्णे मृत्युकाले मयोक्तं मन्त्रमेव च ॥ ५॥
निर्वाणमोक्षदं वत्स कर्ममूलनिकृन्तनम् ।
निर्वाणमोक्षमेवेदं मोक्षविद्भिः प्रकीर्तितम् ॥ ६॥
गङ्गायां च जले मुक्तिः क्षेत्रे नारायणे मुने ।
ज्ञानतश्चेत् त्यजेत् प्राणान् कृष्णस्मरणपूर्वकम् ।
जले स्थले चान्तरीक्षे गङ्गासागरसंगमे ॥ ७॥

श्रीनारद उवाच --
प्राणिनां येन मन्त्रेण मुक्तिर्भवति शाश्वती ।
वाराणस्यां त्वयोक्तं च तन् मां कथितुमर्हसि ॥ ८॥
अन्यथाहं कृपासिन्धो सद्यस्त्यक्ष्ये कलेवरम् ।
मां भक्तमनुरक्तं च नाथ मा कुरु वञ्चनाम् ॥ ९॥

श्रीमहादेव उवाच --
गुप्तं वेदपुराणेषु चेत् इतिहासेषु नारद ।
पञ्चरात्रेषु सर्वेषु कथं वक्ष्यामि मां वद ॥ १०॥
अहं हत्याभयेनैव वक्ष्यामि गोपनं परम् ।
श्रूयतां दक्षकर्णे च न वक्तव्यं कदाचन ॥ ११॥
मन्त्रोऽयं मन्त्रसाराद् यः सर्वाद्यबीजमध्यमः ।
पञ्चवर्गाद्द्वितीयश्च वर्णश्च गुरुमान् भवेत् ॥ १२॥
पञ्चमे पन्ह्चमो वर्णो विष्णुमान् ङेन्त एव सः ।
जगत्पूतिप्रियान्तश्च मन्त्रः सप्ताक्षरो मुने ॥ १३॥
प्रयागे मुण्डनं चैव परं निर्वाणकारणम् ।
दोलायमानं गोविन्दं पुण्ये वृन्दावने वने ॥ १४॥
दृष्टिमात्रेण विप्रेन्द्र परं निर्वाणकारणम् ।
निर्वाणं दृष्टिमात्रेण मञ्चस्थं मधुसूदनम् ॥ १५॥
रथस्थं वामनं चैव निर्वाणं दृष्टिमात्रतः ।
कार्तिकीपूर्णिमायां व राधार्चादृष्टिपूजनम् ॥ १६॥
यत्र तत्र न नियमो परं निर्वाणकारणम् ।
परं शिवचतुर्दश्यां शिवं संस्थाप्य पूजनम् ॥ १७॥


From http://sanskritdocuments.org

तद्दिनेऽनशनं विप्र परं निर्वाणकारणम् ।
शुभाशुभं च यत् कर्म तत् तत् कर्मनिकृन्तनम् ॥ १८ ॥
स्मरणं श्रीहरेः पादपद्मं निर्वाणकारणम् ।
वैशाख्यां पुष्करस्नानं परं निर्वाणकारणम् ॥ १९ ॥
गङ्गासागरतोये च मृत्युर्निर्वाणकारणम् ।
कार्तिक्यां च शिलादानं पृथिवीविपुलद्दानकम् ॥ २० ॥
कार्तिके तुलसीदानं परं निर्वाणकारणम् ।
ब्रह्मसंस्थापनं चैव परं निर्वाणकारणम् ॥ २१ ॥
कन्यादानं वैष्णवाय परं निर्वाणकारणम् ।
परं निर्वाणबीजं च वैष्णवोच्छिष्टभक्षणम् ॥ २२ ॥
विष्णुमन्त्रोपासकानां द्विजानां च द्विजर्षभ ।
तत्पादोदकभक्षं च परं निर्वाणकारणम् ॥ २३ ॥
स्वर्णशृङ्गनिबद्धानां गवां लक्षप्रदानकम् ।
पृथिवीदानं च विप्रेन्द्र परं निर्वाणकारणम् ॥ २४ ॥
परे नारायणक्षेत्रे लक्षनाम हरेर्जपेत् ।
नाशनं सर्वपापानां परं निर्वाणकारणम् ॥ २५ ॥
शिवलक्ष्यार्चनं भक्त्या क्षेत्रे नारायणे मुने ।
विधिवद्दक्षिणादानं परं निर्वाणकारणम् ॥ २६ ॥
परं राधेशयोर्मन्त्रग्रहणं वैष्णवाद् द्विजात् ।
शुद्धे नारायणक्षेत्रे परं निर्वाणकारणम् ॥ २७ ॥
ग्रन्थाष्टादशसाहस्रं द्वादशस्कन्धसम्मितम् ।
शुकप्रोक्तं भागवतं श्रुत्वा निर्वाणतां व्रजेत् ॥ २८ ॥
पुरा भगवता प्रोक्तं कृष्णेन ब्रह्मणे मुने ।
पुराणसारं शुद्धं तत् तेन भागवतं विदुः ॥ २९ ॥
ब्रह्मवैवर्तं श्रवणं परं निर्वाणकारणम् ।
यत्रैव विवृतं ब्रह्म शुद्धं निर्गुणमीस्पितम् ॥ ३० ॥
ब्रह्मप्रकृतिगणेशकृष्णाविर्भाववर्णनम् ।
चतुःखण्डपरिमितं ब्रह्मवैवर्तमीस्पितम् ॥ ३१ ॥
पराशरकृतं पुण्यं धन्यं विष्णुपुराणकम् ।
भक्त्या तच्छ्रवणं वत्स परं निर्वाणकारणम् ॥ ३२ ॥
यत्र तत्र दिने वत्स हरेर्नामानुकीर्तनम् ।
परं निर्वाणबीजं च श्रीकृष्णव्रतपूजनम् ॥ ३३ ॥
यद् यत् कृतं सतां कर्म कृष्णे भक्त्या तदर्पणम् ।
कर्मनिर्मूलनं तच्च स्मरणं मुक्तिकारणम् ॥ ३४ ॥
यद् एकशब्दश्रवणं पञ्चरात्रेषु पञ्चसु ।
उपदिष्टं ब्राह्मणाच्च परं निर्वाणकारणम् ॥ ३५ ॥


From http://sanskritdocuments.org

पतिव्रतानां भक्त्या च भर्तुश्चरणसेवनम् ।
द्विजार्चनं च शूद्राणां परं निर्वाणकारणम् ॥ ३६॥
चतुर्वर्णामपि वर्णानां गुरुकृष्णार्चनं परम् ।
द्विजानां वैष्णवानां च सेवनं मुक्तिकारणम् ॥ ३७॥
आषाढीकार्तिकीमाघीवैशाखीपूर्णिमासु च ।
तीर्थस्नानं प्रदानं च परं निर्वाणकारणम् ॥ ३८॥
पितृमातृगुरूणां च सेवनं मुक्तिकारणम् ।
निग्रहश्च हृषीकाणां केवलं मुक्तिकारणम् ॥ ३९॥
स्वधर्माचरणं शुद्धं विधर्माच्च निवर्तनम् ।
वेदोक्ताचरणं विप्र परं निर्वाणकारणम् ॥ ४०॥
दानं हिंसाविहीनं च कृतं चानशनं मुने ।
निर्लिप्तं शोभनं कर्म परं निर्वाणकारणम् ॥ ४१॥
देवानां सात्त्विकी पूजा शुभदा मुक्तिदा मुने ।
अहिंसा परमो धर्मः परं निर्वाणकारणम् ॥ ४२॥
सत्यत्रेताद्वापरेषु संन्यासग्रहणं सताम् ।
दण्डग्रहणमात्रेण परं निर्वाणकारणम् ॥ ४३॥
कलौ दण्डग्रहणेनैव परं निर्वाणकारणम् ।
परं वेदविरुद्धं च विपरीताय कल्पते ॥ ४४॥
पुत्रबन्धुविहीनानां पालनं च स्वयोषिताम् ।
परस्त्रीवर्जनं चैव परं निर्वाणकारणम् ॥ ४५॥
तत्पालने लभेन् मोक्षं ब्रह्महत्यां च वर्जनम् ।
अनाथभगिनीकन्यावधूनां परिपालनम् ॥ ४६॥
केवलं मोक्षबीजं च तत् त्यागे नरकं ध्रुवम् ।
शिशूनामपि पुत्राणां भ्रातॄणां च तथैव च ॥ ४७॥
परित्यागे च नरकं पालनं मोक्षकारणम् ।
मन्त्रं कन्याप्रदानं च सुविप्रे मोक्षकारणम् ॥ ४८॥
जीवाभयप्रदानं च शरणागतरक्षणम् ।
आज्ञानाय ज्ञानदानं परं निर्वाणकारणम् ॥ ४९॥
मुक्तिज्ञानं च कथितं संक्षेपेण यथागमम् ।
कापिले पञ्चरात्रेषु कृष्णेनोक्तं सुविस्तरम् ॥ ५०॥
अध्यात्मिकं च कथितं प्रथमं ज्ञानमीप्सितम् ।
भक्तिज्ञानं द्वितीयं च कृष्णस्य परमात्मनः ॥ ५१॥
मुक्तिज्ञानं तृतीयं च कथितं तद् यथाक्रमम् ।
ज्ञानद्वयं चावशिष्टं यौगिकं मायिकं मुने ॥ ५२॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे


From http://sanskritdocuments.org

शिवनारदसंवादे मुक्तिज्ञानकथने
सप्तमोऽध्यायः
॥ ७॥

---

(८)
द्वितीयरात्रेऽष्टमोऽध्यायः
अथ योगज्ञानकथनम्

श्रीमहादेव उवाच --
योगज्ञानं च दुर्बोधमसतां विषमं परम् ।
श्रूयतामिदमेवेति वक्ष्यामि च यथागमम् ॥ १॥
अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वं च वशित्वं च तथा कामावसायिता ॥ २॥
दूरश्रवणमिष्टार्थसाधनं सृष्टिपत्तनम् ।
मनोयायित्वमेवेदं परकायप्रवेशनम् ॥ ३॥
प्राणिनां प्राणदानं च तेषां प्राणापहारकम् ।
कायव्यूहं च वाक्सिद्धं सिद्धं सप्तदश स्मृतम् ॥ ४॥
कृष्णभक्तिव्यवहितं भक्तानां नाभिवाञ्छितम् ।
कृष्णवेतनभुग् भोक्तुं करोति दासनां मुने ॥ ५॥
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धमपि चाज्ञाख्यं षट्चक्रं परिकीर्तितम् ॥ ६॥
शक्तिकुण्डलिनीयुक्तं स्वे स्वे स्थाने स्थितं मुने ।
योगोपयुक्तं नियतं योगविद्भिः प्रकीर्तितम् ॥ ७॥
मेध्या सा मनसा युक्ता सुनिद्राजननी नृणाम् ।
इडा सा मनसा युक्ता प्राणिनां क्षुद्विवर्धिनी ॥ ८॥
पिङ्गला मनसा युक्ता तृष्णा माता च प्राणिनाम् ।
सुषुम्ना मनसा युक्ता निद्राभङ्गाय कल्पते ॥ ९॥
चञ्चला मनसा युक्ता सम्भोगेच्छाविवर्धिनी ।
सुस्थिरा मनसा युक्ता नृणामेव विचेतनी ॥ १०॥
मनश्च नाडीषट्केषु क्रमेणैव भ्रमेद् अहो ।
अत्र नास्ति यथासंख्यं स्वेच्छाधीनं च चञ्चलम् ॥ ११॥
योनिशिश्नोपरिस्थानं मूलाधारस्य नारद ।
स्वाधिष्ठानं नाभिदेशे मणिपूरं च वक्षसि ॥ १२॥
अनाहतं तदूर्ध्वं च विशुद्धं कण्ठदेशतः ।
आज्ञाख्यं चक्षुषोर्मध्ये चक्रस्थानं प्रकीर्तितम् ॥ १३॥


From http://sanskritdocuments.org

मूलाधारौकसीडा सा स्वाधिष्ठाने च पिङ्गला ।
सुषुम्ना मणिपूरे सा सुस्थिरा साप्यनाहते ॥ १४॥
चञ्चला सा विशुद्धे च मेध्याख्या परिकीर्तिता ।
नाडीस्थानं स कथितं योगविद्भिः प्रकीर्तितम् ॥ १५॥
नाडीयुक्तेषु चक्रेषु शश्वद् वायुश्चरेद् अहो ।
बद्धो भवति स्वाज्ञाख्ये ततो मृत्युश्च प्राणिनाम् ॥ १६॥
योगी च बद्धनिश्वासो वायुधारणया मुने ।
तस्य मृत्युश्च न भवेत् साध्यवायुर्महान् वशी ॥ १७॥
वह्निस्तम्भं जलस्तम्भं मृदां च मनसस्तथा ।
वायुतम्भं बहुविधं योगी जानाति नारद ॥ १८॥
सहस्रदलपद्मं च सर्वेषां मस्तके मुने ।
तत्रैव तिष्ठति गुरुः सूक्ष्मरूपेण संततम् ॥ १९॥
तद्गुरोः प्रतिबिम्बश्च सर्वत्र नररूपकः ।
गुरुरूपो स्वयं कृष्णः शिष्याणां हितकाम्यया ॥ २०॥
गुरौ तुष्टे हरिस्तुष्टो हरौ तुष्टे जगत्त्रयम् ।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ २१॥
गुरुदेवः परं ब्रह्म गुरुः पूज्यः परात् परः ।
हरौ रुष्टे गुरौ तुष्टे गुरु रक्षितुमीश्वरः ॥ २२॥
सर्वे तुष्टा गुरौ रुष्टे न कोऽपि रक्षितुम् क्षमः ।
गुरुश्च ज्ञानाद्गिरणाज्ज्ञानं तन्मन्त्रतन्त्रयोः ॥ २३॥
तत्तन्त्रः स च मन्त्रः स्यात् कृष्णभक्तिर्यतो भवेत् ।
स एव बन्धुः स पिता सा मैत्री जननी च सा ॥ २४॥
स च भ्राता पतिः पुत्रो यः कृष्णवर्त्म दर्शयेत् ।
जलबुद्बुदवत् सर्वं विश्वं च चराचरम् ॥ २५॥
भज राधेश्वरं विप्र श्रीकृष्णं प्रकृतेः परम् ।
स गुरुः परमो वैरी भ्रष्टं वर्त्म प्रदर्शयेत् ॥ २६॥
तज्जन्मनाशं कुरुते शिष्यहत्यां भवेद् ध्रुवम् ।
सहस्रदलपद्मे च हृदयस्थो हरिः स्वयम् ॥ २७॥
सर्वेषां प्राणिनां विप्र परमात्मा निरञ्जनः ।
इति ते कथितं सर्वं योगज्ञानं चतुर्थकम् ।
यथागमं च संक्षेपं किं भूयः श्रोतुमिच्छसि ॥ २८॥

नारद उवाच --
भक्तिज्ञानं च भक्तानां योगज्ञानं च योगिनाम् ।
केषां वर्त्म प्रशस्तं च तन् मां कथितुमर्हसि ॥ २९॥


From http://sanskritdocuments.org

श्रीमहादेव उवाच --
ध्यायन्ते योगिनः सर्वे ज्योतिरूपं सनातनम् ।
निर्गुणस्य शरीरं च न मन्यन्ते च योगिनः ॥ ३०॥
शरीरं प्रकृतं सर्वं निर्गुणः प्रकृतेः परः ।
गुणेन सज्जते देहो निर्गुणस्य कुतो भवेत् ॥ ३१॥
इति सर्वं योगशास्त्रं योगविद्भिः प्रकीर्तितम् ।
वैष्णवास्तं न मन्यन्ते कुमाराद्या वयं द्विज ॥ ३२॥
वदन्ति वैष्णवाः सर्वे तेजस्तेजस्विनां वरम् ।
क्व सम्भवेद् वा क्व भवेद् इति दुर्नयमेव च ॥ ३३॥
कृष्णो नित्यः शरीरी च तस्य तेजो हि वर्तते ।
तेजोऽभ्यन्तर एवाह कृष्णमूर्तिः सनातनः ॥ ३४॥
ध्यायन्ते योगिनः सर्वे तत्तेजो भक्तिपूर्वकम् ।
सुपक्वभक्त्या कालेन योगी च वैष्णवो भवेत् ॥ ३५॥
तेजोऽभ्यन्तररूपं च ध्यायन्ते वैष्णवाः सदा ।
दासानां च कुतो दास्यं विना देहेन नारद ॥ ३६॥
वैष्णवानां मतं शस्तं सर्वेभ्योऽपि च नारद ।
न वैष्णवात् परो ज्ञानी ब्रह्माण्डेषु च ब्रह्मणः ॥ ३७॥
इति ते कथितं वत्स संक्षेपेण यथागमम् ।
को वा जानाति कात्स्न्र्येन कृष्णमाहात्म्यमीप्सितम् ॥ ३८॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे
शिवनारदसंवादे योगज्ञानकथने
अष्टमोऽध्यायः
॥ ८॥

इति द्वितीयरात्रं सम्पूर्णम्

---

नारदपञ्चरात्रे तृतीयरात्रम्

(३ १)
प्रथमोऽध्यायः

श्रीशिव उवाच --
शृणु नारद वक्ष्यामि मन्त्रयन्त्रक्रियादिकान् ।


From http://sanskritdocuments.org

पुरा व्यासेन ये प्रोक्ताः शुकं प्रति महामते ॥ १॥
प्रातःकृत्यविधिर्योऽत्र तथा स्नानविधिर्मुने ।
तथा पूजादिकं सर्वं मन्त्राक्षरसमुद्भवम् ॥ २॥
मन्त्रार्थश्च यथा येन ज्ञायते पुरुषेण हि ।
पुरा कैलासशिखरे सुखसेव्ये निरन्तरम् ॥ ३॥
पार्वती मां पुरा भक्त्या परिपप्रच्छ यत् शिवम् ।
तत् तत् शृणु महाबाहो ममैकाग्रमना मुने ॥ ४॥

पार्वत्युवाच --
देवदेव महादेव संसारार्णवतारक ।
वक्तुमर्हसि देवेश मन्त्रतन्त्रविधिं गुरो ॥ ५॥
श्रीराधायाश्च कृष्णस्य तथा पूजाविधिं मम ।
मन्त्रार्थं च तथा योगान् नाम्नामष्टोत्तरं शतम् ॥ ६॥
सहस्रं च तथा नाम्नां प्रब्रूहि मम साम्प्रतम् ।
यद्यस्ति मयि कारुण्यं यद्यस्ति मयि दोहदम् ॥ ७॥
तदा प्रब्रूहि राधाया नाम्नामष्टोत्तरं शतम् ।
सहस्रं च तथा देव मन्त्रयन्त्रविधिं मम ॥ ८॥

श्रीमहादेव उवाच --
शृणु देवि प्रवक्ष्यामि मन्त्रयन्त्रविधिं प्रिये ।
शुकं प्रति पुरा प्रोक्तं वेदव्यासेन धीमता ॥ ९॥
तत् तेऽहं सम्प्रवक्ष्यामि शृणुष्वैकमनाः प्रिये ।
यावतो मन्त्रवर्णास्तु श्रीकृष्णस्य परात्मनः ॥ १०॥

श्रीव्यास उवाच --
कलात्तमायालवकात्तमूर्तिः
कलक्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं
श्रियेऽस्तु गोपीजनवल्लभो वः ॥ ११॥

गुरुचरणसरोरुहद्वयोत्थान्
महितरजःकणकान् प्रणम्य मूर्ध्ना ।
गदितमिह विविच्य नारदाद्यैर्
यजनविधिं कथयामि शार्ङ्गपाणेः ॥ १२॥

सर्वेषु वर्णेषु तथाश्रमेषु


From http://sanskritdocuments.org

नारीषु नानाह्वयजन्मभेषु
दाता फलानामभिवाञ्छितानां
द्राग् एव गोपालकमन्त्र एषः ॥ १३॥

शृणु वत्स प्रवक्ष्यामि पूजनं शार्ङ्गधन्वनः ।
यन् नारदाय कथितं ब्रह्मणा पद्मयोनिना ॥ १४॥
प्रातःकृत्यादिकं वक्ष्ये तथा पूजाविधिं सुत ।
जगत्कल्पतरोर्वत्स शृणुष्व गदतो मम ॥ १५॥

नूनमच्युतकटाक्षपातेन
कारणं भवति भक्तिरञ्जसा ।
तच्चतुष्टयफलाप्तये ततो
भक्तिमान् अधिकृतो हरौ गुरौ ॥ १६॥

स्नातो निर्मलशुद्धसूक्ष्मवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तः सपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबद्ध्यसुदृढं पद्मासनं स्वस्तिकं
वासीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥ १७॥

ततोऽस्त्रमन्त्रेण विशोध्य पाणी
त्रितालदिग्बन्धहुताशशालान् ।
विधाय भूतात्मकमेतदङ्गं
विशोधयेच्छुद्धमतिः क्रमेण ॥ १८॥

इडावक्त्रे धूम्रं सततगतिबीजं सलवकं
स्मरेत् पूर्वं मन्त्री सकलभुवनोच्छोषणकरम् ।
स्वकं देहं तेन प्रततवपुषापूर्यसकलं
विशोष्य व्यामुञ्चेत् पवनमथ मार्गणखमणेः ॥ १९॥

तेनैव मार्गेण विलीनमारुतं
बीजं विचिन्त्यारुणमाशुशुक्षणे ।
आपूर्य देहं परिदह्य वामती
मुञ्चेत् समीरं सह भस्मना बहिः ॥ २०॥

टपरमतीव शुद्धममृतांशुपथेन विधुं
नयतु ललाटचन्द्रममुतः सकलार्णमयीम् ।



From http://sanskritdocuments.org

लपरजपान् निपात्य रचयेच्च तया सकलं
वपुरमृतौघवृष्टिमथ वक्त्रकराङ्गमिदम् ॥ २१॥

शिरोवदनवृत्तदृक्श्रवणघोणगण्डोष्ठदद्
द्वये च सशिरोमुखेऽच इति च क्रमाद् विन्यसेत् ।
हलश्च करपादसन्धिषु तदग्रकेष्वादरात्
सपार्श्वयुगपृष्ठनाभ्युदरकेषु याद्यान् अथ ॥ २२॥

हृदयकक्षककुत्करमूलदोः
पदयुगोदरवक्त्रगतान् बुधः ।
हृदयपूर्वमनेन पथान्वहं
न्यसतु शुद्धकलेवरसिद्धये ॥ २३॥

इत्यारचय्य वपुरर्णशतार्धकेन
सार्धक्षपेशसविसर्गकसोभयैस्तैः ।
विन्यस्य केशवपुरःसरमूर्तियुक्तैः
कीर्त्यादिशक्तिसहितैर्न्यसतु क्रमेण ॥ २४॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे प्रातःकृत्ये
प्रथमोऽध्यायः
॥ ३ १॥

---

(३ २)

तृतीयरात्रे द्वितीयोऽध्यायः
अथ प्रातःकृत्यम्

व्यास उवाच --
अथ कथयाम्यर्णानां मूर्तीः
शक्तीः समस्तभुवनमयीः ।
केशवकीर्ती नारायणकान्ती
माधवस्तथा तुष्टिः ॥ १॥

गोविन्दः पुष्टियुतो विष्णुधृती सूदनश्च मध्वाद्यः ।
शान्तिस्त्रिविक्रमश्च क्रियायुतो वामनो दयायुक्तः ॥ २॥


From http://sanskritdocuments.org

श्रीधरयुता च मेधा हृषीकनाथश्च हर्षया युक्तम् ।
अम्बुजनाभश्रद्धे दामोदरसंयुता तथा लज्जा ॥ ३॥
लक्ष्मीः सवासुदेवा सङ्कर्षणकः सरस्वतीयुक्तः ।
प्राद्यो द्युम्नः प्रीतिसमेतोऽनिरुद्धको रतिरिमाः स्वरोपेताः ॥ ४॥
चक्रिजये गदिदुर्गे शार्ङ्गी प्रभयान्वितस्तथा खड्गी ।
सत्या शङ्खीचण्डा हलिवाण्यौ मुसलियुग्बलासिन्किआ ॥ ५॥
शूली विजया पाशी विरजा विश्वान्वितोऽम्बुशीर्भूयः ।
विमदा मुकुन्दयुक्ता नन्दजसुनन्दजे स्मृतिश्च नन्दियुता ॥ ६॥
नरऋद्धी नरकजिता समृद्धिरथ शुद्धियुग् घरिः कृष्णः ।
बुद्धियुतः सत्ययुतभक्तिर्मतियुक्तः स्यात् ततः शौरिः ॥ ७॥
क्षमया शूरो रमया जनार्दनो मेचभूधरः क्लेदी ।
विश्वाद्यमूर्तियुक्ता क्लिन्ना वैकुण्ठयुक् तथा वसुदा ॥ ८॥
पुरुषोत्तमश्च वसुधा बलिना च वरा बलानुजोपेता ।
भूयः परायणाख्या बालः सूक्ष्मा वृषघ्नसन्ध्ये च ॥ ९॥
सवृषा प्रज्ञा हंसः प्रभा वराहो निशा च विमलोऽमोघा ।
नरसिंहविद्युते च प्रणिगदिता मूर्तयो हलां शक्तियुताः ॥ १०॥

वर्णान् उक्त्वा सार्धचन्द्रान् पुरस्तान्
मूर्तीः शक्तीर्ङेऽवसाना नतिं च ।
उक्त्वा न्यस्येत् यादिभि सप्तधातून्
प्राणं जीवं क्रोधमप्यात्मनेऽन्तान् ॥ ११॥

उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥ १२॥

ध्यात्वैवं परमपुमांसमक्षरैर्यो
विन्यस्योद्दिनमनु केशवादियुक्तैः ।
मेधायुःस्मृतिधृतिकीरित्कान्तिलक्ष्मी
सौभाग्यैश्चिरमुपबृंहितो भवेत् सः ॥ १३॥

अमुमेव रमापुरःसरं
प्रभजेद् यो मनुजो विधिं बुधः ।
समुपेत्य रमां प्रथीयसीं
पुनरन्ते हरितां व्रजत्यसौ ॥ १४॥


From http://sanskritdocuments.org

इत्यच्युतीकृततनुर्विदधीत तत्त्व
न्यासं मपूर्वकपराक्षरनत्युपेतम् ।
भूयः पराय च तदाह्वयमात्मने च
नत्यन्त्यमुद्धरतु तत्त्वमनून् क्रमेण ॥ १५॥

सकलवपुषि बीजं प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री ।
कमुखहृदयगुह्याङ्घ्रिष्वथो शब्दपूर्वं
गुणगणमथ कर्तादिस्थितं श्रोत्रपूर्वम् ॥ १६॥

वागादीन्द्रियवर्गमात्मनिलयेष्वाकाशपूर्वं गणं
मूर्ध्यास्ये हृदये शिरे चरणयोर्हृत्पुण्डरीकं हृदि ।
बिम्बानि द्विषडष्टयुग्दशकलाव्याप्तानि सूर्योडुराड्
वह्नीनां च यतस्तु भूतवसुमुष्यन्त्याक्षरैर्मन्त्रवित् ॥ १७॥

अथ परमेष्ठिपुमांसौ विश्वनिवृत्ती सर्वहत्युपनिषदं
न्यसेद् आकाशादिस्थानस्थानषोयबलवार्थिः सलावः ॥ १८ ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नाश्चानिरुद्धकः
नारायणश्च क्रमशह् परमेष्ठ्यादिभिर्युतः ॥ १९ ॥

ततः कोपतत्त्वं क्षरौ विन्दुयुक्तं
नृसिंहं न्यसेत् सर्वगात्रेषु तज्ज्ञः ।
क्रमेणेति तत्त्वात्मको न्यास उक्तः
स्वासान् निकृद्विश्वमूर्त्यादिषु स्यात् ॥ २०॥

इति कृतोऽधिकृतो भवति ध्रुवं
सकलवैष्णवमन्त्रजपादिषु ।
पवनसंयवलतत्त्वमनुना चरेत्
तत्त्वमिह जप्तुमसौ मनुच्छति ॥ २१॥

अथवाखिलेषु हरिमन्त्र
जपविधिषु मूलमन्त्रतः ।
संयमनममलधीर्मरुतो
विधिनाभ्यसंश्चरतु तत्त्वसङ्ख्यया ॥ २२॥



From http://sanskritdocuments.org

पुरतो जपस्य परतोऽपि
विहितमथ तत्त्रयं बुधैः ।
षोडश य इह समाचरेद् दिनेशः
परिपूयते स खलु मासतोऽ हंसः ॥ २३॥

अयवाङ्गजन्ममममुनानुसुसंयमं
सकलेषु कृष्णमनुजापकर्मसु ।
सहितैकसप्तकृतिवारमभ्यसेत्
तनुयात् समस्तदुरितापहारिणा ॥ २४॥

अष्टाविंशतिसङ्ख्यमिष्टफलदं मन्त्रं दशार्णं जपन्
नायच्छेत् पवनं सुसंयतमतिस्त्वष्टौ दशार्णेन चेत् ।
अभ्यस्यन्न् अविवारमन्यमनुभिर्वर्णानुरूपं जपन्
कुर्याद् रेचकपूर्वकमनिपुणः प्राणप्रयोगं नरः ॥ २४॥

रेचयेन् मारुतं दक्षया दक्षिणः
पूरयेद् वामया मध्यनाड्या पुनः ।
धारयेद् ईरितं रेचकादित्रयं स्यात्
कलादन्तविद्याख्यमात्रात्मकम् ॥ २५॥

प्राणायामं विधायेत्यथ निजवपुषा कल्पयेद् योगपीठम् ।
न्यस्येद् आधारशक्तिप्रकृतिकमठक्ष्माक्षीरसिन्धून् ।
श्वेतद्वीपं च रत्नोज्ज्वलमहितमहामण्डपं कल्पवृक्षम् ।
हृद्देशेऽंशद्वयोरूद्वयवदनकटीपार्श्वयुग्मेषु भूयः ॥ २६॥

धर्माद्यधर्मादि च पादगात्र
चतुष्टयं हृद्यथ शेषमन्त्रम् ।
सूर्येन्दुवह्नीन् प्रणवआंशयुक्तान्
स्वाद्यक्षरैः सत्त्वरजस्तमांसि ॥ २७॥

प्राणायामं विधायेत्यथ निजवपुषा कल्पयेद् योगपीठम् ।
न्यस्येद् आधारशक्तिप्रकृतिकमठक्ष्माक्षीरसिन्धून् ।
श्वेतद्वीपं च रत्नोज्ज्वलमहितमहामण्डपं कल्पवृक्षम् ।
हृद्देशेऽंशद्वयोरूद्वयवदनकटीपार्श्वयुग्मेषु भूयः ॥ २८॥

धर्माद्यधर्मादि च पादगात्र



From http://sanskritdocuments.org

चतुष्टयं हृद्यथ शेषमन्त्रम् ।
सूर्येन्दुवह्नीन् प्रणवआंशयुक्तान्
स्वाद्यक्षरैः सत्त्वरजस्तमांसि ॥ २९ ॥

आत्मादित्रयमात्मबीजसहितं व्योमाग्निमायालवैर्
ज्ञानात्मानमथाष्टदिक्षु परितो मध्ये च शक्तीर्नव ।
न्यस्त्वा पीठमनुं च तत्र विधिवत् तत्कर्णिकामध्यगं
नित्यानन्दचितिप्रकाशममृतं संचिन्तयेन् नाम तत् ॥ ३० ॥

विमलोत्कर्षणी ज्ञाना क्रिया योगेति शक्तयः ।
प्रह्वी सत्या तथेशानाऽनुग्रा नवमी तथा ॥ ३१ ॥
तारं हृदयं भगवान् विष्णुः सर्वान्वितश्च भूतात्मा
ङेऽन्ताः सवासुदेवाः सर्वत्मयुतश्च संयोगः ॥ ३२ ॥
योगावधौ च पद्मं पीठात्मा ङेयुतो नतिश्चान्ते ।
पीठमहामनुरक्तः पर्याप्तोऽयं सपर्यासु ॥ ३३ ॥

करयोर्युगलं विधाय मन्त्रात्मकम्
अभ्यान अभिराम्यमानमार्गात् ।
सकलं विदधीत मन्त्रवर्णैः
परमं ज्योतिरनुत्तमं हरेस्तत् ॥ ३४ ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे प्रातःकृत्ये
द्वितीयोऽध्यायः
॥ ३ २ ॥

---

(३ ३)

तृतीयरात्रे द्वितीयोऽध्यायः

व्यास उवाच --
अथ वक्ष्ये महामन्त्रं शृणुष्वावहितो मुने ।
यं लब्ध्वा न पुनर्गच्छेत् संसृतिं पामरोऽपि हि ॥ १ ॥

वक्ष्ये मनुं त्रिभुवनप्रथितात्मभावम्
अक्षीणपुण्यनिचयैर्मुनिभिर्विमृग्यम् ।


From http://sanskritdocuments.org

पक्षीन्द्रकेतुविषयं वसुधर्मकाम
मोक्षप्रदं सकलकर्मणि कर्मदक्षम् ॥ २॥

अतिगुह्यमबोधतूलराशि
ज्वलनं वागाधिपत्यदं नराणाम् ।
दुरितापहरं विषापमृत्यु
ग्रहरोगादिनिवारणैकहेतुम् ॥ ३॥

जयदं प्रधनेऽभयदं विपिने
सलिलप्लवने सुखतारणदम् ।
नरसप्तिरथद्विपवृद्धिकरं
सुतगोधरणीधनधान्यकरम् ॥ ४॥

बलवीर्यशौर्यनिचयप्रतिभा
स्वरवर्णकान्तिसुभगत्वकरम् ।
ब्रह्माण्डकोटिमणिमादिगुणा
ष्टकदं किमत्र बहुनाखिलदम् ॥ ५॥

शार्ङ्गी सोऽतुरदन्तः परो रामाक्षियुक् द्वितीयार्णम् ।
शूली सौरिर्बालो बलानुजद्वयमथाक्षरचतुष्टयम् ॥ ६॥

शूरतुरीयः सानन आवृत्तः स्यात् सुशोभोऽष्तमोऽग्निसखः ।
तद्दयिताक्षरयुग्मं तदुपरिगस्त्वेवमुद्धरेन् मन्त्रम् ॥ ७॥
प्रकाशितो दशाक्षरो मनुस्त्वयं मधुद्विषः ।
विशेषतः पदारविन्दयुग्मं भक्तिवर्धनः ॥ ८॥

नारदो मुनिरमुष्य कीर्तितश्
छन्द उक्तम् ऋषिभिर्विराड् इति ।
देवतासकललोकमङ्गलो
नन्दगोपतनयः समीरितह् ॥ ९॥

अङ्गानि पञ्च हुतभुग् दयितासमेतैश्
चक्रैरमुष्य मुखवृत्तविषूपपन्नैः ।
त्रैलोक्यरक्षणयुजाप्यसुरान्तकाख्य
पूर्वेण चेह कथितानि विभक्तियुक्तैः ॥ १०॥



From http://sanskritdocuments.org

sanskritdocuments.org

हृदये नतिः शिरसि पावकप्रिया
सवषट्शिखाहुमिति वर्मणि स्थितम् ।
सफडस्त्रमित्युदितमङ्गपञ्चकं
सचतुर्थिवौषडुदितं दृशोर्यदि ॥ ११॥

मन्त्रार्णैर्दशभिरुपेतचन्द्रखण्डैर्
अङ्गानां दशकमुदीरितं नमोऽन्तम् ।
हृद्च्छीर्षं तदनु शिखातनुत्रमन्त्रं
पार्श्वद्वन्द्वसकटिपृष्ठम्मूर्धयुक्तम् ॥ १२॥

रक्षे मन्त्रस्यास्य बीजं च शक्ति
चक्री शक्री वामनेत्रदीप्तः ।
सप्रद्युम्नो बीजमेतत्प्रदीप्तं
मन्त्रः प्रद्युम्नो जगन्मोहनोऽयम् ॥ १३॥

हंसो मेदो वक्रवृत्ताभ्युपेतः
पोत्री नेत्राद्यन्वितोऽसौ युगार्णा ।
प्रोक्ता शक्तिः सर्वगीर्वाणवृन्दैर्
वन्दस्याग्नेर्वल्लभा कामदेयम् ॥ १४॥

विन्योगस्य मन्त्रस्य पुरुषार्थचतुष्टये ।
कृष्णं प्रकृतिरित्युक्तो दुर्गाधिष्ठातृदेवता ॥ १५॥

गोपायेति सकलमिदं गोपायति परं पुमांसमिति गोपी ।
प्रकृतेस्तस्या जातं जन इति नदादिकं पृथिव्यन्तम् ॥ १६॥

अनयोर्गोपीजनयोः समीरणाद् आश्रितो व्याप्त्या ।
वल्लभ इत्युपदिष्टं सान्द्रानन्दं निरञ्जनं ज्योतिः ॥ १७॥
स्वाहेत्यात्मानं गमयामीत्यतेजसे तस्मै ।
यः कार्यकारणेशः परमात्मेत्यच्युतैकतास्य मनोः ॥ १८॥

अथवा गोपीजन इति समस्तजगद्धनशक्तिसमुदायः ।
तस्य स्वानन्यस्य स्वामी वल्लभ इति ह निर्दिष्टः ॥ १९॥

अथवा व्रजयुवतीनां दयिताय जुहोमि मां मदीयम्
अपीत्यर्पयेत् समस्तं ब्रह्मणि सुगणे समस्तसम्पत्त्यै ॥ २०॥



From http://sanskritdocuments.org

कृष्शब्दः सत्तार्थो
णश्चानन्दात्मकस्ततः कृष्णः ।
भक्ताघकर्षणाद् अपि
तद्वर्णत्वाच्च मन्त्रमयवपुषः ॥ २१ ।

गोशब्दवाचकत्वाज्ज्ञानं
तेनोपलभ्यते गोविन्दः ।
वेत्तीति शब्दराशिं गोविन्दो
गोविचारनाद् अपि च ॥ २२॥

एतेऽभिख्येऽनुक्रमतस्तूर्यविभक्त्या
मन्त्रात् पूर्वं मन्मथबीजाद् अथ पश्चात् ।
स्यातां चेद् अष्टादशवर्णो मनुवर्यो
गुह्याद् गुह्यो वाञ्छितचिन्तामणिरेषः ॥ २३॥

पूर्वप्रदिष्टे मुनिदेवतेऽस्य छन्दस्तु गायत्रमुशन्ति सन्तः ।
अङ्गानि मन्त्रार्णचतुष्कैर्वर्मावसानानि युगार्णमस्त्रम् ॥ २४॥

बीजं शक्तिः प्रकृतिर्विनियोगश्चापि पूर्ववद् अमुष्य ।
पूर्वतरस्य मनोरथं कथयामि न्यासमखिलसिद्धिकरम् ॥ २५॥

व्यापय्यार्थो हस्तयोर्मन्त्रम्
अन्तर्बाह्ये पार्श्वे तारंरुद्धं बुधेन ।
न्यासो वर्णैस्तारयुग्मान्तरस्थैर्
बिन्दूत्तंसैर्हार्दहृद्यैर्विधेयः ॥ २६॥

शाखासु त्रीणि पर्वाण्यधि दशसु पृथग्दक्षिणाङ्गुष्ठपूर्वं
वामाङ्गुष्ठावसानं न्यसतु विमलधीः सृष्टिरुक्ता करस्था ।
अङ्गुष्ठद्वन्द्वपूर्वा स्थितिरुभयकरे संहृतिवामपूर्वा
दक्षाङ्गुष्ठान्तिकैतत् त्रयमपि सृजति स्थित्युपेतं च कार्यम् ॥ २७॥

ततः स्थितिक्रमाद् बुधो दशाङ्गकानि विन्यसेत् ।
तदङ्गपञ्चकं तथा विधिः समीरितः करे ॥ २८॥

पुटितैर्मनुनाथ मातृआर्णैर्


From http://sanskritdocuments.org

अभिविन्यस्य सबिन्दुभिः पुरोवत् ।
अणुसंहृतिसृष्टिमार्गभेदाद्
दशतत्त्वानि च मन्त्रवर्णभाञ्जि ॥ २९॥

संहृतावनगतो मनुवर्यः
सृष्टिवर्त्मनि भवेत् प्रतियातः ।
उद्धृतिः खलु पुरोक्तवद् एषां
न्यासकर्म कथयाम्यधुनाहम् ॥ ३०॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे प्रातःकृत्ये
तृतीयोऽध्यायः
॥ ३ ३॥

---

(३ ४)

तृतीयरात्रे चतुर्थोऽध्यायः
अथ मुद्राकथनम्

व्यास उवाच --
महीसलिलपावकानिलवियन्ति गर्वो महान्
पुनः प्रकृतिपुरुषौ पर इमानि तत्त्वान्यथ ।
पदान्धुहृदयास्यकान्यधि तु पञ्च मध्ये द्वयं
त्रयं सकलगं ततो न्यसतु तद्विपर्यासतः ॥ १॥

गुप्ततमोऽयं न्यासः सम्प्रोक्तस्तत्त्वदशकपरिक्लृप्तः ।
कार्योऽन्यष्वपि सद्भिर्गोपालमनुषु झटिति फलसिद्ध्यै ॥ २॥

आकेशाद् आपादं दोर्भ्यां
ध्रुवपुटितमथ मनुवरं न्यसेद् वपुषि ।
त्रिशो मूर्धन्यक्ष्णोः श्रुत्योर्घ्राणे
मुखहृदयजठरशिवजानुपत्सु तथाक्षराणि ॥ ३॥

उक्ता सृष्टिः शिष्टैरेषा स्थितिरपि
मुनिभिरभिहिता हृदादिमुखान्तिका ।
संहारोऽङ्घ्र्यादिमूर्धान्तस्त्रितयमिति


From http://sanskritdocuments.org

विरचयेच्च सृष्टिमनु स्थितिम् ॥ ४॥

न्यासः संहारान्तो मस्करिवैखानसेषु विहितोऽयम् ।
स्थित्यन्तो गृहमेधिषु सृष्ट्यन्तो वर्णिनामिति प्राहुः ॥ ५॥

वैराग्ययुजि गृहस्थे संहारं केचिद् आहुराचार्याः ।
सहजानौ वनवासिनि स्थितिं च विद्यार्थिनां सृष्टिम् ॥ ६॥

शिरसि विहिता मध्या सैवाक्ष्णि तर्जनिकान्विता
श्रवसि रहिताङ्गुष्ठा ज्येष्ठान्वितोषकनिष्ठका ।
नसि च वदने सर्वाः सज्यायसी हृदि तर्जनी
प्रथमजयुता मध्या नाभौ श्रवोविहिता शिवे ॥ ७॥

ता एवाङ्गुलयो जान्वोः साङ्गुष्ठास्तु पदद्वये ।
स्थानार्णयोर्विनिमयो भवेन् नास्त्यङ्गुलिस्थानयोः ॥ इ॥

वच्म्यपरं न्यासवरं भूत्यभिधं भूतिकरम् ।
मन्त्रदशावृत्तिमयं गुप्ततमं मन्त्रिवरैः ॥ ई॥

आधारध्वजनाभिहृद्गलमुखांसोरुद्वये कन्धरा
नाभ्योः कुक्षिहृदोरुरोजयुगले पार्श्वापरश्रोणिषु ।
कास्याक्षिश्रुतिनः कपोलकरपत्सन्ध्यग्रशाखासु के
तत्प्राच्यादिदिशासु मूर्ध्नि सकले दोष्णोश्च सक्थ्नोस्तथा ॥ ईइ॥

शिरोऽक्ष्यास्यकण्ठाख्यहृत्तुन्दकन्दा
न्धुजानुप्रपत्स्वित्थमर्णान्मनूत्थान् ।
न्यसेच्छ्रोत्रगण्डांसवक्षोजपार्श्व
स्फिगूरुस्थलीजानुजङ्घाङ्घ्रियुक्षु ॥ इव्॥

इति कथितं विभूतिपञ्जरं
सकलसुखार्थधर्ममोक्षदम् ।
नरतरुणीमनोऽनुरञ्जनं
हरिचरणाब्जभक्तिवर्धनम् ॥ व्॥

स्फूर्तयेऽथास्य मन्त्रस्य कीर्त्यते मूर्तिपञ्जरम् ।
आर्तिग्रहविषारिघ्नं कीर्तिश्रीकान्तिपुष्टिदम् ॥ ८॥



From http://sanskritdocuments.org
sanskritdocuments.org

केशवादियुगषङ्कमूर्तिभिर्
धातृपूर्वमिहिरान् नमोऽन्तकान् ।
द्वादशाक्षरभवाक्षरैः स्वरैः
क्लीबवर्णरहितैः क्रमान् न्यसेत् ॥ ९ ॥

भालोदरहृद्गलकूपतले
वामेतरपार्श्वभुजान्तगले ।
वामत्रयपृष्ठककुत्सु तथा
मूर्धन्यनु षड्युगवर्णमनुम् ॥ १० ॥

चैतन्यामृतवपुरर्ककोटितेजा
मूर्धस्थो वपुरखिलं स वासुदेवः ।
औधस्यं सुविमलपायसीव सिक्तं
व्याप्नोति प्रकटितमन्त्रवर्णकीर्णम् ॥ ११ ॥

सृष्टिस्थिती दशपञ्चाङ्गयुग्मं
मुन्यादिकत्रितयं कास्यहृत्सु ।
विन्यस्यतु ग्रथयित्वा च मुद्रा
भूयो दिशां दशकं बन्धनीयम् ॥ १२ ॥

तारं हार्दं विश्वमूर्तिश्च शार्ङ्गी
मांसान्तस्ते वायमध्ये सुदेवाः ।
षड्द्वन्द्वार्णो मन्त्रवर्यः स उक्तः
साक्षाद् द्वारं मोक्षपुर्याः सुगम्यम् ॥ १३ ॥

धात्रर्यममित्राख्या वरुणांशुभगा विवस्वदिन्द्रयुताः ।
पूषाह्वयपर्जन्यौ त्वष्टा विष्णुश्च भानवः प्रोक्ताः ॥ १४ ॥

अथ तु युगरन्ध्रार्णस्याहं मनोर्न्यसनं ब्रुवे
रचयतु करद्वन्द्वे पञ्चाङ्गमङ्गुलिपञ्चके ।
तनुमनु मनुं व्यापय्याथ त्रिशः प्रणवं सकृन्
मनुजलिपयो न्यास्या भूयः पदानि च सादरम् ॥ १५ ॥

कचभुवि ललाटे भ्रूयुग्मान्तरे श्रवणाक्षिणोर्
युगलवदनग्रीवाहृन्नाभिकत्युभयान्धुषु ।



From http://sanskritdocuments.org

न्यसतु शितधीर्जान्वङ्घ्योरक्षरान् शिरसि ध्रुवं
नयनमुखहृद्गुह्याङ्घ्रिष्वर्पयेत् पदपञ्चकम् ॥ १६ ॥

पञ्चाङ्गानि न्यसेद् भूयो मुन्यादीन् अप्यन्यत् सर्वम् ।
तुल्यं पूर्वेणाथो वक्ष्ये मुद्रा बन्ध्या मन्वोर्याः स्युः ॥ १७ ॥

अनङ्गुष्ठा ऋजवो हस्तशाखा
भवेन् मुद्रा हृदये शीर्षके च ।
अधोङ्गुष्ठा खलु मुष्टिः शिखायां
करद्वन्द्वाङ्गुलयो वर्मणि स्युः ॥ १८ ॥

नाराचमुष्ट्युन्नतबाहुयुग्म
काङ्गुष्ठतर्जन्युदितो ध्वनिस्तु ।
विष्वग्विषक्तः कथितास्त्रमुद्रा
यत्राक्षिणी तर्जनीमध्यमे तु ॥ १९ ॥

ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ।
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ॥ १९ ॥
तर्जनीमध्यमानामाः किञ्चित् संकुच्य चालिताः ।
वेणुमुद्रेह कथिता सुगुप्ता प्रेयसी हरेः ॥ २० ॥
नोच्यन्तेऽत्र प्रसिद्धत्वान् मालाश्रीवत्सकौस्तुभाः ।
उच्यतेऽच्युतमुद्राणां मुद्रा बिल्वफलाकृतिः ॥ २१ ॥

अङ्गुष्ठं वाममुद्दण्डितमितरकराङ्गुष्टकेनाथ वध्वा
तसाग्रं पीडयित्वाङ्गुलिभिरपि तथा वामहस्ताङ्गुलिभिः ।
बद्धवा गाढं हृदि स्थापयतु विमलधीर्व्याहरन् मारबीजं
बिल्वाख्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया विधिज्ञैः ॥ २२ ॥

मनोवाणीदेहैर्यद् इह च पुरा वापि विहितं
त्वमत्या मत्या वा तद् अखिलमसौ दुष्कृतिचयम् ।
इमां मुद्रां जानन् क्षपयति नरस्तं सुरगणा
नमन्त्यस्याधीना भवति सततं सर्वजनता ॥ २३ ॥

प्रणवहृदोरवसाने सचतुर्थिसुदर्शनं तथास्त्रपदं च ।
उक्त्या फडन्तमनुम्ना कलयेन् मनुनास्त्रमुद्रया दशहरितः ॥ २४ ॥



From http://sanskritdocuments.org

इति विधाय समस्तविधिं जगज्
जनिविनाशविधानविशारदम् ।
श्रुतिविमृग्यमजं मनुविग्रहं
स्मरतु गोपवधूजनवल्लभम् ॥ २५॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
चतुर्थोऽध्यायः
॥ ३ ४॥

---

(३ ५)
तृतीयरात्रे पञ्चमोऽध्यायः
मन्त्रपूजाप्रकरणम्

श्रीव्यास उवाच --
अथ प्रकटसौरभोद्गलितमाध्वीकोत्फुल्लसत्
प्रसूननवपल्लवप्रकरनम्रशाखैर्द्रुमैः ।
प्रफुल्लनवमञ्जरीललितवल्लरीवेष्टितैः
स्मरेच्छिशिरितं शिवं सितमतिस्तु वृन्दावनम् ॥ १॥

विकाशिसुमनोरमास्वादनमञ्जुलैः सञ्चरच्
छिलिमुखोद्गतैर्मुखरितान्तरं झङ्कृतैः ।
कपोतशुकशारिकापरभृतादिभिः पत्रिभिर्
विराणितमितस्ततो भुजगशत्रुनृत्याकुलम् ॥ २॥

कलिन्ददुहितुश्चलल्लहरिविप्रुषां वाहिभिर्
विनिद्रसरसीरुहोदररजश्चयोद्धूसरैः ।
प्रदीपितमनोभवव्रजविलासिनीवाससां
विलोलनपरैर्निषेवितमनारतं मारुतैः ॥ ३॥

प्रवालनवपल्लवं मरकतच्छदं वज्रमौ
क्तिकप्रकरकोरकं कमलरागनानाफलम् ।
स्थविष्ठमखिलर्तुभिः सततसेवितं कामदं
तदन्तरमपि कल्पकाङ्घ्रिपमुदञ्चितं चिन्तयेत् ॥ ४॥

सुहेमशिखरावलेरुदितभानुवद्भास्वराम्



From http://sanskritdocuments.org

अधोऽस्य कनकस्थलीममृतशीकरासारिणः ।
प्रदीप्तमणिकुट्टिमां कुसुमरेणुपुञ्जोज्ज्वलां
स्मरेत् पुनरतन्द्रितो विगतषट्तनङ्गां बुधः ॥ ५॥

तद्रत्नकुट्टिमनिविष्टमहिष्ठयोग
पीठेऽष्टपत्रमरुणं कमलं विचिन्त्य ।
उद्यद्विरोचनसरोचिरमुष्य मध्ये
सञ्चिन्तयेत् सुखनिविष्ठमथो मुकुन्दम् ॥ ६॥

सूत्रामरत्नदलिताञ्जनमेघपुञ्ज
प्रत्यग्रनीलजलजन्मसमानभासम् ।
सुस्निग्धनीलघनकुञ्चितकेशजालं
राजन्मनोज्ञशितिकण्ठशिखण्डचूडम् ॥ ७॥

रोलम्बलालितसुरद्रुमसूनक्लृप्तोत्तंसं
समुत्कचनवोत्पलकर्णपूरम् ।
लोलालकस्फुरितभालतलप्रदीप्त
गण्डस्थलीमुकुरमुन्नतचारुनासम् ॥ ८॥

आपूर्णशारदगताङ्कुशशाङ्कबिम्ब
कान्ताननं कमलपत्रविशालनेत्रम् ।
रत्नस्फुरन्मकरकुण्डलरश्मिदीप्त
गण्डस्थलीमुकुरमुन्नतचारुनासम् ॥ ९॥

सिन्दूरसुन्दरतराधरमिन्दुकुन्द
मन्दारमन्दहसितद्युतिदीपिताङ्गम् ।
वन्यप्रवालकुसुमप्रचयावक्लृप्त
ग्रैवेयकोज्ज्वलमनोहरकम्बुकण्ठम् ॥ १०॥

मत्तभ्रमरजुष्टविलम्बमान
सन्तानकप्रसवदामपरिष्कृतांसम् ।
हारावलीभगणराजितपीवरोरो
व्योमस्थलीलसितकौस्तुभभानुमन्तम् ॥ ११॥

श्रीवत्सलक्षणसुलक्षितमुन्नतांसम्
आजानुपीनपरिवृत्तसुजातबाहुम् ।



From http://sanskritdocuments.org

आबन्धुरोदरमुदारगम्भीरनाभिं
भृङ्गाङ्गनानिकरमञ्जुलरोमराजिम् ॥ १२ ॥

नानामणिप्रघटिताङ्गदकङ्कणोर्मि
ग्रैवेयसारसननूपुरतुन्दबन्धम् ।
द्याङ्गरागपरिपञ्जरिताङ्गयष्टिम्
आपीतवस्त्रपरिवीतनितम्बबिम्बम् ॥ १३ ॥

चारूरुजानुमनुवृत्तमनोज्ञजङ्घ
कान्तोन्नतप्रपदनिन्दितकूर्मकान्तिम् ।
माणिक्यदर्पणलसन्नखराजिराजद्
रत्नाङ्गुलिच्छदन्सुन्दरपादपद्मम् ॥ १४ ॥

मत्स्याङ्कुशारदरकेतुयवाब्जवज्र
संलक्षितारुणकराङ्घ्रितलाभिरामम् ।
लावण्यसारसमुदायविनिर्मिताङ्ग
सौन्दर्यनिर्जितमनोभवदेहकान्तिम् ॥ १५ ॥

आस्यारविन्दपरिपूरितवेणुरन्ध्र
लोलत्कराङ्गुलिसमीरितदिव्यरागैः ।
शश्वद्द्रवीजृतविकृष्टसमस्तजन्तु
सन्तानसन्ततिमनन्तसुखाम्बुराशिम् ॥ १६ ॥

गोभिर्मुखाम्बुजविलीनविलोचनाभि
रूधोभरस्खलितमन्थरमन्दगाभिः ।
दन्ताग्रदष्टपरिशिष्टतृणाङ्कुराभि
रालम्बिवालधिलताभिरथभिवीतम् ॥ १७ ॥

सप्रस्रवस्तनविचूषणपूर्णनिश्च
लास्यावटक्षरितफेनिलदुग्धमुग्धैः ।
वेणुप्रवर्तितमनोहरमन्द्रगीत
दत्तोच्चकर्णयुगलैरपि तर्णकैश्च ॥ १८ ॥

प्रत्यग्रशृङ्गमृदुमस्तकसम्प्रहार
संरम्भवल्गनविलोलखुराग्रपातैः ।
आमेदुरैर्बहुलसास्नगलैरुदग्र



From http://sanskritdocuments.org

पुच्छैश्च वत्सतरवत्सतरीनिकायैः ॥ १९ ॥

हम्बारवक्षुभितदिग्वलयैर्महद्भि
रप्युक्षभिः पृथुककुद्भरभारखिन्नैः ।
उत्तम्भितश्रुतिपुटीपरिवीतवंश
ध्वानामृतोद्धृतविकाशिविशालघोणैः ॥ २० ॥

गोपैः समानगुणशीलवयोविलास
वेशैश्च मूर्च्छितकलस्वनवेणुवीणैः ।
मन्द्रोच्चतारपटगानपरैर्विलोल
दोर्वल्लरीललितलास्यविधानदक्षैः ॥ २१ ॥

जङ्घान्तपीवरकटीरतटीनिबद्ध
व्यालोलकिङ्किणिघटारटितैरटद्भिः ।
मुग्धैस्तरक्षुनखकल्पितकण्ठभूषै
रव्यक्तमञ्जुवचनैः पृथुकैः परीतम् ॥ २२ ॥

अथ सुललितगोपसुन्दरीणां
पृथुनिविवीषनितम्बमन्थराणाम् ।
गुरुकुचभरभङ्गुरावलग्न
त्रिवलिविजृम्भितरोमराजिभाजाम् ॥ २३ ॥

तदतिमधुरचारुवेणुवाद्या
मृतरसपल्लविताङ्गजाङ्घ्रिपानाम् ।
मुकुलविसररम्यरूढरोमोद्
गमसमलङ्कृतगात्रवल्लरीणाम् ॥ २४ ॥

तदतिरुचिरमन्दहासचन्द्रा
तपपरिजृम्भितरागवारिणाशेः ।
तरलतरतरङ्गभङ्गविप्रुट्
प्रकरसमश्रमबिन्दुसन्ततानाम् ॥ २५ ॥

तदतिललितमन्दचिल्लिचाप
च्युतनिशितेक्षणमारवाणवृष्ट्या ।
दलितसकलमर्मविह्वलाङ्ग
प्रविसृतदुःसहवेपथुव्यथानाम् ॥ २६ ॥


From http://sanskritdocuments.org

तदतिरुचिरकम्ररूपशोभा
मृतरसपानविधानलालसाभ्याम् ।
प्रणयसलिलपूरवाहिनीनाम्
अलसविलोलविलोचनाम्बुजाभ्याम् ॥ २७॥

विश्रंसत्कवरीकलापविगलत्फुल्लप्रसूनश्रवन्
माध्वीलम्पटचञ्चरीकघटया संसेवितानां मुहुः ।
मारोन्मादमदस्खलन्मृदुगिरामालोलकाञ्च्युछ्वसन्
नीवीविश्लथमानचीनसिचयान्ताविर्नितम्बत्विषाम् ॥ २८॥

स्खलितललितपादाम्भोजमन्दाभिघात
क्वणितमणितुलाकोट्याकुलाशामुखानाम् ।
चलदधरदलानां कुड्मलत्पक्ष्मलाक्षि
द्वयसरसिरुहणामुल्लसत्कुण्डलानाम् ॥ २९॥

द्राघिष्ठश्वसनसमीरणाभिताप
प्रम्लानीभवदरुणोष्ठपल्लवानाम् ।
नानोपायनविलसत्कराम्बुजानाम्
आलीभिः सततनिषेवितं समन्तात् ॥ ३०॥

तासामायतलोलनीलनयनव्याकोशनीलाम्बुज
स्रग्भिः सम्परिपूजिताखिलतनुं नानाविलासास्पदम् ।
तन्मुग्धाननपङ्कजप्रविगलन्माध्वीरसास्वादनीं
बिभ्राणं प्रणयोन्मदाक्षिमधुकृन्मालां मनोहारिणीम् ॥ ३१॥

गोपीगोपपशूनां बहिः
स्मरेद् अग्रतोऽस्य गीर्वाणघटाम् ।
वित्तार्थिनीं विरिञ्चित्रिनयन
शतमन्युपूर्विकां स्तोत्रपराम् ॥ ३२॥

तद्दक्षिणतो मुनिनिकरं
दृढधर्मवाञ्छमाम्नायपरम् ।
योगीन्द्रान् अथ पृष्ठे मुमुक्ष
माणान् समाधिना सनकाद्यान् ॥ ३३॥


From http://sanskritdocuments.org

सव्ये सकान्तान् अथ यक्षसिद्ध
गन्धर्वविद्याधरचारणांश्च ।
सकिन्नरान् अप्सरसश्च मुख्याः
कामार्थिनो नर्तनगीतवाद्यैः ॥ ३४॥

शङ्खेन्दुकुन्दधवलं सकलागमज्ञं
सौदामनीततिपिशङ्गजटाकलापम् ।
तत्पादपङ्कजगतामचलाञ्च भक्तिं
वाञ्छन्तमुज्झिततरान्यसमस्तसङ्गम् ॥ ३५॥

नानाविधश्रुतिगणान्वितसप्तराग
ग्रामत्रयीगतमनोहरमूर्छनाभिः ।
संप्रीणयन्तमुदिताभिरमुं महत्या
सञ्चिन्तयेन् नभसि धातृसुतं मुनीन्द्रम् ॥ ३६॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
पञ्चमोऽध्यायः
॥ ३ ५॥

---

(३ ६)
तृतीयरात्रे षष्ठोऽध्यायः

व्यास उवाच --
इति ध्यात्वात्मानं पटुविशदधीर्नन्दतनयं
पुरो बुद्ध्यैवार्घ्यप्रभृतिभिरनिन्द्योपहृतिभिः ।
यजेद् भूयो भक्त्या स्ववपुषि बहिष्ठैश्च विभवैर्
विधानं तद् ब्रूमो वयमतुलसान्निध्यकृद् अथ ॥ १॥

आरचय्य भुवि गोमयाम्भसा
स्थण्डिलं निजममुत्र विष्टरम् ।
न्यस्य तत्र विहितास्पदोऽम्भसा
शङ्खमस्त्रमनुना विशोधयेत् ॥ २॥

तत्र गन्धसुमनोक्षतान् अथो
निक्षिपेद् धृदयमन्त्रमुच्चरन् ।


From http://sanskritdocuments.org

पूरयेद् विमलपाथसा सुधीर्
अक्षरैः प्रतिगतैः शिरोन्तकैः ॥ ३॥

पीठशङ्खसलिलेषु मन्त्रविद्
वह्निवासरनिशाकृतां क्रमात् ।
मण्डलानि विषकश्रवोक्षरैर्
अर्चयेद् वदनपूर्वदीपितैः ॥ ४॥

तत्र तीर्थमनुनभिवाहयेत्
तीर्थमुष्णरुचिमण्डलात् ततः ।
स्वीयहृत्कमलतो हरिं तथा
गालिनीं च शिखया प्रदर्शयेत् ॥ ५॥

तज्जलं नयनमन्त्रवीक्षितं
वर्मणा समवगुण्ठ्य दोर्युजा ।
मूलमन्त्रसकलीकृतं न्यसेद्
अङ्गकैश्च कलयोद्दिशोऽस्त्रतः ॥ ६॥

अक्षतादियुतमच्युतीकृतं
संस्पृशन् जपतु मन्त्रमष्टशः ।
किं च निक्षिपतु वर्धनीजले
प्रोक्षयेन् निजतनुं ततोऽम्बुना ॥ ७॥

त्रिः करेण मनुनाखिलं तथा
साधनं कुसुमचन्दनादिकम् ।
शङ्खपूरणविधिः समीरितो
गुप्त एष यजनाग्रणीरिह ॥ ८॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ ९॥
एष तीर्थमनुप्रोक्तो दुरितौघनिवारणः ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ॥ १०॥
तर्जनीमध्यमानामाः संहता भुग्नसंजिताः ।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता ॥ ११॥

अथ मूर्धनि मूलचक्रमध्ये



From http://sanskritdocuments.org

निजनाथान् गणनायकं समर्च्य ।
न्यसनक्रमतश्च पीठमन्त्रैर्
जलगन्धाक्षतपुष्पधूपदीपैः ॥ १२॥

प्रयजेद् अथ मूलमन्त्रतेजो
निजमूले हृदये भ्रुवोश्च मध्ये ।
त्रितयं स्मरतः स्मरेत् तदेकी
कृतमानन्दघनं तडिल्लताभम् ॥ १३॥

तत्तेजोऽङ्गैः सावयवीकृत्यविभूत्या
द्यङ्गान्तं विन्यस्य यजेद् आसनपूर्वैः ।
भूषान्तैर्भूयो जलगन्धादिभिरर्चां
कुर्याद् भूत्याद्यङ्गविधानावधि मन्त्री ॥ १४॥

भूयो वेणुं वदनस्थं वक्षोदेशे वनमालाम् ।
वक्षोजोऽर्धं प्रयजेच्च श्रीवत्सं कौस्तुभरत्नम् ॥ १५॥

श्रीखण्डनिःस्यन्दविचर्चिताङ्गो
मूलेन भालादिषु चित्रकाणि ।
लिख्याद् अथो पञ्जरमूर्तिमन्त्र
रनामया दीपशिखाकृतीनि ॥ १६॥

पुष्पाञ्जलिं  वितनुयाद् अथ पञ्चकृत्वो
मूलेन पादयुगले तुलसीद्वयेन ।
मध्ये हयारियुगलेन च मूर्ध्नि पद्म
द्वन्द्वेन षड्भिरपि सर्वतनौ च सर्वैः ॥ १७॥

श्वेतानि दक्षभागे सितचन्दनपङ्किलानि कुसुमानि ।
रक्तानि वामभागेऽरुणचन्दनपङ्कसिक्तानि ॥ १८॥
तद्वच्च धूपदीपौ समर्प्य धिनुयात् सुधारसैः कृष्णम् ।
मुखवासाद्यं दत्त्वा समर्चयेत् साधुगन्धाद्यैः ॥ १९॥

ताम्बूलगीतनर्तनवाद्यैः
सन्तोष्य चुलुकसलिलेन ।
ब्रह्मार्पणाख्यमनुना
कुर्यात् स्वात्मार्पणं मन्त्री ॥ २०॥



From http://sanskritdocuments.org

अथवा सङ्कुचितधियामयं विधिर्मूर्तिपञ्जरारब्धः ।
यद्यष्टादशलिपिना सार्णपदाङ्गैश्च वेणुपूर्वैः प्रोक्तः ॥ २१॥

सुप्रसन्नमथ नन्दतनूजं
भावयन् जपतु मन्त्रमनन्यः ।
सार्थसंस्मृतियथाविधिसङ्ख्या
पूरणेऽसुयमनं विदधीत ॥ २२॥

प्रणवपुटितं बीजं जप्त्वा शतं सहिताष्टकं
निजगुरुमुखाद् आत्तान् योगान् युनक्तु महामतिः ।
सदमृतचिदानन्दात्माथो जपं च समापयेद्
इति जपविधिः सम्यक् प्रोक्तो मनुद्वितयाश्रितः ॥ २३॥

य इमं भजते विधिं नरो
भवितासौ दयितः शरीरिणाम् ।
अपि वाक्कमलैकमन्दिरं
परमं ते समुपैति तन्महः ॥ २४॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
षष्ठोऽध्यायः
॥ ३ ६॥

---

(३ ७)
तृतीयरात्रे सप्तमोऽध्यायः

व्यास उवाच --
कथ्यते सपदि मन्त्रवर्ययोः
साधनं सकलसिद्धिसाधनम् ।
यद् विधाय मुनयो महीयसां
सिद्धिमीयुरिह नारदादयः ॥ १॥

विप्रं प्रध्वस्तकामप्रभृतिरिपुघटं निर्मलाङ्गं गरिष्ठां
भक्तिं कृष्णाङ्घ्रिपङ्केरुहयुगलरजोरागिणीमुद्वहन्तम् ।
वेत्तारं वेदशास्त्रागमविमलपथां सम्मतं सत्सु दान्तं


From http://sanskritdocuments.org

विद्यां यः संविवित्सुः प्रवणतनुमना देशिकं संश्रयेत ॥ २॥

सन्तोषयेद् अकुटिलाद्रेतरान्तरात्मा
तं स्वैर्धनैश्च वपुषाप्यनुकूलवाण्या ।
अब्दत्रयङ्कमलनाभधियाऽतिधीरस्
तुष्टे विवक्षतु गुरावथ मन्त्रदीक्षाम् ॥ ३॥

प्रपञ्चसारप्रथिता तु दीक्षा
संस्मार्यते सम्प्रतिसर्वसिद्ध्यै ।
ऋते यया सन्ततजापिनोऽपि
सिद्धिं न वै दास्यति मन्त्रपूगः ॥ ४॥

अथ पुरो विदधीत भुवं स्थलीम्
अधि यथाविधि वास्तुबलिं बुधः ।
अचलदोर्मितमत्र तु मण्डपं
मसृणवेदिकमारचयेत् ततः ॥ ५॥

त्रिगुणतन्तुयुजा कुशमालया
परिवृतं प्रकृतिध्वजभूषितम् ।
मुखचतुष्कपयस्तरुतोरणं
सितवितानविराजितमुज्ज्वलम् ॥ ६॥

वसुत्रिगुणिताङ्गुलप्रमितखाततारायातं
वसोर्वसुपतेरथो ककुभिधिष्ण्यमस्मिन् बुधः ।
करोतु वसुमेखलं वसुगणार्धकोणं प्रतीच्य्
अवस्थितगजाधरप्रतिमयोनिसंलक्षितम् ॥ ७॥

ततो मण्डपे गव्यगन्धाम्बुसिक्ते
लिखेन् मण्डलं सम्यग् अष्टच्छदाब्जम् ।
सवृत्तत्रयं राशिपीठाङ्घ्रिवीथि
चतुर्धारशोभोपशोभास्रयुक्तम् ॥ ८॥

ततो देशिकः स्नानपूर्वं विधानं
विधायात्मपूजावसानं विधिज्ञः ।
स्ववामाग्रतः शङ्खमप्यर्घ्यपाद्या
चमाद्यानि पात्राणि समूरितानि ॥ ९॥



From http://sanskritdocuments.org

विधायान्यतः पुष्पगन्धाक्षताद्यं
करक्षालनं पृष्ठतश्चापि पात्रम् ।
प्रदीपावलीदीपिते सर्वमन्यत्
स्वदृग्गोचरे साधनं चाददीत ॥ १० ॥

वायव्याशादीशपर्यन्तमर्च्य
पीठस्योदग्गौरवी पङ्क्तिरादौ ।
पूज्योऽन्यत्राप्याम्बिकेयः कराब्जैः
पाशं दन्तं शृण्यभीती दधानः ॥ ११ ॥

आराध्याधारशक्त्याद्यमरचरणपावध्यथो मध्यभागे
धर्मादीन् वह्निरक्षःपवनशिवगतान् दिक्ष्वधर्मादिकांश्च ।
मध्ये शेषाब्जबिम्बत्रितयगुणगणात्मादिकं केशराणां
वह्नेर्मध्ये च शक्तीर्नवसमभियजेत् पीठमन्त्रेण भूयः ॥ १२ ॥

ततः शालीन् मध्येकमलममलांस्तण्डुलवरान्
अपि न्यस्येद् दर्भांस्तद् उपरि च कूर्चाक्षतयुतान् ।
न्यसेत् प्रादक्षिण्यात् तदुपरि कृशानोर्दश कला
यकाराद्यर्णाद्या यजतु च सुगन्धादिभिरिमाः ॥ १३ ॥

न्यसेत् कुम्भं तत्र त्रिगुणितलसत्तन्तुकलितं
जपंस्तारं धूपैः सुपरिमलितं जोङ्कटमयैः ।
कभाद्यैः कुम्भेऽस्मिन् ठडवसितिभिर्वर्णयुगलैः
तथान्यस्याभ्यर्च्यास्तदनु खमणेर्द्वादश कलाः ॥ १४ ॥

एवं सङ्कल्प्याग्निमाधाररूपं
भानुं तद्वत् कुम्भरूपं विधिज्ञैः ।
न्यस्येत् तस्मिन्न् अक्षताद्यैः समेतं
कूर्चं स्वर्णैं रत्नवर्यैः प्रदीप्तम् ॥ १५ ॥

अथ क्वाथतोयैः क्षकारादिवर्णैर्
अकारावसानैः समापूरयेत् तम् ।
स्वमन्त्रत्रिजापावसानं पयोभिर्
गवां पञ्चगव्यैर्जलैः केवलैर्वा ॥ १६ ॥



From http://sanskritdocuments.org

कलशजलेऽस्मिन् वसुयुगसङ्ख्याः
स्वरगणपूर्वा न्यसतु तथैव ।
उडुपकलास्ताः सलिलसुगन्धा
क्षतसुमनोभिस्तदनु यजेत ॥ १७ ॥

उदीच्यकुष्टकुङ्कुमाम्बुलोहसज्जटामुरैः ।
सशीतमित्युदीरितं हरेः प्रियाष्टगन्धकम् ॥ १८ ॥

क्वाथतोयपरिपूरितोदरे
संविलोड्य विधिनाष्टगन्धकम् ।
सोमसूर्यशिखिनां पृथक्कलाः
सेचकर्म विनियोजयेत् क्रमात् ॥ १९ ॥

तद्वद् आक्षरभवास्तु कादिभिष्
टादिभिः पुनरुकारजाः कलाः ।
पादिभिर्मलिपिजास्तु बिन्दुजाः
षादिभिः स्वरगणेन नादजाः ॥ २० ॥

समावाहनान्तेऽसुसंस्थापनात् प्राक्
ऋचस्तत्र तत्राभिजप्या बुधेन ।
समभ्यर्च्य तास्ताः पृथक् तच्च पाथोऽ
पयेन् मूलमन्त्रेण कुम्भे यथावत् ॥ २१ ॥

सहकारबोधिपनसस्तवकैः
शतमन्युवल्लिक्कलितैः कलशम् ।
पिदधातु पुष्पफलतण्डुलकैर्
अभिपूर्णयापि शुभचक्रिकया ॥ २२ ॥

अभिवेष्टयेत् तदनु कुम्भमुखं
नवनिर्मलांशुकयुगेन बुधः ।
समलङ्कृतेऽत्र कुसुमादिभिरप्य्
अभिवाहयेत् परतरं च महः ॥ २३ ॥

सकलीविधाय कलशस्थममुं
हरिमर्णतत्त्वमनुविन्यसनैः ।
परिपूजयेद् गुरुरथावहितः



From http://sanskritdocuments.org

परिवारयुक्तमुपचारगणैः ॥ २४॥

दत्त्वासनं स्वागतमित्युदीयः
तथाध्यपाद्याचमनीयकानि ।
स्थानं च वासश्च विभूषणानि
साङ्गाय तस्मै विनियोज्य मन्त्री ॥ २५॥

गात्रे पवित्रैरथ गन्धपुष्पैः
पूर्वं यजेन् न्यासविधानतोऽस्य ।
सृष्टिस्थिती स्वाङ्गयुगं च वेणुं
मालामभिज्ञानवराऽमुख्यौ ।
मूलेन चार्घ्यार्चनवत् प्रपूज्य
समर्चयेद् आवरणानि भूयः ॥ २७॥

दिक्ष्वथ दामसुदामौ वसुदामः किङ्किणी च सम्पूज्याः ।
तेजोरूपास्तद्बहिरङ्गानि च केशरेषु समभियजेत् ॥ २८॥

हुतवहनिर्ऋतिसमीरशिवदिक्षु हृदादिवर्मपर्यन्तम् ।
पूर्वादिदिक्ष्वथास्त्रं क्रमेण गन्धादिभिः सुशुद्धमनाः ॥ २९॥

मुक्तेन्दुकान्तकुवलय
हरिनीलहुताशसभाः प्रमदाः ।
अभयवरस्फुरितकराः
प्रसन्नमुख्योऽङ्गदेवताः स्मर्याः ॥ ३०॥

रुक्मिण्याद्या महिषीर्
अष्टौ सम्पूजयेद् दलेषु ततः ।
दक्षिणकरधृतकमला
वसुभरितसुपात्रमुद्रितान्यकराः ॥ ३१॥

रुक्मिण्याख्या सत्या सनाग्निजित्याह्वया सुनन्दा च ।
भूयश्च मित्रविन्दा सुलक्ष्मणा ऋक्षजा सुशीला च ॥ ३२॥

तपनीयमरकताभाः सुसित
विचित्राम्बरा द्विशस्त्वेताः ।
पृथुकुचभरालसाङ्ग्या विविध



From http://sanskritdocuments.org

मणिप्रकरविलसिताभरणाः ॥ ३३॥

ततो यजेद् दलाग्रेषु वसुदेवं च देवकीम् ।
नन्दगोपं यशोदां च बलभद्रं सुभद्रिकाम् ।
गोपान् गोपीश्च गोविन्दविलीनमतिलोचनान् ॥ ३४॥

ज्ञानमुद्राभयकरौ पितरौ पीतपाण्डरौ ।
दिव्यमाल्याम्बरालेपभूषणे मातरौ पुनः ॥ ३५॥

धारयन्त्यौ च वरदं पायसापूर्णपात्रकम् ।
अरुणाश्यामले हारमणिकुण्डलमण्डिते ॥ ३६॥

बलः शङ्खेन्दुधवलो मुसलं लाङ्गलं दधत् ।
हालालोलो नीलवासा हेलावान् एककुण्डलः ॥ ३७॥

कलायश्यामला भद्रा सुभद्रा भद्रभूषणा ।
वराभययुता पीतवसना रूढयौवना ॥ ३८॥

वेणुवीणावेत्रयष्टिशङ्खशृङ्गादिपाणयः ।
गोपा गोप्यश्च विविधप्रभृतात्तकराम्बुजाः ।
मन्दारादींश्च तद्बाह्ये पूजयेत् कल्पपादपान् ॥ ३९॥

मन्दारसन्तानकपारिजात
कल्पद्रुमाख्यान् करिचन्दनं च ।
मध्ये चतुर्दिक्ष्वपि वाञ्छितार्थ
दानैकदक्षान् फलनम्रशाखान् ॥ ४०॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
सप्तमोऽध्यायः
॥ ३ ।७॥

---

(३ ।८)
तृतीयरात्रे अष्टमोऽध्यायः

व्यास उवाच --



From http://sanskritdocuments.org

हरिहव्यवाट्तरणिजक्षपाचराप्य्
अतिवायुसोमशिवशेषपद्मजान् ।
प्रयजेत् स्वदिक्ष्वमलधीः स्वजात्यधी
श्वरहेतिपत्रपरिवारसंयुतान् ॥ १॥

कपिशकपिलनीलश्यामलश्वेतधूम्रा
मलसितशुचिरक्ता वर्णतो वासवाद्याः ।
करकमलविराजत्स्वायुधा दिव्यवेशा
विविधमणिगणोऽस्रप्रस्फुरद्भूषणाढ्याः ॥ २॥

दम्भोलिशक्त्यभिधदण्डकृपाणपाश
चण्डाङ्कुशाह्वयगदात्रिशिखारिपद्माः ।
अर्च्या बहिर्निजसुलक्षितमौलियुक्ताः
स्वस्वायुधभयसमुद्यतपाणिपद्मः ॥ ३॥

कनकरजततोयदाभ्रचम्पा
रुणहिमनीलजवाप्रवालभासः क्रमतः ।
क्रमत इति रुचा तु वज्रपूर्वा
रुचिरविलेपनवस्त्रमाल्यभूषाः ॥ ४॥

कथितमावृतिसप्तकमच्युता
र्चनविधाविति सर्वसुखावहम् ।
प्रयताद् अथवाङ्गपुरन्दरा
शनिमुखैस्त्रितयावरणं त्विदम् ॥ ५॥

इत्यर्चयित्वा जलगन्धपुष्पैः
कृष्णाष्टकेनाप्यथ कृष्णपूजाम् ।
कुर्याद् बुधस्तानि समाह्वयानि
वक्ष्यामि तादादिनमोऽन्तिकानि ॥ ६॥

श्रीकृष्णो वासुदेवश्च नारायणसमाह्वयः ।
देवकीनन्दनो यदुश्रेष्ठो वार्ष्णेय इत्यपि ॥ ७॥
असुरान्तकशब्दान्ते भारहारीति सप्तमः ।
धर्मसंस्थापकश्चाष्टौ चतुर्थ्यन्ताः क्रमाद् इमे ॥ ८॥
एभिरेवाथवा पूजा कर्तव्या कंसवैरिणः ।
संसारसागरोत्तीर्त्यै सर्वकामाप्तये बुधैः ॥ ९॥



From http://sanskritdocuments.org

साराङ्गारे घृतविलुलितैर्जर्जरै संविकीर्णैर्
गुग्गुल्वाद्यैर्घनपरिमलैर्धूपमापाद्य मन्त्री ।
दद्यान् नीचैर्दनुजमथनायापरेणाथ दोष्णा
घण्टां गन्धाक्षतकुसुमकैरर्चितां वादयानः ॥ १०॥

तद्वद् दीपं सुरभिघृतसंसिक्तकर्पूरवर्त्या
दीप्तं दृष्ट्याद्यतिविशदधीः पद्मपर्यन्तमुच्चैः ।
दत्त्वा पुष्पाञ्जलिमप् च इ विधायार्पयित्वा च पाद्यं
साचामं कल्पयतु विपुलस्वर्णपात्रे निवेद्य ॥ ११॥

सुरभितरेण दुग्धहविषा सुशृतेन सिता
समुपदेशकै रुचिरहृद्यविचित्ररसैः ।
दधिनवनीतनूतनसितोपलपूपपुलि
घृतगुडनारिकेलकदलीफलपुष्परसैः ॥ १२॥

अस्त्रोक्षितं तदरिमुद्रिकयाभिरक्ष्य
वायव्यतीयपरिशोषितमग्निदोष्णा ।
सन्दह्य वामकरसौधरसाभिपूर्णं
मन्त्रामृतीकृतमथाभिमृषन् प्रजप्यात् ॥ १३॥

मनुमष्टशः सुरभिमुद्रिकया
परिपूर्णमर्चयतु गन्धमुखैः ।
हरिमर्चयेद् अथ कृतप्रसवाञ्जलिर्
आस्यतोऽस्य प्रसरेच्च महः ॥ १४॥

वीतिहोत्रदयितान्तमुच्चरन्
मूलमन्त्रमथ निक्षिपेज्जलम् ।
अर्पयेत् तद् अमृतात्मकं हविर्
दोर्युजा सुकुसुमं समुद्धरन् ॥ १५॥

निवेदयामि भगवते जुषाणेदं हविर्हरे ।
निवेद्यार्पणमन्त्रोऽयं सर्वार्चासु निजाख्यया ॥ १६॥

ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् ।
प्रदर्शयेद् दक्षिणेन प्राणादीनां च दर्शयेत् ॥ १७॥



From http://sanskritdocuments.org

स्पृशेत् कनिष्ठोपकनिष्ठे द्वे
अङ्गुष्ठमूर्ध्ना प्रथमेह मुद्रा ।
तथापरा तर्जनिमध्यमे स्याद्
अनामिकमध्यमिके च मध्या ॥ १८ ॥

अनामिकतर्जनिमध्यमाः स्यात्
तद्वच्चतुर्थीसकनिष्ठिकास्तः ।
स्यात् पञ्चमी तद्वद् इति प्रदिष्टा
प्राणादिमुद्रा निजमन्त्रयुक्ताः ॥ १९ ॥

प्राणापानव्यानोदान
समानाः क्रमाच्चतुर्थ्यन्ताः ।
ताराधारा वध्वा चेद्धाः
कृष्णाध्वनस्त्विमे मनवः ॥ २० ॥

ततो निवेद्य मुद्रिकां
प्रधानया करद्वये ।
स्पृशन्न् अनामिकां निजं
मनुं जपन प्रदर्शयेत् ॥ २१ ॥

नन्दजोऽम्बुमनुबिन्दुयुङ् नतिः
पार्श्वरामरुदवात्मने नि च ।
रुद्धङेयुतनिवेद्यमात्मभूर्
मासपार्श्वमनिलस्तथाऽमियुक् ॥ २२ ॥

मण्डलमभितो मन्त्री
बीजाङ्कुरभाजनानि विन्यस्य ।
पिष्टमयान् अपि दीपान्
घृतपूर्णान् विन्यसेत् सुदीप्तशिखान् ॥ २३ ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
अष्टमोऽध्यायः
॥ ३ ८ ॥


From http://sanskritdocuments.org

(३ ९)
तृतीयरात्रे नवमोऽध्यायः

श्रीव्यास उवाच --
अथ संस्कृते हुतवहेऽमलधीर्
अभिवाह्य सम्यग् अभिपूज्य हरिम् ।
जुहुयात् सिताघृतयुतेन पयः
परिसाधितेन सितदीधितिना ॥ १॥

अष्टोत्तरं सहस्रं समाप्य
होमं पुनर्बलिं दद्यात् ।
राशिष्वधिनाथेभ्यो
नक्षत्रेभ्यस्ततश्च करणेभ्यः ॥ २॥

सम्पाद्य पानीयसुधां समर्प्य
दत्त्वाम्भ उदास्य मुखार्चिरास्ये
नैवेद्यमुद्धृत्य निवेद्य विष्वक्
सेनाय पृथ्वीमुपलिप्य भूयः ॥ ३॥

गण्डूषदन्तधवनाचमनास्यहस्त
मृज्यानुलेपमुखवासकमाल्यभूषाः ।
ताम्बूलमप्यभिसमर्प्य सुवाद्यनृत्य
गीतैः सुतृप्तमभिपूजयतात् पुनरेव ॥ ४॥

गन्धादिभिः सपरिवारमथार्घमस्मै
दत्त्वा विधाय कुसुमाञ्जलिमादरेण ।
स्तुत्वा प्रणम्य शिरसा चुलुकोदकेन
स्वात्मानमर्पयतु तच्चरणाब्जमूले ॥ ५॥

इति पूर्वं प्राणबुद्धिदेहधर्माधिकारतः ।
जाग्रत्स्वप्नसुषुप्त्याख्यावस्थासु मनसा वाचा ॥ ६॥
कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतम् ।
यद् उक्तं यत् कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ ७॥
मां मदीयं च सकलं हरयेऽहं समर्पये ।
ॐ तत् सदिति सम्प्रोक्तो मन्त्रः स्वात्मार्पणे शुभः ॥ ८॥


From http://sanskritdocuments.org

अनुस्मरन् कलशगमच्युतं जपेत्
सहस्रकं मनुमथ साष्टकं बुधः ।
वपुष्यथो दितिजाजितः समावृतीर्
विलाप्य तास्तद् अपि नयेत् सुधात्मताम् ॥ ९॥

ध्वजतोरणदिक्कलशादिगताम्
अपि मण्डपमण्डलकुण्डगताम् ।
अभियोज्य चितिं कलशे कुसुमैः
परिपूज्य जपेत् पुनरष्टशतम् ॥ १०॥

अथ शिष्य उपोषितः प्रभाते
कृतनैत्यः सुसिताम्बरः सुवेशः ।
धरणीधनधान्यगोकुलैर्
धिनुयाद् विप्रवरान् हरेः प्रसत्त्यैः ॥ ११॥

भूयः प्रतर्प्य प्रणिपत्य देशिकं
तस्मै परस्मै पुरुषाय देहिने ।
तां वित्तशाठ्यं परिहृत्य दक्षिणां
दत्त्वा तनुं स्वां च समर्पयेत् सुधीः ॥ १२॥

अथाभिषेकमण्डपे सुखोपविष्टमासने ।
गुरुर्विशोधयेद् अमुं पुरेव शोषणादिभिः ॥ १३॥

पीठन्यासावसानं वपुषि विमलधीर्न्यस्य तस्यासिकाया
मन्त्रेणाभ्यर्च्य दूर्वाक्षतकुसुमयुतां रोचनां के निधाय ।
आशीर्वादैर्द्विजानां विशदपटुरवैर्गीतवादित्रघोषैर्
माङ्गल्यैरानयत्तं कलशमभिवृतस्तत्समीपं प्रतीतः ॥ १४॥

तेनाभिलीनमणिमन्त्रमहौषधेन
धाम्ना पेरण परमामृतरूपभाजा ।
सम्पूरयन् वपुरमुष्य ततो वितन्वन्
तत्सामरस्यमभिषेचयताद् यथावत् ॥ १५॥

क्षाद्यैरान्तैर्वर्णैरभिपूर्णतनुस्त्रिरुक्तमन्त्रान्तैः ।
परिहितसितततरवमनद्वितीयो वाचंयमः समाचान्तः ॥ १६॥



From http://sanskritdocuments.org

बहुशः प्रणम्य देशकनामानं हरिमथोपसङ्गम्य ।
तद्दक्षिणत उपास्तामभिमुखमेकाग्रमानसः शिष्यः ॥ १७॥

न्यासैर्यथाविधि तमच्युतसाद्विधाय
गद्न्हाक्षतादिभिरलङ्कृतवर्ष्मणोऽस्य ।
ऋष्यादियुक्तमथ मन्त्रवरं यथावद्
ब्रूयात् त्रिशो गुरुरनर्घ्यमवामकरेण ॥ १८॥

गुरुणा विधिवत् प्रसादितं
मनुमष्टोर्ध्वशतं प्रजप्य भूयः ।
अभिवाद्य ततः शृणोतु सम्यक्
समयान् भक्तिभरेण नम्रमूर्तिः ॥ १९॥

दत्त्वा शिष्याय मनुं न्यस्याथ गुरुः कृतात्मयजनविधिः ।
अष्टोत्तरं सहस्रं स्वशक्तिहान्यनवाप्तये जप्यात् ॥ २०॥

कुम्भादिकं च सकलं गुरवे समर्प्य
सम्भोजयेद् द्विजवरान् अपि भोज्यजातैः ।
कुर्वन्त्यह्न अनेन विधिना य इहाभिषेकं
ते सम्पदां निलयनं हि त एव धन्याः ॥ २१॥

सङ्क्षिप्य किंचिद् उदिता दीक्षा
संस्मरणाय हि विशदधियाम् ।
एतां प्रविश्य मन्त्री सर्वान्
जपेज्जुहोतु यजेच्च मनून् ॥ २२॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
नवमोऽध्यायः
॥ ३ ९॥

---

(३ १०)
तृतीयरात्रे दशमोऽध्यायः

श्रीव्यास उवाच --
चैत्रे कृत्वैतन् मासि कर्माच्छपक्षे



From http://sanskritdocuments.org

पुण्यर्क्षे भूयो देशिकात् प्राप्य दीक्षाम् ।
तेनानुज्ञातः पूर्वसेवां द्वितीये
मासि द्वादश्यामारभेतामलायाम् ॥ १॥

कृत्वा स्नानाद्यं कर्म देहार्चनान्तं
वर्त्माश्रित्य प्राग् ईरितं मन्त्रिमुख्यः ।
शुद्धो मौनी सन् ब्रह्मचारी निशाशी
जप्याच्छान्तात्मा शुद्धपद्माक्षदाम्ना ॥ २॥

तन्वन् शुश्रूषां गोषु ताभ्यः प्रयच्छन्
ग्रासं भूतेषु प्रोद्वहश्चानुकम्पाम् ।
मन्त्राधिष्ठात्रिं देवतां वन्दमानो
दुर्गां दुबोधध्वान्तभानुं गुरुं च ॥ ३॥

कुर्वन्न् आत्मीयं कर्म वर्णाश्रमस्थं
मन्त्रं जप्त्वा त्रिः स्नानकालेऽभिषिञ्चेत् ।
आचामन् पाथस्तत्त्वसङ्ख्याप्रजप्तं
भुञ्जानश्चान्नं सप्तजप्ताञ्चनादि ॥ ४॥

अद्रेः शृङ्गे नद्यास्तटे बिल्वमूले
तोये हृदघ्ने गोकुलविष्णुगेहे ।
अश्वत्थाधस्ताद् अम्बुधेश्चापि तीरे
स्थानेष्वेतेष्वासीन एकैकशस्तु ॥ ५॥

प्रजपेद् युतचतुष्कं दशाक्षरं मनुवरं पृथक् क्रमशः ।
अष्टादशाक्षरं चेद् अयुतद्वयमित्युदीरिता सङ्ख्या ॥ ६॥

शाकं मूलं फलं गोस्तनभवदधिनी भैक्षमन्नं च सक्तुं
दुग्धान्नं चेत्यदानः क्षितिधरशिखरादौ क्रमात् स्थानभेदे ।
एकं चैषामशक्तौ गदितमिह मया पूर्वसेवाविधानं
निर्वृत्तेऽस्मिन् पुनश्च प्रजपतु विधिवत् सिद्धये साधकेशः ॥ ७॥

देहार्चनान्ते दिनशो दिनादौ
दीक्षोक्तमार्गान्यतरं विधानम् ।
आश्रित्य कृष्णं प्रयजेद् विविक्ते
गेहे निषण्णो हुतशिष्टभोजी ॥ ८॥



From http://sanskritdocuments.org

दशलक्षमक्षयफलप्रदं मनुं
प्रतिजप्य शिक्षितमतिर्दशाक्षरम् ।
जुहुयाद् गुडाज्यमधुसम्प्लुतैर्नवैर्
अरुणाम्बुजैर्हुतवहे दशायुतम् ॥ ९ ॥

शुषिरयुगलवर्णं चेन् मनुं पञ्चलक्षं
प्रजपतु जुहुयाच्च प्रोक्तकॢप्त्यार्धलक्षम् ।
अमलमतिरलाभे पायसैरम्बुजानां
सहितघृतसितैरेवारभेद् धोमकर्म ॥ १० ॥

असक्तानां होमे निगमरसनागेन्द्रगुणितो
जपः कार्यश्चेति द्विजनृपविशामाहुरपरे ।
सहोमश्चेद् एषां सम इह जपो होमरहितो
य उक्तो वर्णानां स खलु विहितस्तच्चलदृशाम् ॥ ११ ॥

यं वर्णमाश्रितो यः शूद्रः स च तन्नतभ्रुवाम् ।
विदधीत जपं विधिवच्छ्रद्धावान् भक्तिभरावनम्रतनुः ॥ १२ ॥
पुनरभिषिक्तो गुरुणा विधिवद् विश्राण्य दक्षिणां तस्मै ।
अभ्यवहार्य च विप्रान् विभवैः सम्प्रीणयेच्च भक्तियुतः ॥ १३ ॥

इति मन्त्रवरद्वितयान्यतरं
परिसाध्य जपादिभिरच्युतधीः ।
प्रजपेत् सवनत्रितये दिनशो
विधिनाथ मुकुन्दममन्दमतिः ॥ १४ ॥

अथ श्रीमदुद्यानसंवीतहैम
स्थलोद्भासिरत्नस्फुरन्मण्डपान्तः ।
लसत्कल्पवृक्षाध उद्दीप्तरत्न
स्थलीधिष्ठिताम्भोजपीठाधिरूढम् ॥ १५ ॥

महानीलनीलाभमत्यन्तबालं
गुडस्निग्धवक्त्रान्तविस्रस्तकेशम् ।
अलिव्रातपर्याकुलोत्फुल्लपद्म
प्रमुग्धाननं श्रीमद् इन्दीवराक्षम् ॥ १६ ॥


From http://sanskritdocuments.org

(षेए नारदपुराण १।८०।७७फ़्फ़्)
चलत्कुण्डलोल्लासिसम्फुल्लगण्डं
सुघोणं सुशोणाधरं सुस्मितास्यम् ।
अनेकाश्मरश्म्युल्लसत्कण्ठभूषा
लसन्तं वहन्तं नखं पौण्डरीकम् ॥ १७॥

समुद्भूसरोरःस्थलं धेनुधूल्याः
सुपुष्टाङ्गमष्टापदाकल्पदीप्तम् ।
कटीरस्थले चारुजङ्घान्तयुग्मे
पिनद्धं क्वणत्किङ्किणीजालदाम्ना ॥ १८॥

हसन्तं हसद्बन्धुजीवप्रसून
प्रभां पाणिपादाम्बुजोदारकान्त्या ।
करे दक्षिणे पायसं वामहस्ते
दधानं नवं शुद्धहैयङ्गवीनम् ॥ १९॥

महीभारभूतामरारातियूथान्
अनःपूतनादीन् निहन्तुं प्रवृत्तम् ।
प्रभुं गोपिकागोपगोवृन्दवीतं
सुरेन्द्रादिभिर्वन्दितं देववृन्दैः ॥ २०॥

प्रगे पूजयित्वेत्त्यनुस्मृत्य कृष्णं
तदङ्गेन्द्रवज्रादिकैर्भक्तिनम्रः ।
सितामोचहैयङ्गवीनैश्च दध्ना
विमिश्रेण दौग्धेन सम्प्रीणयेत् तम् ॥ २१॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
दशमोऽध्यायः
॥ ३।१०॥

---

(३।११)
तृतीयरात्रे एकादशोऽध्यायः

इति प्रातरेवार्चयेद् अच्युतं यो
नरः प्रत्यहं शश्वद् आस्तिक्ययुक्तः ।



From http://sanskritdocuments.org

लभेताचिरेणैव लक्ष्मीं समग्राम्
इह प्रेत्य शुद्धं परं धाम भूयात् ॥ १॥

अह्नो मुखेऽनुदिनमित्यभिपूज्य शौरिं
दद्यादथ वा गुडयुतेन निवेद्य तोयैः ।
श्रीमन्मुखे समनुतर्प्य च तद्धिया तं
जप्यात् सहस्रमथ साष्टकमादरेण ॥ २॥

मध्यन्दिने जपविधानविशिष्टरूपं
वन्द्यं सुरर्षियतिखेचरमुख्यवृन्दैः ।
गोगोपगोपवनितानिकरैः परीतं
सान्द्राम्बुदच्छविसुजातमनोहराङ्गम् ॥ ३॥

मयूरपत्रपरिक्लृप्तवतंसरम्य
धम्मिल्लमुल्लसितचिल्लिकमम्बुजाक्षम् ।
पूर्णेन्दुबिन्दुवदनं मणिकुण्डलश्री
गण्डं सुनासमतिसुन्दरमन्दहासम् ॥ ४॥

पीताम्बरं रुचिरनूपुरहारकाञ्ची
केयूरकोमिकटकादिभिरुज्ज्वलाङ्गम् ।
दिव्यानुलेपनपिशङ्गितमसराजद्
अम्लानचित्रवनमालमनङ्गदीप्तम् ॥ ५॥

वेणुं धमन्तमथवा स्वकरे दधानं
सव्येतरे पशुपयष्टिमुदारवेषम् ।
दक्षे मणिप्रवरमीप्सितदानदक्षं
ध्यात्वैवमर्चयतु नन्दजमिन्दिराप्त्यै ॥ ६॥

दामादिकाङ्गदयितासुहृदङ्घ्रिपेन्द्र
वज्रादिभिः समभिपूज्य यथाविधानम् ।
दीक्षाविधिप्रकथितं च निवेद्य जातं
हैमे निवेदयतु पात्रवरे यथावत् ॥ ७॥

अष्टोत्तरं शतमथो जुहुयात् पयोऽन्नैः
सर्पिःप्लुतैः सुसितशर्करया विमिश्रैः ।
दद्याद् बलिं च निजदिक्षु सुरर्षियोगि


From http://sanskritdocuments.org

वर्गोपदैवतगणेभ्य उदग्रचेताः ॥ ८॥

नवनीतमिलितपायसधियार्चनान्ते जलैर्मुखे तस्य ।
सन्तर्प्य जपतु मन्त्री सहस्रमष्टोत्तरशतं वापि ॥ ९॥

अह्नो मध्ये वल्लवीवल्लभं तं
नित्यं भक्त्याभ्यर्चयेत् यो नराग्र्यः ।
देवाः सर्वे तं नमस्यन्ति शश्वत्
वर्तेरन् वै तद्वशे सर्वलोकाः ॥ १०॥

मेधायुःश्रीकान्तिसौभाग्ययुक्तः
पुत्रैर्मित्रैर्गोमहीरत्नधान्यैः ।
भोगैश्चान्यैर्भूरिभिः सन्निहाढ्यो
भूयान् भूयो धाम तच्चाच्युताख्यम् ॥ ११॥

तृतीयकालपूजायामस्ति कालविकल्पना ।
सायाह्ने निशि वेत्यत्र वदन्त्येके विपश्चितः ॥ १२॥
दशाक्षरेण चेद् रात्रौ सायाह्नेऽष्टादशार्णतः ।
उभयीमुभयेनैव कुर्याद् इत्यपरे जगुः ॥ १३॥
सायाह्ने द्वारवत्यं तु चित्रोद्यानोपशोभिते ।
द्व्यष्टसाहस्रसङ्ख्यातैर्भवनैरभिसंवृते ॥ १४॥
हंससारससङ्कीर्णैः कमओल्त्पलशालिभिः ।
सरोभिरमलाम्भोभिः परीते भवनोत्तमे ॥ १५॥
उद्यत्प्रद्योतनद्योतसद्युतौ मणिमण्डपे ।
मृद्वास्तरे सुखासीनं हेमाम्भोजासने हरिम् ॥ १६॥
नारदाद्यैः परिवृतमात्मतत्त्वविनिर्णये ।
तेभ्यो मुनिभ्यः स्वं धाम दिशन्तं परमक्षरम् ॥ १७॥
इन्दीवरनिभं सौम्यं पद्मपत्रोरुणेक्षणम् ।
स्निग्धकुन्तलसम्भिन्नकिरीटमुकुटोज्ज्वलम् ॥ १८॥
चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ।
श्रीवत्सवक्षसं भ्राजकौस्तुभं वनमालिनम् ॥ १९॥
काश्मीरकपिशोरस्कं पीतकौशेयवाससम् ।
हारकेयूरकटकरसनाद्यैः परिष्कृतम् ॥ २०॥
हृतविश्वम्भराभूरिभारं मुदितमानसम् ।
शङ्खचक्रगदापद्मराजद्भुजचतुष्टयम् ॥ २१॥
एवं ध्यात्वार्चयेन् मन्त्री तदङ्गैः प्रथमावृतिम् ।


From http://sanskritdocuments.org

द्वितीयां महिषीभिस्तु तृतीयायां समर्चयेत् ॥ २२॥
नारदं पर्वतं जिष्णुं निशठोद्धवदारुकान् ।
विश्वक्सेनं च सैनेयं दिक्ष्वग्रे विनतासुतम् ॥ २३॥
लोकेशैस्तत्प्रहरणैः पुनरावरणद्वयम् ।
इति सम्पूज्य विधिवत् पायसेन निवेदयेत् ॥ २४॥
तर्पयित्वा खण्डमिश्रैर्दग्धबुद्ध्या जलैर्हरिम् ।
जपेद् अष्टशतं मन्त्री भावयन् पुरुषोत्तमम् ॥ २५॥
पूजासु होमं सर्वासु कुर्यान् मध्यन्दिनेऽथवा ।
आसनाद् अर्घ्यपर्यन्तं कृत्वा स्तुत्वा नमेत् सुधीः ॥ २६॥
समर्प्यात्मानमुद्वास्य तत् स्वे हृत्सरसीरुहे ।
विन्यस्य तन्मयो भूत्वा पुनरात्मानमर्चयेत् ॥ २७॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
एकादशोऽध्यायः
॥ ३ ११॥

---

(३ १२)
तृतीयरात्रे द्वादशोऽध्यायः

सायाह्ने वासुदेवं यो नित्यमेव यजेन् नरः ।
सर्वान् कामान् अवाप्यान्ते स याति परमां गतिम् ॥ १॥
रात्रौ चेन् मन्मथाक्रान्तमानसं देवकीसुतम् ।
यजेद् रासपरिश्रान्तं गोपीमण्डलमध्यगम् ॥ २॥

पृथुं सुवृत्तं मसृणं वितस्ति
मात्रोन्नतं कौ विनिखन्य शङ्कुम् ।
आक्रम्य पद्भ्यामितरेतरात्त
हस्तैर्भ्रमोऽयं खलु रासगोष्ठी ॥ ३॥

स्थलनीरजसूनपरागभृता
लहरीकणजालभरेण सता ।
मरुता परितापहृताध्युषिते
विपुले यमुनापुलिने विमले ॥ ४॥

अशरीरनिशान्तशरोन्मथित



From http://sanskritdocuments.org

प्रमदाशतकोटिभिराकुलिते ।
उडुनाथकरैर्विशदीकृतदिक्
प्रसरे विचरद्भ्रमरीनिकरे ॥ ५॥

विद्याधरकिन्नरसिद्धसुरैः
गन्धर्वभुजङ्गमचारणकैः ।
दारोपहितैः सुविमानगतैः
स्वस्थैरभिवृष्टसुपुष्पचयैः ॥ ६॥

इतरेतरबद्धकरप्रमदा
गणकल्पितरासविहारविधौ ।
मणिशङ्कुगमप्यमुनावपुषा
बहुधा विहितस्वकदिव्यतनुम् ॥ ७॥

सुदृशामुभयोः पृथगन्तरगं
दयितागणबद्धभुजद्वितयम् ।
निजसङ्गविजृम्भदनङ्गशिखि
ज्वलिताङ्गलसत्पुलकालियुजाम् ॥ ८॥

विविधश्रुतिभिन्नमनोज्ञतर
स्वरसप्तकमूर्च्छनतालगणैः ।
भ्रममाणममूभिरुदारमणि
स्फुटमण्डनशिञ्जितचारुतरम् ॥ ९॥

इति भिन्नतनुं मणिभिर्मिलितं
तपनीयमयैरिव भारकतम् ।
मणिनिर्मितमध्यगशङ्कुलसद्
विपुलारुणपङ्कजमध्यगतम् ॥ १०॥

अतसीकुसुमाभतनुं तरुणं
तरुणारुणपद्मपलाशदृशम् ।
नवपल्लवचित्रसुगुच्छलसच्
छिखिपिच्छपिनद्धकचप्रचयम् ॥ ११॥

चटुलभ्रुवमिन्दुसमानमुखं
मणिकुण्डलमण्डितगण्डयुगम् ।


From http://sanskritdocuments.org

शशरक्तसदृक्दशनच्छदनं
मणिराजदनेकविधाभरणम् ॥ १२॥

असनप्रसवच्छदनोज्ज्वलसद्
वसनं सुविलासनिवासभुवम् ।
नवविद्रुमभद्रकराङ्घ्रितलं
भ्रमराकुलदामविराजितनुम् ॥ १३॥

तरुणीकुचयुक्परिरम्भमिलद्
घुसृणारुणवक्षसमुक्षगतिम् ।
शिववेणुसमीरितगानपरं
स्मरविह्वलितं भुवनैकगुरुम् ॥ १४॥

प्रथमोदितपीठवरे विधिवत्
प्रयजेद् इति रूपमरूपमजम् ।
प्रथमं परिपूज्य तदङ्गवृत्तिं
मिथुनानि यजेद् रसगानि ततः ॥ १५॥

दलषोडशके स्वरमूर्तिगणं
सहशक्तिकमुत्तमरासगतम् ।
सरमामदनम् स्वकलासहित
मिथुनाह्वमथेन्द्रपविप्रमुखान् ॥ १६॥

इति सम्यग् अमुं परिपूज्य हरिं
चतुरावृतिसंवृतमार्द्रमतिः ।
रजतारचिते चषके ससितं
सुशृतं सुपयोऽस्य निवेदयतु ॥ १७॥

विभवे सति कंस्यमयेषु पृथक्
चषकेषु तु षोडशसु क्रमशः ।
मिथुनेषु निवेद्य पयः ससितं
विदधीत पुरोवद् अथो सकलम् ॥ १८॥

सकलभुवनमोह्नं विधिं यो
नियतममुं निशि निश्युदारचेताः ।
भजति स खलु सर्वलोकपूज्यः



From http://sanskritdocuments.org

श्रियमतुलां समवाप्य यात्यनन्तम् ॥ १९ ॥

निशि वा दिनान्तसमये
प्रपूजयेन् नित्यशोऽच्युतं भक्त्या ।
समपहलमुभयं हि ततः
संसाराब्धिं समुत्तितीर्षति यः ॥ २० ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
द्वादशोऽध्यायः
॥ ३ १२ ॥

---

(३ १३)
तृतीयरात्रे त्रयोदशोऽध्यायः

इत्येवं मनुविग्रहं मधुरिपुं यो वा त्रिकालं यजेत्
तस्यैवाखिलजन्तुजातदयितस्याम्भोधिजावेश्मनः ।
हस्ते धर्मसुखार्थमोक्षतरवः सद्वर्गसम्प्रार्थिताः
सान्द्रानन्दमहारसद्रवमुचो येषां फलश्रेणयः ॥ १ ॥

तर्पयामि पदं योज्यं मन्त्रान्ते स्वेषु नामसु ।
द्वितीयान्तेषु तु ततः पूजाशेषं समापयेत् ॥ २ ॥

अभ्युक्ष्य तत्प्रसादाद्भिरात्मानं प्रपिबेद् अपः ।
तज्जप्त्वा तमथोद्वास्य तन्मयः प्रजपेन् मनुम् ॥ ३ ॥

अथ द्रव्याणि काम्येष् वक्ष्यन्ते तर्पणेषु तु ।
तानि प्र्क्तविधानानामाश्रित्यान्यतरं भजेत् ॥ ४ ॥

विंशतिरष्टोपेता कालत्रयतर्पणेषु सङ्ख्योक्ता ।
भूयः स्वकलविहितान् सकऋत् तर्पयेच्च परिवारान् ॥ ५ ॥

प्रातर्दधिगुडमिश्रं मध्याह्ने पायसं सनवनीतम् ।
क्षीरं तृतीयकाले ससितोपलमित्युदीरितं द्रव्यम् ॥ ६ ॥

तर्पयामिपदं योज्यं मन्त्रान्ते स्वेषु नामसु ।



From http://sanskritdocuments.org

द्वितीयान्तेषु तु ततः पूजाशेषं समापयेत् ॥ ७॥

अभ्युक्ष्य तत्प्रसादाद्भिरात्मानं प्रतिवेदपः ।
तज्जप्त्वा तमथोद्वास्य तन्मयः प्रजपेन् मनुम् ॥ ८॥

अथ द्रव्याणि काम्येषु वक्ष्यन्ते तर्पणेषु तु ।
तानि प्रोक्तविधानानामाश्रित्यान्यतरं भजेत् ॥ ९॥

द्रव्यैः षोडशभिरमु प्रतर्पयेद् एकशश्चतुर्वारम् ।
स चतुःक्षीराद्यन्तैः सकृज्जलाद्यन्तमच्युतं भक्त्या ॥ १०॥

पायसदाधिककृसरङ्गौडान्नपयोदधीनि नवनीतम् ।
आज्यं कदलीमोचारजस्वलाचोचमोदकापूपम् ॥ ११॥

पृथुकं लाजोपेतं द्रव्याणां कथितमिह षोडशकम् ।
लाजान्तेऽन्त्यक्षीरात् प्राक् समर्प्य सितोपलापुञ्जैः ॥ १२॥

प्रगे चतुःसप्ततिवारमित्यमुं
प्रतर्पयेद् योऽनुदिनं नरो हरिम् ।
अनन्यधीस्तस्य समस्तसम्पदः
करे स्थिता मण्डलतोऽभिवाञ्छिताः ॥ १३॥

धारोष्णपक्वपयसीदधिनवनीते घृतं च दौग्धान्नम् ।
मत्स्यण्डीमध्वमृतं द्वादशशः तर्पयेन् नवभिरेभिः ॥ १४॥

तर्पणविधिरयमपरः पूर्वोदितसमफलोऽष्तशसङ्ख्यः ।
कार्मणकर्मणि कीर्तौ जनसंवनने विशेषतो विहितः ॥ १५॥

सखण्डधारोष्णधियामुकुन्दं
व्रजन् पुरग्राममपि प्रतर्प्य ।
लभेत भोज्यं सरसं सभृत्यैर्
वासांसि धान्यानि धनानि मन्त्री ॥ १६॥

यावत् सन्तर्पयेन् मन्त्री तावत्सङ्ख्यं जपेन् मनुम् ।
तर्पणेनैव कार्याणि साधयेद् अखिलान्यपि ॥ १७॥



From http://sanskritdocuments.org

द्विजोभिक्षावृत्तिर्य इह दिनशो नन्दतनयः
स्वयं भूत्वा भिक्षामटति विहरन् गोपसुदृशाम् ।
अमा चेतोभिः स्वैर्ललितललितैर्नर्मविधिभिर्
दधिक्सीराज्याढ्यां प्रचुरतरभिक्षां स लभते ॥ १८ ॥

मध्ये कोणेषु षट्स्वप्यनलपुटस्यालिखेत् कर्णिकायां
कन्दर्पं साध्ययुक्तं विवरगतषडर्णं द्विशः केशरेषु
शक्तिश्रीपूर्वकानिद्विनवलिपिमनोरक्षराणि च्छदानां
मध्ये वर्णान् दशानां दशलिपिमनुवर्यस्य चैकेकशोऽब्जम् ॥ १९ ॥

भूसद्मनाभिवृतमस्त्रगमन्मथेन
गोरोचनाभिलिखितं तपनीयसूच्या ।
पट्टे हिरण्यरचिते गुलिकीकृतं तद्
गोपालयन्त्रमखिलार्थदमेतद् उक्तम् ॥ २० ॥

सम्पातसिक्तमभिजप्तमिदं महद्भिर्
धार्यं जगत्त्रयवशीकरणैकदक्षम् ।
रक्षायशःसुतमहीधनधान्यलक्ष्मी
सौभाग्यलिप्सुभिरजस्रमनर्घ्यवीर्यम् ॥ २१ ॥

भूतोन्मादापस्मृतिविषमूर्च्छाविभ्रमज्वरार्तानाम् ।
ध्यायन् शिरसि प्रजपेन् मन्त्रमिमं झटिति शमयितुं विकृतिम् ॥ २२ ॥

स्मरत्रिविक्रमाक्रान्तश्चक्रीष्णायहृद् इत्यसौ ।
षडक्षरोऽयं सम्प्रोक्तः सर्वसिद्धिकरो मनुः ॥ २३ ॥
क्रोडोऽग्निदीप्तो मायावीलवलाञ्छितमस्तकः ।
सैषा शक्तिः परा सूक्ष्मा नित्या संवित्स्वरूपिणी ॥ २४ ॥
अस्थ्यग्निगोविन्दलवैर्लक्ष्मीबीजं समीरितम् ।
आभ्यामष्टादशलिपिः स्याद् विंशत्यक्षरो मनुः ॥ २५ ॥
शालग्रामे मणौ यन्त्रे मण्डले प्रतिमासु च ।
नित्यं पूजा हरेः कार्या न तु केवलभूतले ॥ २६ ॥

इति जपहुतपूजातर्पणाद्यैर्मुकुन्दं
य इह भजति मवोरेकमाश्रित्य नित्यम् ।
स तु सुचिरमयत्नात् प्राप्य भोगान् विशेषान्
पुनरमलतरन्तद्धाम विष्णोः प्रयाति ॥ २७ ॥



From http://sanskritdocuments.org

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
त्रयोदशोऽध्यायः
॥ ३ १३ ॥

---

(३ १४)
तृतीयरात्रे चतुर्दशोऽध्यायः

विनियोगान् अथो वक्ष्ये मन्त्रयोरुभयोः समान् ।
तदर्थकारिणोऽनन्तवीर्यान् मन्त्रांश्च कांश्चन ॥ १॥
वन्दे तं देवकीपुत्रं सद्योजातं द्युसप्रभम् ।
पीताम्बरं करलसच्छङ्खचक्रगदाम्बुजम् ॥ २॥
एवं ध्यात्वा जपेल् लक्षं मन्त्रं ब्राह्मे मुहूर्तके ।
स्वादुप्लुतैश्च कुसुमैः पलाशैरयुतं हुनेत् ॥ ३॥
मन्वोरन्यतरेणैवं कुर्याद् यः सुसमाहितः ।
स्मृतिं मेधां मतिबलं लब्ध्वा स कविराड् भवेत् ॥ ४॥
स्यान् मनुस्तत् समजपध्यानहोमफलोऽपरः ।
श्रीमन्मुकुन्दचरणौ सदेति शरणं ततः ॥ ५॥
अहं प्रपद्य इत्युक्तो मौकुन्दोऽष्टादशाक्षरः ।
नारदोऽस्य तु गायत्री मुकुन्दश्चषिपूर्वकाः ॥ ६॥
प्रातः प्रातः पिबेत् तोयं जप्तं योऽष्तोत्तरं शतम् ।
अनेन षड्भिर्मासैः स भवेच्छ्रुतधरो नरः ॥ ७॥
उपसंहृतदिव्याङ्गं पुरोवन् मातुरङ्कगम् ।
चलद्दोश्चरणं बालं नीलाभं संस्मरन् जपेत् ॥ ८॥
अयुतं तावद् एवाज्यैर्जुहुयाच्च हुताशने ।
स लभेद् अचलां भक्तिं श्रद्धां शान्तिं च शाश्वतीम् ॥ ९॥
मनुनैतत्समस्तान्ते मरुन्नमितशब्दितः ।
बाललीलात्मने हुं फट् नम इत्यमुनाथवा ॥ १०॥
नलकूवरगायत्रीबालकृष्णा इतीरिताः ।
ऋस्याद्याः सिद्धयः सर्वाः स्युर्जपाद्यैरिहामुना ॥ ११॥
लम्बितं बालशयने रुदन्तं वल्लवीजनैः ।
प्रेक्ष्यमाणं दुग्धबुद्ध्या तर्पयेत् सोऽश्नुतेऽशनम् ॥ १२॥
अमुना वान्नरूपान्ते रसरूपपदं वदेत् ।
तुष्टरूप नमो द्वन्द्वमन्नाधिपतये मम ॥ १३॥
अन्नं प्रयच्छ स्वाहेति त्रिंशदर्णोऽन्नदो मनुः ।



From http://sanskritdocuments.org

नारदानुष्टुबन्नाधिपतयोऽस्यर्षिपूर्वकाः ॥ १४॥
भूतबालग्रहोन्मादस्मृतिभ्रंशाद्युपद्रवैः ।
पूतनास्तनपातारं ग्रस्तमूर्ध्नि स्मरन् जपेत् ॥ १५॥
सासुचूषणनिर्भिन्नसर्वाङ्गीं रुदतीं च ताम् ।
आविश्य सर्वे मुक्त्वा तं विद्रवन्ति द्रुतं ग्रहाः ॥ १६॥
जुहुयात् खरमञ्जर्या मञ्जरीभिर्विभावसौ ।
सुस्नातः पञ्चगव्याद्भिः पूतनाहन्तुरानने ॥ १७॥
प्राशयेच्छिष्टगव्यं तत्कलशेनाभिषेचयेत् ।
साध्यं सहस्रजप्तेन सर्वोपद्रवशान्तये ॥ १८॥
अमुनैतद् द्वादशार्णं हुं फट् स्वाहान्तकेन वा ।
ऋष्याद्या ब्रह्मगायत्रीग्रहघ्नहरयोऽस्य तु ॥ १९॥
निजपादाम्बुजाक्षिप्तशकटं चिन्तयन् जपेत् ।
अयुतं मन्त्रयोरेकं सर्वविघ्नोपशन्तये ॥ २०॥
अङ्गान्यमीषां मन्त्राणामाचक्रादिभिरर्चना ।
अङ्गैरिन्द्रादिवज्राद्यैरुदिता सम्पदे सदा ॥ २१॥
बालो नीलतनुर्दोर्भ्यां दध्युत्थं पायसं दधत् ।
हरिर्वोऽव्याद् द्वीपिनखकिङ्किणीजालमण्डितः ॥ २२॥
ध्यात्वैवाग्नौ जुहुयात् शतवीर्याङ्कुरत्रिकैः ।
पयःसर्पिःप्लुतैर्लक्षमेकं तावज्जपेन् मनुम् ॥ २३॥
गुरवे दक्षिणां दत्त्वा भोजयेद् द्विजपुङ्गवान् ।
स ह्यब्दानां शतं जीवेन् न रोगो नात्र संशयः ॥ २४॥
अत्रापरो मनुर्द्वादशार्णान्ते पुरुषोत्तम ।
आयुर्मे देहि सम्भाष्य विष्णवे प्रभविष्णवे ॥ २५॥
नमोऽन्तो द्व्यधिकत्रिंशदर्णोऽस्यार्षिस्तु नारदः ।
छन्दोऽनुष्टुप्देवता च श्रीकृष्णोऽङ्गान्यतो ब्रुवे ॥ २६॥
रविभूतेन्द्रियवसुनेत्रार्णैश्चात्मने युतैः ।
महानन्दपदज्योतिर्मायाविद्यापदैः क्रमात् ॥ २७॥
जप्त्वा लक्षमिमं मन्त्रमयुतं पायसैर्हुनेत् ।
पूर्ववद् दूर्वया जुह्वद् आयुर्दीर्घतरं लभेत् ॥ २८॥
दारयन्तं बकं दोर्भ्यां कृष्णं संगृह्य तुण्डयोः ।
स्मरन् शिशूनामातङ्के स्पृष्ट्वाऽयतरमभ्यसेत् ॥ २९॥
तज्जप्ततिलजाभ्यङ्गाद् भवेयुः सुखिनश्च ते ।
अत्राप्यन्यो मनुर्बालवपुषे वह्निवल्लभा ॥ ३०॥
गोरक्षायां क्वणद्वेणुं चारयन्तं पशूंस्तथा ।
उक्त्वा गोपालकपदं पुनर्वेशधराय च ॥ ३१॥
वासुदेवाय वर्मास्त्रशिरांस्यष्टादशाक्षर ।



From http://sanskritdocuments.org

मनोर्नारदगायत्रीकृष्णर्ष्यादिरनेन वा ॥ ३२॥
कुर्याद् गोपालसंरक्षामाचक्राद्यङ्गिना बुधः ।
कुम्भीनसादिक्ष्वेडार्तौ दष्टमूर्ध्नि स्मरन् हरिम् ॥ ३३॥
नृत्यन्तं कालियफणारङ्गेऽन्यतरमभ्यसेत् ।
दृशा पीयूषवर्षिण्या सिञ्चन्तं तत् तनुं बुधः ॥ ३४॥
तर्जयन् वामतर्जन्या तं द्राङ् मोचयते विषात् ।
आपूर्वकलशं तोयैः स्मृत्वा कालियमर्दनम् ॥ ३५॥
जप्त्वाष्टशतमासिञ्चेद् विषिणं स सुखी भवेत् ।
काव्यमध्ये लियस्यान्ते फणामध्येदिवर्णकान् ॥ ३६॥
उक्त्वा पुनर्वदेन् नृत्यं करोति तमनन्तरम् ।
नमामि देवकीपुत्र इत्युक्त्वा नृत्यशब्दतः ॥ ३७॥
राजानमच्युतं ब्रूयाद् इति दन्तलिपिर्मनुः ।
अस्याङ्गान्यङ्घ्रिभिर्न्यस्तैः समस्तैर्नारदो मुनिः ॥ ३८॥
छन्दोऽनुष्टुब् देवता च कृष्णः कालियमर्दनः ।
जप्यो लक्षं मनुरयं होतव्यं सर्पिषायुतम् ॥ ३९॥
अङ्गदिक्पालवज्राद्यैरर्चनास्य समीरिता ।
क्रिया सर्वा च कर्तव्या विसघ्नी पूर्वमीरिता ॥ ४०॥
सदृशोऽनेन जगति नहि क्ष्वेअहरो मनुः ।
अङ्गैः शुकतरोः पिष्टैर्गुलिका धेनुवारिणा ॥ ४१॥
आननस्याञ्जनालेपैर्विषघ्नी साधितामुना ।
उद्दण्डवामदोर्दण्डधृतगोवर्धनाचलम् ॥ ४२॥
अन्यहस्ताङ्गुलीव्यक्तस्वरवंशार्पिताननम् ।
ध्यायन् हरिं जपन् मन्वोरेकं छत्रं विना व्रजेत् ॥ ४३॥
वर्षवाताशनिभ्यः स्याद् भयं तस्य नहि क्वचित् ।
मोघमेघौघयत्नापगतेन्द्रं तं स्मरन् हुनेत् ॥ ४४॥
लोलैरयुतसङ्ख्यातैरनावृष्टिर्न संशयः ।
क्रीडन्तं यमुनातोये मज्जनप्लवनादिभिः ॥ ४५॥
तच्छीकरजलासारैः सिच्यमानं प्रियाजनैः ।
ध्यात्वायुतं पयःसिक्तैर्हुनेद् वानीरतर्पणैः ॥ ४६॥
वृष्टिर्भवत् कालेऽपि महती नात्र संशयः ।
अमुमेव स्मरन् मूर्ध्नि विषस्फोटज्वरादिभिः ॥ ४७॥
सदाहमोहैरार्तस्य जपेच्छान्तिर्भवेत् क्षणात् ।
अथवा गरुदारूढं बलप्रद्युम्नसंयुतम् ॥ ४८॥
निजज्वरविनिष्पिष्टज्वराभिष्टुतमच्युतम् ।
ध्यात्वा ज्वराभिभृत्यस्य मूर्ध्न्यन्यतरमभ्यसेत् ॥ ४९॥
शान्तिं व्रजेद् असाध्योऽपि ज्वरः सोपद्रवः क्षणात् ।



From http://sanskritdocuments.org

ध्यात्वैवमग्नावभ्यर्च्य पयोक्तैश्चतुरङ्गुलैः ॥ ५०॥
जुहुयाद् अमृताखण्डैरयुतं ज्वरशान्तये ।
निशातशरनिर्भिन्नभीष्मतापनुदं हरिम् ॥ ५१॥
स्मृत्वा स्पृशन् जपेद् आर्तं पाणिभ्यां रोगशान्तये ।
अपमृत्युविनाशाय सान्दीपनिसुतप्रदम् ॥ ५२॥
ध्यात्वामृतलताखण्डैः क्षीराक्तैरयुतं हुनेत् ।
मृतपुत्राय ददतं सुतान् विप्राय सार्जुनम् ॥ ५३॥
ध्यात्वा लक्षं जपेद् एकं मन्वोः सुतविवृद्धये ।
पुत्रजीवेन्धनयुते जुहुयाद् अनलेऽयुतम् ॥ ५४॥
तत्फलैर्मधुराक्तैः स्युः पुत्रा दीर्घायुषोऽस्य तु ।
क्षीरद्रुक्काथसम्पूर्णमभ्यर्च्य कलशं निशि ॥ ५६॥
जप्त्वायुतं प्रगे नारीमभिषिञ्चेद् द्विषट्दिनम् ।
सा बन्ध्यापि सुतान् दीर्घजीविनो गदवर्जितान् ॥ ५७॥
लभते नात्र सन्देहस्तज्जप्ताज्याशिनी सती ।
प्रातर्वाचंयमा नारी बोधिच्छदपुटे जलम् ॥ ५८॥
मन्त्रयित्वाष्टोत्तरशतं पिबेत् पुत्रीयती ध्रुवम् ।
प्रहितां काशिराजेन कृत्यां छित्वा निजारिणा ॥ ५९॥
तत्तेजसा तन्नगरीं दहन्तं भावयन् हरिम् ।
स्वस्नेहाक्तैर्हुनेद् रात्रौ सर्षपैः सप्तवासरम् ॥ ६०॥
कृत्या कर्तारमेवासौ कुपिता नाशयेद् ध्रुवम् ।
आसीनमाश्रमे दिव्ये बदरीषण्डमण्डिते ॥ ६१॥
स्पृशन्तं पाणिपद्माभ्यां घण्टाकर्णकलेवरम् ।
ध्यात्वाच्युतं तिलैर्लक्षं हुनेत् त्रिमधुराप्लुतैः ॥ ६२॥
मुक्तये सर्वपापानां शान्तये कान्तये तनोः ।
द्वेषयन्तं रुक्मिबलौ द्यूतासक्तौ स्मरन् हरिम् ॥ ६३॥
जुहुयाद् इष्टयोर्द्विष्ट्यै गुलिका गोमयोद्भवाः ।
ज्वलद्वह्निमुखैर्बाणैर्वर्षन्तं गरुडध्वजम् ॥ ६४॥
धावमानं रिपुगणमनुधावन्तमच्युतम् ।
ध्यात्वैवमभ्यसेन् मन्वोरेकं सप्तसहस्रकम् ॥ ६५॥
उच्चाटनं भवेद् एतद् रिपूणां सप्तभिर्दिनैः ।
उत्क्षिप्तवत्सकं ध्यायन् कपित्थफलहारिणम् ॥ ६६॥
अयुतं प्रजपेत् साध्यमुच्चाटयति तत्क्षणात् ।
आत्मानं कंसमथनं ध्यात्वा मञ्चान् निपातितम् ॥ ६७॥
कंसात्मानमरिं कर्षन् गतासुं प्रजपेन् मनुम् ।
अयुतं जुहुयाद् वास्य जन्मोडुतरुतपणैः ॥ ६८॥
अपि सेवितपीयूषो म्रियतेऽरिर्न संशयः ।


From http://sanskritdocuments.org

अथवा निम्बतैलाक्तैर्हुनेद् एधोभिरक्षजैः ॥ ६९ ॥
अयुतं प्रयतो रात्रौ मरणाय रिपोः क्षणात् ।
दोषारिष्टदलव्योषकार्पासास्थिकणैर्निशि ॥ ७० ॥
हुनेद् एरण्डतैलाक्तैः स्मशानस्थोऽरिशान्तये ।
न शस्तं मारणं कर्म कुर्याच्चेद् अयुतं जपेत् ॥ ७१ ॥
हुनेद् वा पायसैस्तावत् शान्तये शान्तमासः ।
जयकामो जपेल् लक्षं पारिजातहरं हरिम् ॥ ७२ ॥
स्मरन् पराजयस्तस्य न कुतश्चिद् भविष्यति ।
पार्थे दिशन्तं गीतार्थं व्याख्यामुद्राकरं हरिम् ॥ ७३ ॥
रथस्थं भावयन् जप्याद् धर्मवृद्ध्यै शमाय च ।
लक्षं पलाशकुसुमैर्हुनेद् यो मधुराप्लुतैः ॥ ७४ ॥
व्याख्याता सर्वशास्त्राणां स कविर्वादिराड् भवेत् ।
विश्वरूपधरं प्रोद्यद्भानुकोटिसमुद्युतिम् ॥ ७५ ॥
द्रुतचामीकरनिभमग्निसोमात्मकं हरिम् ।
अर्काग्निद्योतदास्याङ्घ्रिपङ्कजं दिव्यभूषणम् ॥ ७६ ॥
नानायुधधरं व्याप्तविश्वाकाशावकाशकम् ।
राष्ट्रपूर्ग्रामवास्तूनां शरीरस्य च रक्षणे ॥ ७७ ॥
प्रजपेन् मन्त्रयोरेकतरं ध्यात्वैवमादरात् ।
अथवा व्यस्तसर्वाङ्घ्रिरचिताङ्गार्जुनर्षिकम् ॥ ७८ ॥
त्रिष्टुप्छन्दसिकं विश्वरूपविष्णवधिदैवतम् ।
जपेद् गीतामनुं स्थाने हृषीकेशाद्यमाज्यकैः ।
हुनेद् वा सर्वरक्षायै सर्वदुःखोपशान्तये ॥ ७९ ॥

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
चतुर्दशोऽध्यायः
॥ ३ १४ ॥

---

(३ १५)
तृतीयरात्रे पञ्चदशोऽध्यायः
अथ पूजाहोमविधिः

श्रीव्यास उवाच --
वक्ष्येऽक्षयधनावाप्त्यै प्रतिपत्तिं श्रियः पतेः ।
सुगुप्तां धननाथाद्यैर्धन्यैर्या क्रियते सदा ॥ १ ॥
द्वारवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः ।


From http://sanskritdocuments.org
sanskritdocuments.org

अनल्पैः कल्पवृक्षैश्च परीते मण्डपोत्तमे ॥ २॥
ज्वलद्रत्नमयस्तम्भद्वारतोरणकुड्यके ।
फुल्लस्रगुल्लसच्चित्रवितानालम्बिमौक्तिके ॥ ३॥
पद्मरागस्थलीराजद्रत्ननद्योश्च मध्यतः ।
अनारतगलद्रत्नसुधस्य स्वस्तरोरधः ॥ ४॥
रत्नप्रदीपावलिभिः प्रदीपितदिगन्तरे ।
उद्यदादित्यसङ्काशे मणिसिंहासनाम्बुजे ॥ ५॥
समासीनोऽच्युतो ध्येयो द्रुतहाटकसंनिभः ।
समानोदितचन्द्रार्कतडित्कोटिसमद्युतिः ॥ ६॥
सर्वाङ्गसुन्दरः सौम्यः सर्वाभरणभूषितः ।
पीतवासाश्चक्रशङ्खगदापद्मोज्ज्वलद्भुजः ॥ ७॥
अनारतोच्छलद्रत्नधारौधकलशं स्पृशन् ।
वामपादाम्बुजाग्रेण मुष्णता पल्लवच्छविम् ॥ ८॥
रुक्मिणीसत्यभामेऽस्य मूर्ध्निरत्नौघधारया ।
सिञ्चन्त्यौ दक्षवामस्थे स्वदोःस्थकलशोत्थया ॥ ९॥
नाग्नजिती सुनन्दा च दिशन्त्या कलशौ तयोः ।
ताभ्यां च दक्षवामस्थे मित्रविन्दासुलक्ष्मणे ॥ १०॥
रत्नद्यासमुद्धृत्य रत्नपूर्णौ घटौ तयोः ।
जाम्बवतीसुशीला च दिशन्त्यौ दक्षवामगे ॥ ११॥
बहिः षोडशसाहस्रसङ्ख्याताः परितः स्त्रियः ।
ध्येयाः सकलरत्नाउघधारयुक् कलशोज्ज्वला ॥ १२॥
तद् बहिश्चाष्टनिधयः पूरयन्तओ धनैर्धराम् ।
तद्बहिर्वृष्णयः सर्वे पुरोवच्च सुरादयः ॥ १३॥
ध्यात्वैवं परमात्मानं विंसत्यर्णं मनुं जपेत् ।
चतुर्लक्षं हुनेद् आज्यैश्चत्वारिंशत्सहस्रकम् ॥ १४॥
शक्तिश्रीपूर्वकोऽष्टादशार्णो विंशतिवर्णकः ।
मत्रेणानेन सदृशो मनुर्नहि जगत् त्रये ॥ १५॥
ऋषिर्ब्रह्मा च गायत्रीच्छन्दः कृष्णस्तु देवता ।
पूर्वोक्तवद् एवास्य बीजशक्त्यादिकल्पना ॥ १६॥
कल्पः सनत्कुमारोक्तो मन्त्रस्यास्योच्यतेऽधुना ।
पीठन्यासादिकं कृत्वा पूर्वोक्तक्रमतः सुधीः ॥ १७॥
करद्वन्द्वाङ्गुलितलेष्वङ्गषट्कं प्रविन्यसेत् ।
मन्त्रेण व्यापकं कृत्वा मातृकां मनुसम्पुटाम् ॥ १८॥
संहारसृष्टिमार्गेण दशतत्त्वानि विन्यसेत् ।
पुनश्च व्यापकं कृत्वा मन्त्रवर्णास्तनौ न्यसेत् ॥ १९॥
मूर्ध्नि भाले भ्रुवोर्मध्ये नेत्रयोः कर्णयोर्नसोः ।



From http://sanskritdocuments.org

आनने चिबुके कण्ठे दोर्मूले हृदि तन्दुके ॥ २०॥
नाभौ लिङ्गे तथाधारे कट्योर्जान्वोश्च जङ्घयोः ।
गुल्फयोः पादयोर्न्यसेत् सृष्टिरेषा समीरिता ॥ २१॥
स्थितिर्हृदादिकं सान्ता संहृतिश्चरणादिका ।
विधायैवं पञ्चकृत्वः स्थित्यन्तं मूर्तिपञ्जरम् ॥ २२॥
सृष्टिस्थिती च विन्यस्य षडङ्गन्यासमाचरेत् ।
गुणाग्निवेदकरणकरणाक्ष्यक्षरैर्मनोः ॥ २३॥
मुद्रां बद्ध्वा किरीटाख्यां दिग्बन्धं पूर्ववच्चरेत् ।
ध्यात्वा जप्त्वार्चयेद् देहे मूर्तिपञ्जरपूर्वकम् ॥ २४॥
अथवा ह्येऽर्चयेद् विष्णुं तदर्थं यन्त्रमुच्यते ।
गोमयेनोपलिप्योर्वीं तत्र पीठं निधापयेत् ॥ २५॥
विलिप्य गन्धपङ्केन लिखेद् अष्टदलाम्बुजम् ।
कर्णिकायां तु षट्कोणं ससाध्यं तत्र मन्मथम् ॥ २६॥
शिष्टैस्तं सप्तदशभिरक्षरैर्वेष्टयेत् स्मरम् ।
प्राग्रक्षोऽनिलकोणेषु श्रियं शिष्टेषु संविदम् ॥ २७॥
षडक्षरं सन्धिषु च केशरेषु त्रिशस्त्रिशः ।
विलिखेत् स्मरगायत्रीं मालामन्त्रं दलाष्टके ॥ २८॥
षड्शः संलिख्य तद्बाह्ये वेष्टयेन् मातृकाक्षरैः ।
भूबिम्बं च लिखेद् बाह्ये श्रीमाये दिग्विदिक्ष्वपि ॥ २९॥
एतद्यन्त्रं हाटकादिपट्टेष्वालिख्य पूर्ववत् ।
साधितं धारयेद् यो वै सोऽर्च्येत त्रदशैरपि ॥ ३०॥
स्याद् गायत्री कामदेवपुष्पबाणौ च ङेऽन्तकौ ।
विद्महेधीमहियुतौ तन् नोऽङ्गः प्रचोदयात् ॥ ३१॥
जप्याज्जपादौ गोपालमनूनां जनरञ्जनीम् ।
नत्यन्ते कामदेवाय ङेऽन्तं सर्वजनप्रियम् ॥ ३२॥
उक्त्वा सर्वजनान्ते तु संमोहनपदं तथा ।
ज्वल ज्वल प्रज्वलेति प्रोक्तो सर्वजनस्य च ॥ ३३॥
हृदयं च मम ब्रूयात् वशं कुरुयुगं शिरः ।
प्रोक्तो मदनमन्त्रोऽष्टचत्वारिंशद्भिरक्षरैः ॥ ३४॥
जपादौ मारबीजाद्यो जगत्त्रयवशीकरः ।
भूगृहं चतुरस्रं स्यात् कोणवज्राद्यलङ्कृतम् ॥ ३५॥
पीठं पूर्ववद् अभ्यर्च्य मूर्तिसङ्कल्प्य पौरषीम् ।
तत्रावाह्याच्युतं भक्त्या सकलीकृत्य पूजयेत् ॥ ३६॥
आसनादि भूषणान्तं पुनर्न्यासक्रमात् यजेत् ।
सृष्टिस्थिती षडङ्गं च किरीटं कुण्डलद्वयम् ॥ ३७॥
चक्रशङ्खगदापद्ममालाश्रीवत्सकौस्तुभान् ।


From http://sanskritdocuments.org

गन्धाक्षतप्रसूनैश्च मूलेनाभ्यर्च्य पूर्ववत् ॥ ३८ ॥
आदौ वह्निपुरद्वन्द्वकोणेष्वङ्गानि पूजयेत् ।
सहृच्छिरः शिखावर्मनेत्रमन्त्रमिति क्रमात् ॥ ३९ ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
अग्न्यादिदलमूलेषु शान्तिः श्रीश्च सरस्वती ॥ ४० ॥
रतिश्च दिग्दलेष्वर्च्यास्ततोऽष्टौ महिषीर्यजेत् ।
रुक्मिण्याद्या दक्षसव्ये क्रमात् पत्राग्रकेषु च ॥ ४१ ॥
ततः षोडशसाहस्रं सकृद् एवार्चयेत् प्रियाः ।
इन्द्रनीलमुकुन्दाद्यान् मकरानङ्गकच्छपान् ॥ ४२ ॥
पद्मशङ्खादिकांश्चापि निधीन् अष्टौ क्रमाद् यजेत् ।
तद् बहिश्चेन्द्रवज्राद् ये आवृती सम्प्रपूजयेत् ॥ ४३ ॥
इति सप्तावृत्तिवृतमभ्यर्च्याच्युतमादरात् ।
प्रीणयेद् दधिखण्डाज्यमिश्रेण तु पयोऽन्धसा ॥ ४४ ॥
राजोपचारं दत्त्वाथ स्तुत्वा नत्वा च केशवम् ।
उद्वासयेत् स्वहृदये परिवारगणैः सह ॥ ४५ ॥
न्यस्त्वात्मानं समभ्यर्च्य तन्मयः प्रजपेन् मनुम् ।
रत्नाभिषेकध्यानेज्याविंशत्यर्णाश्रितेरिता ॥ ४६ ॥
जपहोमार्चनैर्ध्यानैर्योऽमुं प्रभजते मनुम् ।
तद् वेश्म पूर्यते रत्नैः स्वर्णधान्यैरनारतम् ॥ ४७ ॥
पृथ्वी पृथ्वी करे तस्य सवसस्यकुलाकुला ।
पुत्रैर्मित्रैः सुसम्पन्नः प्रयात्यन्ते परां गतिम् ॥ ४८ ॥
वह्नावभ्यर्च्य गोविन्दं शुक्लपुष्पैः सतण्डुलैः ।
आज्याक्तैरयुतं हुत्वा भस्म तन्मूर्ध्नि धारयेत् ॥ ४९ ॥
तस्यान्नादिसमृद्धिः स्यात् तद्वशे सर्वयोषितः ।
आज्यैर्लक्षं हुनेद् रक्तपद्मैर्वा मधुराप्लुतैः ॥ ५० ॥
श्रिया तस्यैन्द्रमैश्वर्यं तृणलेशायते ध्रुवम् ।
शुक्लादिवस्त्रलाभाय शुक्लादिकुसुमैर्हुनेत् ॥ ५१ ॥
त्रिमध्वक्तैर्दशशतमाज्याक्तैर्वाष्टसंयुतम् ।
क्षौद्रसिक्तैः सितैः पुष्पैरष्टोत्तरसहस्रकम् ॥ ५२ ॥
हुनेन् नित्यं स षड्मासान् पुरोधा नृपतेर्भवेत् ।
दशाष्टादशवर्णोक्तं जपध्यानहुतादिकम् ॥ ५३ ॥
विदध्यात् कर्म चानेन ताभ्यामप्यत्र कीर्तितम् ।
वाग्भावं मारबीजं च कृष्णाय भुवन्श्वरी ॥ ५४ ॥
गोविन्दाय रमा गोपीजनवल्लभ ङे शिरः ।
चतिर्दशस्वरोपेतः शुक्रः सन्दी तद् ऊर्ध्वतः ॥ ५५ ॥
द्वाविंशत्यक्षरो मन्त्रो वागीशत्वप्रदायकः ।


From http://sanskritdocuments.org

अष्टादशार्णवत् सर्वं षडूष्यादिकमस्य तु ॥ ५६॥
पूजा च विंशत्यर्णोक्ता प्रतिपत्तिस्तु कथ्यते ।
वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकम् ॥ ५७॥
अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीम् ।
शब्दब्रह्ममयं वेत्थमधः पाणिद्वयोरितम् ॥ ५८॥
बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः ॥ ५९॥
उपासितं मुनिगणैरुपतिष्ठेद् धरिं सदा ।
ध्यात्वैवं प्रमदावेशविलासभवनेश्वरम् ॥ ६०॥
चतुर्लक्षं जपेन् मन्त्रमिमं मन्त्री सुसंयतः ।
पालाशपुष्पैः स्वाद्वक्तैश्चत्वारिंशत् सहस्रकम् ॥ ६१॥
जुहुयात् कर्मणानेन ततः सिद्धो भवेद् ध्रुवम् ।
योऽस्मिन् निष्णातधीर्मन्त्री वर्तते बभ्रुगद्दवात् ॥ ६२॥
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ।
सर्ववेदेषु शास्त्रेषु पुराणेषु च पण्डितः ॥ ६३॥
सम्पत्तिं परमां लब्ध्वा चान्ते याति परं पदम् ।
श्रीशक्तिस्मरकृष्णाय गोविन्दाय शिरो मनुः ॥ ६४॥
रव्यर्णो ब्रह्मगायत्रीकृष्णर्ष्यादिरथास्य तु ।
बीजैस्त्रिवेदयुग्मार्णैरङ्गषट्कमिहोदितम् ॥ ६५॥
विंशत्यर्णोदितजपध्यानहोमार्चनक्रियाः ।
मन्त्रोऽयं सकलैश्वर्यकाङ्क्षिभिः सेव्यताम्बुधैः ॥ ६६॥
श्रीशक्तिकामपूर्वोऽङ्गजन्मशक्तिरमान्तकः ।
दशाक्षरः सरावादौ स्याच्चेच्छक्तिरमायुतः ॥ ६७॥
मन्त्रौ विकृतिरव्यर्णावाचक्राद्यङ्गिनाविमौ ।
विंशत्यर्णोक्तयजनविधौ ध्यायेद् अथाच्युतम् ॥ ६८॥
वरदाभयहस्ताभ्यां श्लिष्यन्तं स्वाङ्कगे प्रिये ।
पद्मोत्पलकरे ताभ्यां श्लिष्टं चक्रदरोज्ज्वलम् ॥ ६९॥
दशलक्षं जपेद् आज्यैस्तावत्सहस्रहोमतः ।
सिद्धाविमौ मनू सर्वसम्पत्सौभाग्यदौ नृणाम् ॥ ७०॥
मारशक्तिरमापूर्वः शक्तिश्रीमारपूर्वकः ।
एतेषां मनुवर्याणामङ्गर्ष्यादिदशार्णवत् ॥ ७१॥
शङ्खचक्रधनुर्बाणपाशाङ्कुशधरोऽरुणः ।
वेणुं धमन् धृतं दोर्भ्यां कृष्णो ध्येयो दिवाकरे ॥ ७२॥
आद्ये मनौ ध्यानमेवं द्वितीये विंशदर्णवत् ।
दशार्णवत् तृतीयेऽङ्गदिक्पालाद्यैः समर्चना ॥ ७३॥
पञ्चलक्षं जपेत् तावद् अयुतं पायसैर्हुनेत् ।
ततः सिध्यन्ति मनवो नृणां सम्पत्तिकान्तिदाः ॥ ७४॥


From http://sanskritdocuments.org

इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे तृतीयरात्रे
मन्त्रपूजाहोमविधिविषयकः
पञ्चदशोऽध्यायः
॥ ३ १५ ॥

समाप्तश्चेदं तृतीयरात्रम्

---

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.



From http://sanskritdocuments.org